सर्वतन्त्रसिद्धान्तपदार्थलक्षणसंग्रहः

न 1/39

ालय
ाराणसी-५

त 1/39

भिक्षु-गौरीशङ्करेण संगृहीतः—

सर्वतन्त्रसिद्धान्तपदार्थलक्षणसंग्रहः

स च काश्यां
'भार्गवभूषण' मुद्रणालये
मुद्रापयित्वा प्रकाशितः ।

* षष्ठं संस्करणम् *

प्राप्तिस्थानं—मनोभरीदेवी,
ग्रामः-पुट्ठी, पत्रालयो ववानीखेडा,
प्रदेशो हिसारः ।

मूल्यं द्वादशाणकाः] [संवत् २००६

अस्य ग्रन्थस्य सर्वेऽधिकाराः संग्रहीत्रधीनाः ।

भूमिका

श्रीमतः सूत्रकारान्भाष्यकाराँस्तथा तदनुसारिणः पूर्वाचार्यांश्च भूयो भूयो नमस्कृत्य द्वित्राः शब्दाः प्रदर्श्यन्ते, ये जना नानाशास्त्रनिरीक्षणे श्रमभियस्तदर्थोऽयं मे संग्रहः। तथा चायं ग्रन्थः शतसहस्रधा भूत्वा देशदेशान्तरवर्त्यनेकविद्वद्वृन्ददृष्टिगोचरो भवेदेवञ्च विद्यार्थिगणानां स्वल्पव्ययेन मित्रम्भवेदिति ज्ञात्वा श्रीमत्या मनोभरिदेव्या मुद्रापयित्वा प्रकटीकृतः।

अत्र कदाचिद् दृष्टिदोषेण सीसकाक्षरभङ्गाद्वा यदि कुत्रचित्स्थलेऽशुद्धिः स्यात्तर्हि सदयीभूय सुजनैः क्षन्तव्या इति।

सङ्केतः

एतत्पुस्तकस्य प्रत्येकपृष्ठमध्ये निखिलतान्त्रिकलक्षणानि संस्थितानि, तेषाञ्च झटिति प्राप्तयेऽकारादिक्रमेण सूची कृता। तस्यान्तिमलक्षणस्याद्यं वर्णद्वयं पृष्ठोपरि विन्यस्तं वर्तते, तद्दृष्टिमात्रेण यदक्षरपर्यन्तं लक्षणं तत्पृष्ठारूढीभूतं तद्बोधो भविष्यति। तेनेष्टलक्षणानामनायासेन लाभो भविष्यतीति।

ग्रं० ग्रन्थान्तरे
अत्र० अत्रपठनीयम्
नै० नैयायिकाः
मी० मीमांसकाः
वे० वेदान्तिनः
वै० वैयाकरणाः
सां० सांख्याः

इत्यक्षरस्य ग्रहणं कृतम्। तत्तद्ग्रन्थनामानि विस्तरभिया नोक्तानि, विशेषलक्षणसमापनात्परं विशेषलक्षणारम्भात्पूर्वञ्च तज्ज्ञापकमीदृश * पुष्पाकारचिह्नं दत्तम्। तत्रोक्तप्रसिद्धलक्षणमेकत्वेन गणयित्वा द्व्यादिसंख्याङ्काः स्थापिता इति।

आम्नाय-ग्रन्थालय,
भरतनिवास,
वाराणसी

सर्वतन्त्रसिद्धान्तपदार्थलक्षणसंग्रहः ।

श्रीगणेशाय 'नमः, परमर्षिभ्यः' ।

त्वां विना निःस्वरूपोऽहं मां विना त्वं कथं स्थितः !
दिष्ट्येदानीं मया लब्धो योऽसि सोसि नमोऽस्तुते १
श्रीचेतनकिङ्कराह्वश्रीमद्रामपुर्याह्वयोः ।
वन्दे पादौ तथा श्रीमद्धीरालालाह्वधीमताम् ॥ २॥
श्रद्धाधनेन ग्रथितं गौरीशङ्करभिक्षुणा ।
बोधाय वादिबाधाय विदुषां कण्ठभूषणम् ॥ ३ ॥
क्व ! ग्रन्थकरणं क्व ! त्वमिति मा वित्त पण्डिताः ।
सत्सङ्गानुग्रहः किं ? किं ? न करोत्येवमाह वाक् ४
प्रज्ञाशब्दमयस्यास्य देहस्य मम दुर्जनाः ।
दयध्वं प्रहरध्वं तु चेदिष्टं पाञ्चभौतिके ॥ ५ ॥
प्रमाणसिद्धान्तविरुद्धमत्र यत्किञ्चनाभून्मतिमान्द्यदोषात् ।
मात्सर्यमुत्सार्य महानुभावाः प्रसादमाधाय विशोधयन्तु ६
विद्वांसो यदि मम दोषमुद्गिरेयुः यद्वा ते गुणगणमेव कीर्त्तयेयुः
तुल्यं तद्बहु मनुते मनो मदीयं कष्टं तद्वन्मनुते यदाह मन्दः ७

---

१ मन्त्रगुरुज्ञानप्रदगुरुविद्यागुरूक्रमशो नमस्यति श्रीचेतनेत्यादिना ।

दोषत्वमुज्ज्वलगुणा अपि यान्ति येषु
तैरुन्नतेः किमथवेह तिरस्कृतेः किम् ।
दोषोऽपि येषु गुणतामुपयाति भूयाँ-
स्तेभ्यो नमोऽस्तु सततं भुवि सज्जनेभ्यः ॥८॥

ननु किमर्थं लक्षणसंग्रहारम्भो लक्षणानामनुपयोगादिति चेदुच्यते, अस्ति हि महानुपयोगः, तथाहि—यथा विवाहे सलक्षणो वरो लक्षणवतीं कन्यामुपयच्छेतेति ।

अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।
एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः ॥

इत्यादिवचनैः स्त्रीपुंससामुद्रिकलक्षणानां विवाह उपयोगात्

लिङ्गं सलक्षणं पूज्यं त्यजेल्लिङ्गमलक्षणम् ।
तस्मात्सर्वप्रयत्नेन लिङ्गं कुर्यात्सलक्षणम् ॥

इत्यादिवचनैर्लिङ्गलक्षणानां तत्पूजादावुपयोगात्, एवमन्येषामपि लक्षणानां यथासंभवमुपयोगाद्युक्त एव लक्षणसंग्रहारम्भ इति । लक्षणानामुपयोगः पूर्वाचार्यैरपि दर्शितः, तथाहि—

ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्त्वशः ।
लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः ॥

किञ्च, लक्षणप्रमाणाभ्यां वस्तुसिद्धिर्न तु प्रतिज्ञामात्रेणेति न्यायादपि पदार्थलक्षणमवश्यमपेक्षणीयम् !, तत्र प्रमाणं विहाय लक्षणानि निरूपयाम इति ।

अऋणः-निर्ऋणः १ ऋणत्रयरहितः ☞ अ
अकटुकः-रागद्वेषहीनः । अकण्टकः-विघ्नरहितः ॥ ४ ॥
अकर्ता-अनुपकारकः।अकर्म-शास्त्रविहितानाचरणम्। [रहितः
अकर्मकं-प्रवृत्तिशून्यम् १ जीविकार्थयत्नरहितम्।अकल्पनः-दम्भ-
अकर्मकधातुत्वं-फलसमानाधिकरणव्यापारवाचकधातुत्वम् ।
अकस्मात्त्वं-कारणानधीनत्वम् १ अनिश्चितकारणकत्वं वा ।
अकामः-निस्पृहः १सर्ववासनाशून्यः।अकारत्वं-शून्यवचनत्वम्।
अकालमृत्युः-पशुपक्षिमकरमृगशृङ्गिदंष्ट्रिनखिपतनानशनव-
ज्राग्निविषबन्धनजलशरप्रभृतिजन्यो मृत्युः । [त्तचित्तः
अकृच्छ्रः-ईषत्करः। अकृतज्ञः-विस्मृतोपकारः। अकृतात्मा-आय-
अकृताभ्यागमः-अकृतानां कर्मणां फलसंबन्धः १अकृतयोः पुण्य-
अकृत्तः-कार्याकुशलः । [पापयोर्भोगरूपेणाभ्यागमः प्राप्तिः
अकोपनः-जितक्रोधः । अकृत्यं-कर्तुमयोग्यम् । अक्का-माता।
अक्रिया-कर्माकरणम्। [यभाषणादिव्यतिरेकेण बोधयिता
अक्रूरः-द्रोहशून्यः १वृथा पूर्वपक्षादिकारिष्वपि शिष्यादिष्वप्रि-
अक्लमः-श्रमरहितः।अक्षः-जन्मान्धः १चक्राधारदण्डः २चक्रप्रोत-
अक्षमः-क्षमारहितः। अक्षयः-दुःक्षयः १क्षेतुमशक्यः।[दारुविशेषः
अक्षमा-परस्य दर्पासहिष्णुता १निरुपस्करणे विक्षिप्तचित्तता ।
अक्षरं-अच्युतम् १विनाशशून्यं २वर्णस्मारकत्वे सति लिपिसन्नि-
अक्षुब्धः-समाहितचित्तः। अक्षरावली-अक्षरसंस्थानम् [वेशत्वं
अक्षौहिणी-खाङ्काष्टैकद्विकैर्गजैः रथैरेतै २१८९० र्हयैस्त्रिघ्नैः
६५६७० पञ्चघ्नैश्च १०९४५० पदातिभिरिति १ अयुतश्च
नागाः परियुतं रथानां लक्षैकयोद्धा दशलक्षवाजिनः पदातिसङ्ख्या
षट्त्रिंशत्कोटयः अक्षौहिणी तां मुनयो वदन्तीति केचित्॥४०॥
अखण्डपदत्वं-अभग्नत्वम् १एकपदत्वम् २अखण्डार्थविषयकशक्ति-

निरूपकत्वम् ३ निमित्तानधिकरणनिमित्तिमत्पदाघटितत्वम्।
अखण्डार्थत्वं-सजातीयविजातीयस्वगतभेदशून्यार्थत्वम्। साङ्ख्यात्मन्यतिव्याप्तिवारणाय सजातीयेति आकाशेऽतिव्याप्तिवारणाय विजातीयेति १ तत्प्रातिपदिकार्थत्वम् २ अपर्यायानेकशब्दप्रकाश्यत्वे सत्यविशिष्टत्वम्। घटः कलशः कुम्भ इत्यादिपर्यायानेकशब्दप्रकाश्येऽविशिष्टे घटादावतिप्रसङ्गव्युदासाय सत्यन्तम्, नीलो घट इत्याद्यपर्यायानेकशब्दप्रकाश्ये तादात्म्येन नीलविशिष्टे घटाद्यर्थेऽतिप्रसङ्गवारणार्थमविशिष्टेति
अखण्डमण्डलं-पूर्णमण्डलम्।
अखण्डार्थबोधकवाक्यत्वं-संसर्गानवगाहियथार्थज्ञानजनकत्वम्। राजपुरुष इत्यादौ संसर्गपरे वाक्येऽतिव्याप्तिवारणाय संसर्गानवगाहीति १ प्रातिपदिकार्थमात्रपर्यवसायित्वम् २ अपर्यायशब्दानां संसर्गगोचरप्रमितिजनकत्वम्। हस्तः कर इत्यादौ व्यभिचारवारणायापर्यायग्रहणम्, इन्द्रियव्यावृत्त्यै शब्देति, गामानयेत्यादौ व्यभिचारवारणाय संसर्गगोचरेति, वाक्याभासव्यावृत्त्यर्थं प्रमितिग्रहणम् ३ शक्तिलक्षणान्यतराधीनज्ञानविषयातिरिक्तविषयाविषयकज्ञानजनकत्वम्।
अखण्डितः-विभागरहितः १ नियतकालावच्छिन्नः ॥५३॥
अखण्डोपाधिः-अनिर्वचनीयो धर्मः १ नानापदार्थघटितो धर्मः २
अखिलः-समग्रः १ शल्यरहितः।
अख्यातिः-निन्द्यम् १ अपकीर्तिः २ अविविक्तानेकख्यातिः ३ विशिष्टार्थगोचरविसंवादिप्रवृत्तिजनकप्रकाशः ४ स्वरूपतो विषयतश्चागृहीतभेदेनैकज्ञानम्, एकविषयानेकज्ञानेष्वतिव्याप्ति-असमवेतत्वे सत्यनुगतत्वं

१ तत्प्रातिपदिकार्थत्वं-प्रकृष्टप्रकाशश्चन्द्र इतिवत्तदेकमात्रवस्तुपरत्वम्।
२ अपर्यायभूतायेऽनेके शब्दाः सत्यज्ञानानंदादयस्तत्प्रकाश्यत्वे सतीत्यर्थः

परिहारार्थं स्वरूपपदम्,समूहालम्बनज्ञानेतिव्याप्तिपरिहा-
रार्थं विषयता इति विशेषणम्५ ख्यातेरेव(भ्रमज्ञानस्यैव)अ-
अगतिः-अनवबोधः१उपायाभावः२अनिष्टसंबन्धः। [भावः
अगाधः-इयत्तारहितः१अवगाहितुमशक्यः। अगारं-संग्रहस्थानं
अगुणः-दोषजातम्। अग्निकोणं-पूर्वदक्षिणयोरन्तराला दिक्।
अग्निहोत्रं-आहितेष्वग्निषु सायं प्रातश्चानुष्ठेयो होमः॥६१॥
अग्रं-पुरोदेशः। अग्रसरः-अग्रगामी।अग्राह्यं-प्रत्यक्षग्रहणायोग्यं
अघं-दुष्कर्म१ व्यसनम्२निषिद्धाचरणम्। अघशंसः-दुःखद्योतकः
अघटकत्वं-तद्विषयत्वाव्यापकविषयतावत्त्वं।अघायुः-दुश्चरित्रं
अघृणी-लज्जाहीनः। अङ्कुरः-प्रशाखा१पल्लवः२नवोद्भिदः।
अङ्कविद्या-गणितशास्त्रम्। [तरत्यन्योऽङ्कावतार इति स्मृतः
अङ्कावतारः-अङ्कान्ते सूचितः पात्रस्तदङ्कस्याविभागतः, यत्राव-
अङ्कुशमुद्रा-अंकुशाकारा मुद्रा१ऋज्वीं च मध्यमां कृत्वा तन्म-
ध्यपर्वमूलतः।तर्जनीं किञ्चिदाकुञ्चेत्सा मुद्राङ्कुशसंज्ञिता॥७१॥
अङ्गं-देहादेरेकदेशः१उपकारकम्२प्रधानोपकरणम्३अन्यार्थ-
त्वमङ्गत्वम्४तदीयप्रधानफलाजनकत्वे सति तदीयप्रधानफ-
लजनकव्यापारजनकत्वम्। घटादावतिव्याप्तिवारणाय वि-
अङ्गना-प्रशस्ताङ्गवती स्त्री। [शेषणम्५वेदार्थज्ञानोपयोगित्वं
अङ्गसमर्दनं-गात्रपादादिसंवाहनम्। अङ्गयज्ञः-अङ्गीभूतः यज्ञः
अङ्गसमाधिः-अन्तरान्तरावृत्त्यन्तराभाववती प्रत्ययैकतानता
अङ्गहारः-नृत्तविशेषादङ्गविक्षेपः।अङ्गारः-निर्वाणाग्निकर्मिधनं
अङ्गुलिः-अष्टयवमध्यः। अङ्गुष्ठमात्रः-अङ्गुष्ठपर्वप्रमाणः।
अचलं-दृढम्१कूटस्थम्। अचेतनः-दुर्बलचित्तः१कर्तव्यार्थचेत-
अच्छिन्नः-अविभक्तः१निरवधिः।अजः-अनाविर्भूतः। [नाशून्यः
अजयः-दुर्जयः१जेतुमशक्यः। अजगरवृत्तिः-अजगरवदल्पचेष्टः।

अजरः-जरामरणवर्जितः १ अप्रच्युतस्वभावः। अजर्य-मित्रता
अजहल्लक्षणा-शक्यार्थापरित्यागेन तत्संबन्ध्यर्थान्तरे वृत्तिः,
यथा शोणो धावतीत्यत्र शोणपदस्य शोणगुणविशिष्टेश्वादि-
द्रव्ये। जहल्लक्षणायामतिव्याप्तिवारणाय शक्यार्थापरित्यागे-
नेति १ लक्ष्यतावच्छेदकरूपेण लक्ष्यशक्योभयबोधप्रयोजिका
अजातः-अनुत्पन्नः १ जन्मादिविक्रियाशून्यः। [लक्षणा
अजितेन्द्रियः-अवशीकृतेन्द्रियसमूहः। अजिह्वः-मितसंभाषणः
अज्ञः-ज्ञानहीनः १ आत्मज्ञानशून्यः २ आत्मानं जानातीति ज्ञः,
न ज्ञः अज्ञः ३ श्रुतितात्पर्यानभिज्ञः ४ गुरुमुखानधीतशास्त्रः।
अज्ञातं-अलक्षितम् १ अपरिचितम् २ ज्ञानाभास्यम् ३ प्रमाणज-
अज्ञातसत्ता-ज्ञानप्राक्कालीनविषयसत्ता। [न्यज्ञानाविषयः
अज्ञानं-प्रकाशत्वविरोध्यावरणम् १ कर्तव्याकर्तव्यादिविषयवि-
वेकाभावः * २ कार्यमात्रोपादानत्वे सति सदसद्भ्यामनि-
र्वचनीयम् ३ अनादिभावरूपत्वे सति विज्ञाननिरास्यम्।
उत्तरज्ञाननिवर्त्यपूर्वज्ञानवारणायानादिरूपेति, प्रागभाव-
वारणाय, ज्ञानाभावोऽज्ञानमित्याशङ्कानिरासार्थं वा भाव-
रूपेति, आत्मन्यतिव्याप्तिवारणाय ज्ञाननिरास्यमिति ४
मिथ्यात्वे सति साक्षाज्ज्ञाननिवर्त्यम्। ज्ञानेनेच्छाप्रागभावः
साक्षान्निवर्त्यत इति वदन्तं प्रति सत्यन्तम्, अज्ञाननिवृ-
त्तिद्वारा ज्ञाननिवर्त्यबन्धेऽतिव्याप्तिनिरासाय साक्षादिति ५
अनाद्युपादानत्वे सति मिथ्यात्वम्। ब्रह्मनिरासार्थं मिथ्यात्व-
मिति, मृदादिनिरासार्थमनादीति, अविद्यात्मनोः संबन्ध-

१ सदसद्भ्यामित्युपलक्षणं, सत्त्वेनासत्त्वेन सदसदुभयत्वेन ब्रह्मणो
भिन्नत्वेनाभिन्नत्वेन भिन्नाभिन्नोभयत्वेन सावयवत्वेन निरवयवत्वेन
सावयवनिरवयवोभयत्वेन चेति नवधाऽप्यनिर्वाच्यमित्यर्थः।

निरासार्थमुपादानत्वे सतीति। [तस्यापि वाक्यार्थस्याबोधः
अज्ञाननिग्रहस्थानं-परिषदा विज्ञातस्य प्रतिवादिना त्रिरभिहि-
अञ्जलिः-परमा मुद्रा।अट्टशूलः-अन्नविक्रेता।अट्टालकः-प्राका-
अणिमा-येनाणिम्नैश्वर्येणाणुर्भवति सा [रोपरिभृत्याश्रयः
अणुत्वं-अतिक्षुद्रपरिमाणवत्त्वम् १सूक्ष्मपदार्थत्वे सत्यारम्भकत्वं
अण्डजशरीरं-अण्डाज्जातं शरीरम्,यथा पक्षिपन्नगादिशरीरम्
अतिकर्तुं-यथायोग्यं प्रतीकारं कर्तुम्। अतिडीनं-प्रचण्डगतिः।
अतिक्रमणं-मर्यादोल्लङ्घनम् १उचितादधिकस्यानुष्ठानं वा १५४
अतिचारः-अभक्ष्यभक्षणमगम्यागमनमित्येवमादिः १शीघ्रगमनं
अतिथिः-अज्ञातपूर्वगृहागतव्यक्तिः १ अज्ञातकुलगोत्रो वा मध्या-
ह्नादिसमागतः, अन्नाद्यर्थी मानवो यः सोऽतिथिः परिकीर्तितः।
अतिथिव्रतः-अतिथिपूजनैकनिष्ठः। अतितिक्षुः-त्यक्तुमनिच्छुः
अतिदेशः-एकत्र श्रुतस्यान्यत्र संबन्धः १अन्यधर्मस्यान्यत्रारोपणं
अतिबलः-प्रबलः। [२स्वविषयमुल्लङ्घ्यान्यविषये उपदेशः
अतिदेशसूत्रं-वत्यर्थघटितं सूत्रम् १ साक्षात्स्वावृत्तिधर्मारोप-
अतिद्वेषी-प्रजाद्रोहपरः। अतिभारः-दुर्वहनम्। [ग्राहकं
अतिप्रश्नः-मर्यादातिक्रमेण प्रश्नः १सदुत्तरे जातेपि पुनर्जिज्ञासा
अतिप्रसङ्गः-प्रकृतादन्यत्र प्रसंजनम् १प्रस्तुतविषयादन्यत्र प्रस-
क्तिर्वा २ यस्य बोधो यत्राभिमतस्तदन्यस्यापि बोधप्रसङ्गः
अतिरथः-महायोद्धा १दशसहस्रमहारथैरसाहाय्येन युद्धकर्ता।
अतिवादः-निरर्थकोऽतिप्रलापः १ अत्युक्तिसंस्थापकः शब्दः।
अतिवृष्टिः-अतिमात्रवर्षणम्। अतिवेगितः-अतितीक्ष्णगतिकः।
अतिव्याप्तिः-अलक्ष्ये लक्षणस्य गमनम् १ लक्ष्यवृत्तित्वे सत्य-
लक्ष्यवृत्तित्वम्, यथा गोः शृङ्गित्वं लक्षणं लक्ष्यगोवृत्तित्वे
अतिशक्तिः-बहुकर्मसाधनसामर्थ्यम् [सत्यलक्ष्यमहिष्यादिवृत्ति

अतिशयः-सर्वाधिकः१ बहून्गुणांश्चिन्तयित्वा सामान्यजनसंभवान्,
अतिशयी-उत्कृष्टः। 'विशेष कीर्त्यते यस्तु ज्ञेय सो तिशयो बुधैः
अतिशयतापः-स्वाधिकतरदेवतोत्कर्षदर्शने जायमानस्तापः।
अतिशयोक्तिः-अतिशयेनोक्तिः१असंबन्धे संबन्धकथनं२पौर्वा-
अतिशयोपमा-भिन्नाश्रयत्वेऽप्यधिकमौपम्यम् [पर्यविपर्ययत्वं
अतीतत्वं-चरमवृत्तिध्वंसः१'भूतकाल' वदस्य लक्षणमनुसंधेयं
अतीन्द्रियं-इन्द्रियाग्राह्यम्१लौकिकसाक्षात्कारविषयगुणत्व-
न्यूनवृत्तिसंस्कारत्वान्यधर्मसमवाय्यन्यगुण अतीन्द्रियगुणः।
अत्यन्तनिवृत्तिः-अपुनर्भवः १ कारणसहितकार्यनिवृत्तिः* २
स्वप्रतियोगिजातीयप्रागभावासमानाधिकरणनिवृत्तिः१६२
अत्यन्ताभावः-अनादिरनन्तोऽभावः१प्रतियोग्यसमानाधिकर-
णाभावः,यथा भूतलादौ घटाद्यभावः२त्रैकालिकसंसर्गावच्छि-
न्नप्रतियोगिताकोऽभावः।ध्वंसप्रागभाववारणाय त्रैकालिके-
अत्यानन्दः-महोत्सवः। [ति, भेदवारणाय संसर्गेत्यादि
अत्युक्तिः-अनौचित्येनोक्तिः१न्यायविरुद्धवाक्यं।अत्रपः-निर्लज्जः
अथर्वत्वं-ब्रह्मकर्मोपयोगिमन्त्रसमूहत्वम्। अथवा-पक्षान्तरम्।
अथर्ववेदः-शान्तिकपौष्टिकबहुलो वेदः। अदैन्यं-परिपूर्णकामता
अदत्ता-अविवाहिता कन्या। अदर्शनं-वर्णलोपः१अनुपस्थितम्।
अदीर्घदर्शनं-दूरविचारानभिज्ञः। अदृश्यत्वं-भानाभास्यत्वम्।
अदृष्टं-नदृष्टम्१अतीन्द्रियगुणः२शुभाशुभकर्मजन्यसंस्कारः।
अदेशः-अनुपयुक्तस्थानम्। अदोषः-त्रुटिरहितः१निरपराधः।
अद्भुतः-आश्चर्यकरः१अभूतपूर्वम्२ विस्मयजनकव्यापारः ३
सिद्धस्य धर्मिणो धर्म्यन्तरावयवैर्योगः४ चकिताद्यनुभावितो
अद्यं-भोज्यपदार्थः१वर्तमानदिवसः। [हर्षादिसंचारितः
अद्भुतमाया-रहस्यभेदः। अद्रोहः-विनम्रता१द्रोहाभावः।

अद्वयं-ज्ञातृज्ञेयादिविभागशून्यम्। अधः-पतनजन्यसंयोगाश्रयः
अद्वैतं-भेदविकल्परहितम् १सजातीयविजातीयस्वगतभेदशून्यं
अधनः-स्वोदरपूरणेप्यसमर्थः। अधन्यः-नष्टप्रायः१दैवहतकः।
अधमः-क्षुद्रः१नीचः२दुष्टातिदुष्टः३भयदयालज्जाशून्यः४का-
अधररसः-वक्त्रद्रावः। [मक्रीडाविषये कर्तव्याकर्तव्याविचारक।
अधर्मः-पापकर्म १प्रतिषिद्धक्रियाजन्यम् २निषिद्धकर्मजन्यनर-
कजनकवृत्तिगुणत्वव्याप्यजातिमान्वा ३ वेदबोधितानिष्ट-
साधनताकः। विषभक्षणादिवारणाय वेदेति, ब्रह्मयागादि-
अधिकत्वं-योग्यपरिमाणातिक्रमित्वम्। [वाराणायानिष्टेति
अधिर्कद्धिः-संपन्नः१सौभाग्यशाली। अधःशय्या-भूमिशयनम्।
अधिकनिग्रहस्थानं-अधिकहेत्वादिकथनम् १अन्वितोपयुक्तापु-
अधिकरणी-लोहाभिघाताधारः। [नरुक्तकृतकार्यप्रयोगः
अधिकरणं-साक्षात्परम्परया वा क्रियाश्रयः १ कर्तृकर्मद्वारक-
फलव्यापाराधारः, यथा स्थाल्यामोदनं गृहे पचतीति २
वेदविचारात्मको न्यायः३ विषयो विशयश्चैव पूर्वपक्षस्तथोत्त-
रम्,निर्णय(सङ्गति)श्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्॥२०३
अधिकारः-अधिकं कार्यम् १ उत्तरोत्तर (साकाङ्क्षत्वम् २)
संबन्धः ३ फलभोक्तृत्वे सति कर्मकर्तृत्वम् ४ यथेष्टं क्रय-
विक्रयादिकर्तृत्वसंपादकम्※५ स्वदेशे लक्ष्यसंस्कारोपयोगि-
वाक्यार्थबोधाजनकत्वे सति परदेशे तादृशवाक्यार्थबोधज-
नक इति वै०६ अनेकदेहारम्भकं बलवत्प्रारब्धफलं कर्म।
अधिकारविधिः-कर्मजन्यफलस्वाम्यको विधिः१ कर्मणः फल-
अधिकार्थवचनं-वस्तुधर्माद्भिन्नवचनं [संबन्धबोधको विधिः
अधिकारसूत्रं-पूर्वसूत्रोपात्तपदादेरुत्तरत्र सूत्रेष्वनुवर्तनम्२१३
अधिकारी-तत्तत्कर्म (करणयोग्यः१)जन्यफलार्थी२ग्रन्थप्रति-

पाद्यार्थविषयकज्ञानधारणशक्तः३मुख्यगौणोभयप्रयोजनप्रा-
प्तिकामः४ मलविक्षेपरहितत्वे सति साधनचतुष्टयसंपन्नत्वे
अधिपतिः-स्वामी१शासकः । [सति स्वस्वरूपाज्ञानवत्त्वं
अधिदैवं-इष्टदेवम्१तत्पदार्थमधिकृत्योपाधितयावच्छिद्य स्थितं
अधिवलं-कपटस्य अन्यथाकरणम्। अधिनाथः-सर्वेश्वरः। [मानं
अधिभूतं-इदन्तया दृश्यमानम्१भूतं विषयमात्रमधिकृत्य वर्त-
अधिमांसकः-हनुस्थे पश्चिमे दन्ते महाशोथो महारुजः, लालास्रावी
अधिविन्ना-पतिपरित्यक्ता स्त्री। [कफकृतो विज्ञेयः सोधिमांसकः
अधिष्ठाता-सन्निधानमात्रेण तत्तत्पदार्थानां तत्तत्कर्मसु नियन्ता
अधिष्ठानं-आवासस्थानम्१अध्यस्ताधिकरणम्२स्वबुद्धिबाध्य-
कार्याधारः३सत्तास्फूर्तिप्रदात्रितिग्रं०४सविलासाज्ञानविष-
यः५यदाधारमारोप्यं भासते तत् ६भ्रमोपादानाज्ञानगोचरः
अधिष्ठितः-स्थापितः। अधीनः-वशीभूतः। अधीरः-चलचित्तः।
अधीष्टं-सत्कारपूर्वको व्यापारः। अधृतिः-इन्द्रियार्थेषु चापल्यं
अध्यक्षः-पुरतः१अधिष्ठाता२ व्यवस्थापकः ३ स्थानाधिपतिः।
अध्ययनं-अक्षरमात्रपाठ इति वैदिकाः १ सार्थाक्षरग्रहणमिति
मी०२ श्रुतपदोक्तं पठनम् ३गुरुमुख (तः शास्त्रार्थज्ञानम्४)
अध्यर्धः-स्वार्द्धेन सहितः। [ोच्चारणानुसार्युच्चारणं
अध्यवसायः-इदमेवेति विषयपरिच्छेदो निश्चयः। [जन्यः
अध्यस्तः-समारोपितः१अध्यासविषयः२ दोषसंप्रयोगसंस्कार-
अध्यात्मं-सर्वसंबद्धम्१आत्मानं देहमिन्द्रियादिकं क्षेत्रज्ञं ब्रह्म
अध्यात्ममयः-आत्मैकविचारप्रचुरः। [वाधिकृत्य वर्तमानं
अध्यापकः-वेदाध्यापनकर्ता। अध्यापनं-प्रवचनपदोक्तं पाठनं
अध्यात्मशास्त्रं-आत्मानमधिकृत्य प्रवृत्तं शास्त्रम्। [प्तिद्योतकः
अध्यायः-ग्रन्थसंधिः१ अधीयतेऽस्मिन्निति २ एकार्थविषयसमा-

अध्यारोपः-वस्तुन्यवस्त्वारोपः,यथा शुक्तिकाशकलादौ रजतादेः। वस्तु चिदात्मा,तत्रावस्तुनः प्रपञ्चस्यारोपः २५९

अध्यासः-परत्र परावभासः १अधिष्ठानविषमसत्ताकावभास इति परिमले२एकावच्छेदेन स्वसंसृज्यमाने स्वात्यन्ताभाववत्यवभासः। स्वात्यन्ताभाववत्यवभास एतावन्मात्रोक्तौ यत्र भूतलादौ घटोऽपसारितः पुनश्चानीतस्तादृशघटादावतिप्रसङ्गः स्यादिति स्वसंसृज्यमान इत्युक्तम्, एवमपि मूलावच्छेदेन कपिसंयोगात्यन्ताभाववति वृक्षे शाखाग्रावच्छेदेन च तत्संसृज्यमानेऽवभासमानत्वात्संयोगस्य तत्रातिप्रसङ्गः स्यादित्यत एकावच्छेदेनेति ३परस्परभिन्नत्वे सत्यन्योन्यात्मकः ४पारमार्थिकत्वावच्छिन्नस्वात्यन्ताभावाधिकरणे प्रतीयमान इति तत्त्वविवेके ५स द्विविधो ज्ञानाध्यासोऽर्थाध्यासश्च। यद्वा, स्वरूपाध्यासः संसर्गाध्यासश्चेति द्विविधोध्यासः। तत्राद्यो रज्ज्वादौ भुजङ्गाद्यध्यास आत्मनि वाऽनात्माध्यासो द्वितीयस्तु स्फटिके लौहित्यस्य शङ्खे पीतिम्नोऽनात्मनि चात्मतद्धर्मादेः,आत्मादेः पारमार्थिकत्वेन स्वरूपतोऽध्यासाभावात्। अथवा प्रकारान्तरेण सोपाधिको निरुपाधिकश्चेति भेदादध्यासो द्विविधः। द्विविधोऽप्यसौ बाह्याभ्यन्तरभेदात्पुनर्द्विविधः। तत्र लोहितस्फटिकादिर्बाह्यः सोपाधिको भ्रमः,जपाकुसुमादेरुपाधित्वात्। कर्तृत्वादिर्भ्रम आन्तरः,कर्मरूपेण परिणताऽविद्यारूपोपाधिकार्यत्वात्। शुक्तिरूप्यादिस्तु बाह्यो निरुपाधिको भ्रमः। आकाशादिभ्रमोऽपि बाह्यो निरुपाधिकः।

१ अवभासते इत्यवभास इति व्युत्पत्त्याऽवभासशब्दोऽर्थाध्यासपरः, अवभासतेऽर्थः(=रजतादिः) अनेनेति व्युत्पत्त्या च ज्ञानाध्यासपरः।

अहमज्ञो ब्रह्म न जानामीत्याद्याभ्यान्तरो निरुपाधिको भ्रमः इत्यादीनि बोद्धव्यानि, विस्तरस्तु गुरुमुखादेवावगन्तव्यः।

अध्याशितः-खादनोपरिखादनम्। अध्यासितः-अधिष्ठितः।

अध्याहारः-अगतिका गतिः १अपूर्वोत्प्रेक्षणम् २अश्रुतपदानुसंधानम् ३प्रकृतोपयोगिशब्दकल्पनम् ४अस्पष्टार्थवाक्यस्य शब्दान्तरकल्पनाद्वारा स्पष्टकरणं

अध्यूढा-कृतसापत्निका स्त्री।

अध्येषणं-सत्कारपूर्वकं(आचार्यादेः प्रेरणम् १)क्वचिदर्थे नियोजनं

अध्वगः-पथिकः १दूरस्थः। अनघः-आगन्तुकदोषशून्यः।

अध्वर्युः-यजुर्वेद(वेत्तृत्विक् १)वेतकर्मकर्ता २ कर्मारम्भसमाप्तिकर्ता

अनन्तः-अनवधिकः १देशकालवस्तुपरिच्छेदशून्यः।

अननुभाषणं-विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणं

अनन्यभावत्वं-तदन्याविषयत्वे सति तद्विषयत्वम्।

अनपगः-समीपस्थः। अनभिज्ञः-अपरिचितः। अनर्गलः-अनियन्त्रितः

अनवग्रहः-अप्रतिरोधनीयः। अनवर्तं-आवृत्तिशून्यम्।

अनर्थः-अर्थविघातकः १ सर्वपुरुषार्थहीनः २ समुदायार्थशून्यप्रलापः

अनवच्छिन्नः-निस्सीमः १असंकुचितः २अपरिमितः।

अनवद्यः-निष्कलङ्कः। अनवधारणं-अनिश्चयात्मकं ज्ञानम्।

अनवस्था-अस्थिरता १अप्रामाणिकानन्तप्रवाहमूलकप्रसङ्गः २ उपपाद्योपपादकप्रवाहोऽनवधिः। चक्रकव्यावृत्त्यर्थमनवधिरिति, साकाङ्क्षतापरिहारायोपपाद्योपपादकेति ३ अव्यवस्थितपरम्परारोपाधीनानिष्टप्रसङ्गः ४ पूर्वस्योत्तरोत्तरापेक्षित्वम् ५ सा द्विविधा, अधोधावन्त्यूर्ध्वधावन्ती चेति। तत्राधो धावन्ती यथा घटजनने कपालापेक्षा, कपालजनने कपालिकायास्तज्जनने च तदवयवानामपेक्षा एवं तत्र तत्रेति। ऊर्ध्वं धावन्ती यथा 'भेदः किं भिन्ने धर्मिणि वर्त्ततेऽभिन्ने वा,

आद्येपि केन भेदेन भिन्ने कस्य भेदस्यावस्थितिः ?'इतिप्रश्ने 'द्वितीयभेदभिन्ने धर्मिणि प्रथमस्य तृतीयभेदभिन्ने द्वितीयस्य, चतुर्थभेदभिन्ने तृतीयस्य, एवं तत्र तत्रापि'इत्यङ्गीकारे
अनवस्थितः-परिवर्तितः। अनवेक्षणं-पुनः पुनः पर्यालोचनम्।
अनसूयकः-सर्वत्रादोषदर्शी। अनसूया-ईर्ष्याभावः१ गुणपक्ष-
अनहङ्कृतिः-गर्वाभावः१ देहात्माभिमानराहित्यम्। [पातः
अनागतत्वं-अप्राप्तत्वम् १ भविष्यच्छब्दजन्यप्रतीतिविषयत्वम्
अनात्मभूतलक्षणं-यल्लक्षणं वस्तुस्वरूपाननुप्रविष्टम्, यथा
अनात्मज्ञः-आत्मज्ञानशून्यः। [दण्डो दण्डिन इति जैनाः
अनात्मा-अप्राप्तः प्राप्यते योऽयमत्यन्तं त्यज्यतेथवा, जानीया-
अनाथः-रक्षकान्तररहितः। [त्तमनात्मानं बुद्ध्यन्तं वपुरादिकं
अनादरः-अप्रतिष्ठा १आदरशून्यः२यथाकथञ्चित्प्रवृत्तिरनुत्साहः
अनादिः-सनातनः १ आदिशून्यः २उत्पत्तिरहितः३ सजातीय-
अनाद्यं-कारणशून्यम्। अनापः-दुःशीलः। [प्रयोगपूर्वकः
अनायासः-क्लेशपरिहारः। अनावृतः-स्वपरपुरुषविवेकहीनः।
अनाहतं-शब्दो ब्रह्ममयः शब्दोऽनाहतो यत्र दृश्यते, अनाहताख्यं
अनिकेतः-नियतनिवासशून्यः। [तत्पद्मं मुनिभिः परिकीर्तितं
अनिच्छाप्रारब्धं-अकस्माज्जायमानं कण्टकवेधादि १ इच्छां
विना भुज्यमानम्, यथा रोगादिको दुःखकरः ॥ ३५० ॥
अनित्यत्वं-व्याप्यत्वम् १ कृताकृताप्रसङ्गित्वम् *२ विनाशा-
द्यवस्थावत्त्वम् ३त्रैकालिकनिषेधप्रतियोगित्वम्४ध्वंसप्रति-
योगि (त्वे सति प्रागभावप्र०५)वृत्तित्वविशिष्टसत्तायोगित्वं
अनित्यसमा-अनित्यदृष्टान्तसाधर्म्यात् सर्वानित्यत्वोद्भावनम्।
अनिन्द्यः-निन्दायोग्यनिषिद्धाचरणहीनः।अनिद्रः-अप्रमत्तः१जा-
अनिमिषः-स्थिरदृष्टिः१चक्षुःस्पन्दनशून्यः। [गरुकः

अनिरस्तं-स्थानभ्रंशरहितम्।अनिलदुर्गः-कुलालचक्रवद्भ्रमम्।
अनिर्वचनीयत्वं-अनुच्चार्य्यत्वम् १ सदसद्विलक्षणत्वम्। व-
न्ध्यापुत्रादिवारणायासद्विलक्षणेति,ब्रह्मव्यावृत्त्यर्थं सद्विल-
क्षणेति२सदन्यत्वे सत्यसदन्यत्वे सत्युभयात्मकान्यत्वम् ३स-
त्त्वासत्त्वाभ्यां विचारासहिष्णुत्वे सति सदसत्त्वेन विचारा-
सहिष्णुत्वमित्यद्वैतसिद्धौ ४सत्त्वरहितत्वे सत्यसत्त्वरहितत्वे
सति सदसत्त्वरहितत्वम्५सत्त्वानधिकरणत्वे सत्यसत्त्वान-
धिकरणत्वे सति सदसत्त्वानधिकरणत्वमिति न्यायमकरन्दे।
अनिर्वचनीयख्यातिः-सदसदादिप्रकारैरनिर्वाच्यस्यैवाध्यस्तप-
अनिष्टः-अनर्थः१अनभीष्टः२अप्रियः पुरुषः। [दार्थस्य भानं
अनिष्टप्रसङ्गः-अनभिमतार्थापादनम्। [३५ पदातिकाः
अनीकिनी-२१८७ नागाः २१८७ रथाः ६५६१अश्वाः१०९-
अनीडः-निराश्रयः। [ष्टः४सङ्कल्पातिरिक्तव्यापारशून्यः
अनीहः-हताशः१निष्कामः२इष्टक्रियाशून्यः ३त्यक्तत्रिवर्गचे-
अनीहार्थः-यदृच्छालब्धोऽर्थः। अनुकम्पा-परदुःखहानम्।
अनुकरणं-अनुकारः१सदृशक्रियादिकरणम् २अनुकार्यनिष्ठानु-
पूर्वीमान्वा३स्ववृत्त्यानुपूर्व्यवच्छिन्नविषयताप्रयोजकम् ३६५
अनुकर्षः-रथधूश्चारणदण्डः*१प्रथमसूत्रगृहीतपदानामुत्तरसू-
त्रेन्वयार्थमाकर्षः। [वशवर्ती४कार्यसहकारिकारणं
अनुकूलः-आह्लादकरः१चित्तानुवर्ती२स्वपक्षपाती३तदिच्छा-
अनुकूलतर्कः-यदि पक्षे तत्प्रकारकत्वं न स्यात्तर्हि तत्प्रकारक-
प्रवृत्तिजनकत्वमपि न स्यादिति१यद्वा,यदि चक्षुषस्तेजोमा-
त्रकार्यत्वं न स्यात्किन्तु पञ्चभूतकार्यत्वं स्यात्तर्हि रूपादिषु
पञ्चसु मध्ये रूपस्यैवाभिव्यञ्जकत्वं न स्यात्किन्तु सर्वेवि-
अनुक्रन्दनं-उच्चैराक्रोशनम्। [षयाभिव्यञ्जकत्वं स्यादिति

अनुक्तसिद्धिः-प्रस्तावेनैव शेषोऽर्थः कृत्स्नो यत्र प्रतीयते, वच-
अनुगः-पश्चाद्गामी [नेन विनानुक्तसिद्धिः सा परिकीर्तिता
अनुक्रमः-क्रमानतिक्रमः १ यस्योत्तरं यस्य पाठादिकरणम् ।
अनुक्रोशः-परदुःखेन दुःखित्वम्। अनुक्रमणिका-ग्रन्थादेर्मूलबन्धः
अनुगतः-एकत्वे सत्यनेकवृत्तिः १ सामान्यधर्मग्रहणेन संगृहीतेऽ
अनुगमनं-प्रस्थितस्य हर्षादनुयानम् । [खिले विशेषः
अनुगमः-शब्देसत्यर्थावगमः १ एकस्यानेकत्र संबन्धः २ अनुगत-
प्रवृत्तिनिमित्तम् ३ सामान्यधर्मेण सर्वेषां विशेषरूपाणां संग्रहः
अनुग्रहः-अभीष्टसंपादको व्यापारः १ दुःखिनो दुःखापाकरणे
प्रवृत्तिरिति ग्रं० २ अनिष्टनिवारणपूर्वकेष्टसाधनेच्छा ३७७
अनुचितः-रङ्गस्थलप्रयोगानर्हः । [क्तचनुसंधानं
अनुचिन्तनं-श्रुतार्थ विषयकयुक्तायुक्तत्वादिसंशयनिवर्तकयु-
अनुज्ञा-निषेधाभावव्यञ्जिकेच्छा १ कर्तुरिष्टत्वे सतिवक्तृमतत्वं
अनुद्भूतत्वं-प्रत्यक्षत्वाप्रयोजकत्वम् १ अतीन्द्रियविशेषगुणत्वं
अनुद्वेगः-निर्भयत्वम्। [अर्थप्रसाधकश्चैव विज्ञेयोनुनयो बुधैः
अनुनयः-विनयः १ उभयोः प्रीतिजननो विरुद्धाभिनिवेशिनोः,
अनुनासिकः-मुखनासिकावचनम् १ वर्गाणामन्त्योऽक्षरः ३८७
अनुपलब्धिप्रमाणं-योग्यत्वे सत्यनुपलम्भोऽभावप्रमाकरणम्।
अयोग्यभूतललग्नसलिलानुपलम्भनिरासाय योग्येति, यो-
ग्यस्योपलम्भनिरासायानुपलम्भेति १ ज्ञानकरणाजन्या-
भावानुभवासाधारणकारणम्। अदृष्टादौ साधारणकारणे-
ऽतिव्याप्तिवारणायासाधारणेति, ज्ञानकरणाजन्यघटादि-
भावपदार्थप्रत्यक्षानुभवासाधारणकारणं चक्षुरादावतिव्या-
प्तिवारणायाभावेति, अभावस्मृत्यसाधारणहेतौ संस्कारेऽ-
तिव्याप्तिवारणायानुभवेति, अयं विद्याफलकधर्माभाववा-

न्मूर्खत्वादित्याद्यतीन्द्रियाभावानुभवहेतावनुमानादावति-
अनुपयोगः-निरर्थकता। [व्याप्तिवारणायाजन्यान्तविशेषणं
अनुपलब्धिसमा-मिथ्याहेतुत्वम् १ वादिना अनुपलब्धिसाम-
र्थ्यात् कस्यचित्पदार्थस्यास्वीकारेऽनुपलब्धिसामर्थ्यादेव वा-
दिसंमतस्यापि यत्किञ्चित्पदार्थस्याभावसाधनम्॥३९९॥
अनपलम्भः-उपलम्भाभावः १ प्रतियोगिप्रतीत्यभावो वा।
अनुपसंहारी-अन्वयव्यतिरेकदृष्टान्तरहितः १ अत्यन्ताभावा-
प्रतियोगित्वविशिष्टसाध्यादिकः२ किञ्चिद्विशेष्यकनिश्च-
याविषयसाधकत्वे सति किञ्चिद्विशेष्यकनिश्चयाविषय-
अनुपातकं-वेदनिन्दादिजन्यो दोषः। [माध्याभावकत्वं
अनुपादेयं-स्वकृतिसाध्यत्वविरहः १ यत्प्रसवतं प्रयत्नेन परि-
अनुप्रष्टा-शास्त्रचर्चाकुशलः। [हर्तुं न शक्यते तत्
अनुप्रासः-स्वरवैषम्येपि तुल्यवर्णरचना १ अनुशब्दोऽनुगमा-
र्थकः,प्रशब्दः प्रकृष्टार्थकः,आसशब्दोन्यूनार्थक इति पदार्थः
अनुबन्धः-इत्संज्ञायोग्यः*१ स्वविषयकज्ञानद्वारा शास्त्रे प्रवर्तकः
२ग्रन्थप्रवृत्तिप्रयोजकज्ञानविषयो वा३श्रोतृप्रवृत्त्यर्थं ग्रन्था-
दावनुबध्यमानः४मङ्गलाचरणाव्यवहितोत्तरमेव ग्रन्थादा०
अनुबलं-पश्चाद्भाविनी सेना। अनुब्राह्मणं-ब्राह्मणसदृशो ग्रन्थः।
अनुभवः-परिभोगः १ प्रधानप्रकाशः २ स्मृतिभिन्नं ज्ञानम्।
घटादिवारणाय ज्ञानमिति, स्मृतिवारणाय स्मृतिभिन्नेति।
अनुभावः-रसाभिव्यञ्जकः। अनुभूतिः-प्रत्यक्षादिलब्धज्ञानम्।
अनुभूतः-अनुभवविषयीभूतपदार्थः। [स्यान्यत्र प्रतीतिः
अनुभूयमानारोपः-प्रत्यक्षानुभवविषयारोपः १ अन्यत्रानुभूत-
अनुमतं-साधु कृतमनेनेत्याद्यनुमोदनरूपमानसपरिणामप्रदर्शनं
अनुमानं-रूपानुगमनम् १निर्दोषोपपत्तिः२ व्याप्तिपक्षधर्मतावि-

शिष्टलिङ्गज्ञानम् ३अनुमितिकरणम्। कुठारादावतिव्याप्ति-
वारणायानुमितीति, प्रत्यक्षादावतिव्याप्तिवारणायान्विति ४
स्वजन्यव्यापारवत्तासंबन्धेनानुमितेरसाधारणकारणम् ५
ज्ञातसंबन्धस्यैकदेशदर्शनादेकदेशान्तरेऽसन्निकृष्टार्थे बुद्धिः।
अनुमितिः-व्याप्तिज्ञानकरणकं ज्ञानम् १परामर्शजन्यं ज्ञानम्।
प्रत्यक्षादावतिव्याप्तिवारणाय परामर्शजन्यमिति, परामर्श-
ध्वंसवारणाय ज्ञानमिति २लिङ्गज्ञानजन्यं ज्ञानम् ३व्याप्यज्ञा-
नाद्व्यापकज्ञानं वा ४ साधनधर्मदर्शनात्साध्यधर्मविशिष्टे
बुद्धिः५लिङ्गलिङ्गिपूर्वकं स्वज्ञानद्वारा हेतुपक्षजन्यसाध्यज्ञानं
अनुयानं-पलायमानपरसैन्यानुगमनं। अनुयोगः-युक्तकार्यान्वेषणं
अनुयोगी-यस्मिन्नभावः सादृश्यं वा स तस्य २ विशिष्टप्रती-
तिविषयविशेष्यः ३ अनु पश्चाद् योगः संबन्ध इति पदार्थः।
अनुरागः-पश्चाद्भाविनी प्रीतिः। अनुरोधः-प्रेरणा १ अनुसरणं
अनुवंशं-परम्परागतमाख्यानश्लोकम्। अनुवाक्यं-वैदिकस्तोत्रं
अनुवादः-भाषान्तरीयवाक्यार्थस्य भाषान्तरीयवाक्येन बोध-
नम् ※१ उक्तस्य पुनर्वचनम्, यथा जुहोति जुहोतीत्यादि २
प्रमाणान्त (रेण निर्णीतार्थज्ञापकः शब्दः ३) रावगतार्थ-
बोधकोऽर्थवादः, यथा अग्निर्हिमस्य भेषजमित्यादिः॥४३१॥
अनुवादकं-गृहीतग्रा (हिज्ञानजनकम् १) ह्यनुभवमात्रजनकम्।
अनुवृत्तः-सुशीलः१अनसूयतः२पश्चाद्भावी३भेदाप्रतियोगित्वम्।
अनुवृत्तिः-अनुरोधः१निदर्शनोपन्यासः२पठितस्य पुनः पठनम् ३
आक्षेपेण चलितस्यानुगमनम् ४दवीयस्स्थानान्तरस्थितस्या-
नुसंधानम् ५पूर्ववाक्योपात्तपदादेरुत्तरत्रान्वयार्थमाकर्षणम्।
अनुव्यवसायः-विषयिविषयज्ञानम् १त्रिपुटीगोचरं ज्ञानम्, यथा
घटमहञ्जानामि २ज्ञानविषयकलौकिकमानसप्रत्यक्षविषयः।

अनुषङ्गः-अविनाभावः १ एकत्रान्वितपदस्यान्यत्रान्वयः २ वाक्यान्तरे जनितान्वयबोधपदस्य वाक्यान्तरेऽन्वयार्थाभिसंधानम् ३अन्योद्देशेन प्रवृत्तस्य तन्नान्तरीयकविधयान्यसिद्धिः
अनुष्टप्-अष्टाक्षरपादच्छन्दः १ पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः, षष्ठं गुरु विजानीयाच्छेषास्त्वनियता मताः।
अनुष्ठानं-विहितकर्मादिकरणम्। अनुस्मरणं-पूर्वानुभूतवस्तु-
अनुस्मृतिः-निरन्तरस्मरणम् १पूर्वपरानुसंधानम् [विषयं ज्ञानं
अनूचानः-साङ्गवेदाध्यायी। अनूढः-अनुत्पन्नः १अकृतविवाहः।
अनूपदेशः-जलप्रायो देशः १ कश्चिन्नद्यादेरुपान्तदेशः॥४६०॥
अनूर्मिमत्त्वं-अक्षुत्पिपासादिमत्त्वम्। अनृतं-असत्यवचनम् १मि-
अनृतवादी-अविद्यमानगुणपाठकः। [थ्यावादः परपीडाकरः
अनेकः-न एकः १अपेक्षाबोधविषयः २एकत्वभिन्नसंख्याविशिष्टः
अनेकाग्रः-व्याकुलचित्तः। अनेडः-धूर्तः १निर्बुद्धिः। अन्तकः-नाशकरः
अनैकान्तिकः-व्यतीचारी १ साध्यसंदेहजनकपक्षधर्मताज्ञानविषयः २ साधारणासाधारणानुपसंहार्यन्यतम इति ग्रं० ३ विरुद्धान्यपक्षवृत्तित्वे सत्यनुमितिविरोधिसंबन्धाव्यावृत्तः।
अन्तः-सञ्ज्ञाशून्यः १शेषावधिक इति ग्रं० २ समुदायविशिष्टः
अन्तःकरणं-सर्वज्ञानादिप्रत्यक्षकरणम् * १ शरीरान्तःस्थत्वे सतीन्द्रियसहायकम् २मिलितसमस्तापञ्चीकृतपञ्चमहाभूतसात्त्विकांशकार्यत्वे सति ज्ञानशक्तिप्रधानम्। [दिपरिवर्जनं
अन्तःकरणशुद्धिः-मनसाकामनिवृत्तिः १ परवञ्चनमायानृता-
अंतरं-दूरतः १अवच्छेदः २अपसारितं। अंतरज्ञः-परिणामदर्शी
अन्तःपुरं-अन्तःस्थमन्दिरम्। अन्तर्भूतः-अन्तःस्थः १ अन्तःप्रविष्टः
अन्तरङ्गं-अल्पापेक्षम् १अपरनिमित्तकमिति ग्रं० २अन्तर्भूताङ्गकं
अंतर्धानं-तिरोधानम् १स्वविषयविषयकप्रत्यक्षविरोधिव्यापारः

यथोपाध्यायादन्तर्धते छात्रः। अन्तर्मुखः-बाह्यासक्तिशून्यः।
अन्तर्यामी-सकलजीवनियामकः। [कत्वे सति कार्यद्रव्यत्वं
अन्त्यावयवी-अवयवजन्यत्वे सत्यवयव्यजनकः १ द्रव्यानारम्भ-
अन्त्यः-चरमः१ अन्तिमः२पूर्वस्मिन्सति यस्मात्परोनास्ति सः।
अन्त्यजः-शूद्राद्ब्राह्मण्यां जातः १ रजकश्चर्मकारश्च नटो
वरुड एव च, कैवर्तमेदभिल्लाश्च सप्तैते ह्यन्त्यजाः स्मृताः।
अन्धः-दृष्टिहीनः१नेत्रद्वयशून्यः२श्रुतिस्मृती च विप्राणां चक्षुषी
देवनिर्मिते, काणस्तत्रैकया हीनो द्वाभ्यामन्धः प्रकीर्तितः।
अन्धकूपः-शून्यकूपः १ सान्धकारकूपः २ अन्धकारावृतकूपः।
अन्धभिक्षुः-तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगम्, चतु-
र्युगां भुवं मुक्त्वा परिव्राट् सोऽन्ध उच्यते। [रकः
अन्धकारः-प्रौढप्रकाशकतेजोऽभावः१भयदृष्टितेजोऽवरोधका-
अन्धतामिस्रः-नरकविशेषः१अणिमादिगुणसंपत्तौ दृष्टानुश्रवि-
कविषयप्रत्युपस्थाने च कल्पान्ते सर्वमेतन्नङ्क्ष्यतीति यस्त्रासः
अन्नं-अद्यते इति१ योग्याहारम् २ प्राणिक्षुन्निवर्तकं व्रीह्यादिकं
अन्नमयकोशः-मातृपितृभुक्तान्नजशुक्रशोणितकार्यं स्थूलशरीरं
अन्यतमः-तत्तदवृत्तिशून्यः १ बहूनां मध्ये निर्धारितैकः * २
अनेकभेदावच्छिन्नप्रतियोगिताकभेदवान्,यथा घटो घटपट-
गृहान्यतमो भवति३स्वेतरयावत्प्रतियोगिकभेदवत्त्वमन्यत-
मत्वम्४तद्भिन्नत्वे सति तद्भिन्नत्वे सति तद्भिन्नभिन्नत्वम्।
अन्यतरः-द्वयोर्मध्ये निर्द्धारितैकः १ भेदद्वया (भाववत्त्वम्२)
वच्छिन्नप्रतियोगिताकभेदवान्, यथा घटो घटपटान्यतरो
भवति३तद्भिन्नत्वे सति तद्भिन्नभिन्नत्वम्। [मवेतः
अन्यतरकर्मजसंयोगः-क्रियाभाववत्समवेतत्वे सति क्रियावत्स-
अन्यथा-प्रकृतादन्यप्रकारः।अन्यथाकरणं-प्रकारान्तरेणोपपादनं

अन्यथाख्यातिः-अतात्त्विकान्यथाभावेन वस्त्ववगाहनम् * १ अन्यप्रकारवतोऽन्यप्रकारेण भानम् २ अन्यत्र स्थितस्यान्यत्र प्रतीतिः, यथा कान्ताकरस्थरजतस्य पुरोदेशे प्रतीतिः ३तद-भाववति तत्प्रकारकभानम् । [योज्योपपाद्यासंभवः

अन्यथानुपपत्तिः-स्वाभावप्रयोज्यासंभवः १ उपपादकाभावप्र-

अन्यथासिद्धः-कारणसामग्रीबाह्यः १कार्याव्यवहितपूर्ववृत्तित्वे

अन्योन्यं-क्रियाव्यतिहारविषयः । [सति कार्यानुत्पादकत्वं

अन्यथैवोपपत्तिः-वैपरीत्येनोपपत्तिसाम्यम् १उपपादकत्वेनाभि-

अन्याय्यं-न्यायविरुद्धम् । [मतधर्मं विनाप्युपपाद्यस्योपपत्तिः

अन्योन्याध्यासः-अन्योन्यस्मिन्नन्योन्यतादात्म्यस्याध्यासः ।

अन्योन्याभावः-सादिः सान्तोभावः १अन्योन्यस्मिन्नन्योन्यस्याभावः २वस्तुपरिच्छेदकारणीभूतोभावः ३तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकोभावः । प्रागभावप्रध्वंसाभाववारणाय तादात्म्येति ४अत्यन्ताभावव्यतिरिक्तत्वे सत्यनवधिरभावः ५ प्रतियोगिसमानाधिकरणाभावः, यथा भूतलादौ घटादिभेदः

अन्योन्याश्रयः-स्वापेक्षापेक्षित्वनिबन्धनप्रसङ्गः १ स्वग्रहसापेक्षग्रहसापेक्षग्रहकः, यथा महिषभिन्नत्वं गोत्वं गोभिन्नत्वं च महिषत्वमित्येवं लक्षणे, गोत्वज्ञानाय महिषत्वज्ञानापेक्षा, महिषत्वज्ञानाय च गोत्वज्ञानापेक्षेति २अन्योन्यस्या(श्रयणं ३)व्यवहितान्योन्यापेक्षित्वम्। आत्माश्रयव्यावृत्त्यर्थमन्योन्यस्येति

अन्वयः-परस्परमर्थागमनम् १ यत्सत्त्वे यत्सत्त्वम्, यथा सर्वप्राणिहिंसनशीलित्वे सति पशुत्वाकृतिविशिष्टा काचनव्यक्तिर्यत्र यत्र भवति, तत्र तत्र सिंहपदवाच्यता २ साध-

---

१ स्वग्रहः स्वज्ञानम् , तस्य सापेक्षोऽपेक्षाकारी यो ग्रहस्तस्य सापेक्षोऽपेक्षाकारी ग्रहो ज्ञान यस्य स इति ।

नस्य साध्येन व्याप्तिः ३ स्वसत्तानियतसत्तावत्कार्यसंवन्धः
अन्वयदृष्टान्तः-साध्यव्याप्तं साधनं यत्र प्रदर्श्यते सः ५३५
अन्वयव्यभिचारः-कारणसत्त्वे कार्याभावः १स्वाधिकरणवृत्त्य-
त्यन्ताभावप्रतियोगिकार्यकत्वम् २स्वेतरयावत्कारणाधिकर०
अन्वयव्याप्तिः-हेतुसाध्ययोर्व्याप्तिः १हेतुसमानाधिकरणात्यन्ता-
अन्वर्थः-सार्थकः। [भावाप्रतियोगिसाध्यसामानाधिकरण्यं
अन्वयसहचारः-कारणसत्त्वे कार्यसत्त्वम्। अन्वादिष्ट.-पुनर्नियुक्तः
अन्वादेशः-उक्तस्य पुनर्वचनम्। अन्वीक्षणा-अनुसंधानम्।
अन्वितः-संवन्धप्राप्तः। अपकरणं-दुर्व्यवहारः। अपकर्म-दुष्कर्म।
अपकर्षः-विद्यमानधर्मापचयः १ उचितधर्मापेक्षातो हीनता।
अपकारः-दुःखजनकव्यापारः। अपकारवचनं-भर्त्सनवाक्यम्।
अपकारशब्दः-कुवाच्योक्तिः। अपकारार्थी-विद्वेषकारी।
अपक्षयः-अवयवह्रासः १ शरीरस्य भूयोभिरवयवैर्विश्लेषः।
अपक्षेपणं-अधोदेशसंयोगानुकूलो व्यापारः। [राधकृतः
अपञ्चीकरणं-स्वेतरभूतचतुष्टयामिश्रीकरणम्।अपचारः-अप-
अपथः-मार्गहीनः। अपथगामी-कुमार्गी। अपथ्यः-अहितकरः।
अपध्यानं-अनिष्टचिन्तनम्। [दिनाऽभिमतनिर्देशः
अपदेशः-अन्यदुद्दिश्यान्यार्थमनुष्ठानम् १ हृदयनिहितहस्ता-
अपध्वस्तः-सदसद्विवेकशक्तिशून्यः। अपनयनं-दुरीकरणम्।
अपद्रुतखड्गविद्या-युद्धनैपुण्यविशेषप्रदर्शनायावनतकायेनधावनं
अपन्यस्तमल्लक्रीडा-प्रतियोधिग्रहणवञ्चनार्थं स्ववाह्वोरपक्षेपणं
अपभ्रंशः-अधःपतनम्*१विकृतभाषा २ व्याकरणानिष्पन्नः ३
साधुशब्दस्य शक्तिवैकल्यप्रयुक्तान्यथोच्चारणयुक्तोऽपशब्दः।
अपभयः-विभयः १ नि.शङ्कः। अपमृत्युः-कुसामयिकमृत्युः।
अपरत्व-अपरव्यवहारासाधारणकारणम्। अपयशः-जनापवादः

अपरवैराग्यं-ब्रह्मज्ञानान्यविषयवैतृष्ण्यम् । [शवृत्तित्वं
अपराभवः-कामक्रोधादिभिरनभिभवः। अपरसामान्यं-न्यूनदे-
अपराधः-दण्डयोग्यकर्मकरणम् १स्वोचितकर्माकरणमितिग्रं०
अपरिग्रहः-दुष्प्रतिग्रहाभावः१समाध्यनुष्ठानानुपयुक्तस्य वस्तु-
मात्रस्यासंग्रहः२विषयाणामर्जनरक्षणक्षयसङ्गहिंसारूपदोष-
दर्शनादस्वीकरणम् ३देहयात्रानिर्वाहकातिरिक्तभोगसाधना-
अपरिमितं-इयत्तारहितम् १अपरिच्छिन्नम् । [नामनङ्गीकारः
अपरोक्षज्ञानं-विषयेन्द्रियसन्निकर्षजन्यं ज्ञानम् १विषयचित्ता-
दात्म्यापन्नं प्रमाणचैतन्यम् २ अनधिगताबाधितवर्तमानयो-
अपलापः-अपार्थकप्रलापः। [ग्यविषयचैतन्याभिन्नं प्रमाणच०
अपवादः-विशेषशास्त्रम् १दोषप्रख्यापनम्*२अध्यारोपितस्या-
धिष्ठानमात्रपर्यवशेषणम् ३अधिष्ठाने भ्रान्त्या प्रतीतस्याधिष्ठा-
नव्यतिरेकेणाभावनिश्चयः, यथा शुक्त्यादौ भ्रान्त्या प्रतीतस्य
रजतादेः शुक्तिव्यतिरेकेण नेदं रजतं किन्तु शुक्तिरित्यभाव-
अपवादतर्कः-तस्योत्सर्गस्यैकदेशे बाधः । [निश्चयः
अपवृत्तः-पराङ्मुखीभूतः। अपव्ययः-निरर्थकव्ययः ॥५९९॥
अपशङ्कः-निर्भयः। अपशब्दः-कुवाच्यः१अपशब्दार्थकः शब्दः।
अपष्ठुः-विपरीतः। [तद्विरुद्धसिद्धान्तमतमालम्ब्योत्तरदानं
अपसिद्धान्तनिग्रहस्थानं-एकसिद्धान्तमतमाश्रित्य कथाप्रवृत्तौ
अपस्करः-पश्चाकाष्ठम्। अपस्मारः-भूतावेशः१कर्तव्यविस्मरणं
अपह्नवः-स्नेहः१सत्त्वेन ज्ञातस्यापि वस्तुनोऽसत्त्वेन कथनम् ।
अपादानत्वं-अवधिभूतत्वम् १ परकीयक्रियाजन्यविभागाश्रय-
त्वम् । वृक्षात्पर्णं पततीत्यदौ पर्णादेरपादानत्ववारणाय पर-
कीयेति २ क्रियानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वम् ।
अपानः-नीचैः श्वासो निःश्वासः। अपायः-संयोगनाशकव्यापारः

अपार्थः-प्रत्येकवाक्यानामन्वितार्थत्वेपि यत्समुदायार्थशून्यः ।
अपार्थकनिग्रहस्थानं-परस्परानन्वितार्थकपदसमूहः,यथा शब्दं
अपि-पुनरर्थः । [घटः पटो नित्यमनित्यं च प्रमेयत्वात्
अपावृत्तमल्लविद्या-पार्श्वतो गमनम् । अपासरणं-प्रस्थानम् ।
अपुंस्का-पतिरहिता स्त्री । अपुनरावृत्तिः-पुनरागमनाभावः ।
अपूर्वं-न पूर्वं दृष्टं १वैधनिषिद्धक्रियाजन्ययोः कालान्तरभाविनोः
अपूर्वपतिः-अविवाहिता । [सुखदुःखयोर्हेतुभूतं पुण्यपापं
अपूपः-पिष्टकः१बहुच्छिद्रं स्नेहपक्वं भक्ष्यम् २परोडाशः ६००
अपूर्वता-प्रकरणप्रतिपाद्यस्य मानान्तराविषयता,यथा तन्त्रौ-
पनिषदमित्यद्वितीयवस्तुन उपनिषदतिरिक्तमानाविषयता।
अपूर्वविधिः-प्रमाणान्तरेणात्यन्ताप्राप्तार्थविधायको विधिः,यथा
अपृथक्-एकमयः । [व्रीहान्प्रोक्षतीति व्रीहिप्रोक्षणविधिः
अपेक्षा-प्रयोजकजिज्ञासा १स्वल्पेच्छाविषयः*२विशेष्यविशेष-
णयोरावश्यकसंबन्धः ३ कार्यनिमित्तयोरन्योन्याभिसंबन्धः ।
अपेक्षाबुद्धिः-विनाशकविनाशप्रतियोगिनी बुद्धिः १ अनेकैक-
अपोढः-निरस्तः१त्वरितोच्चारितः । [त्वविषयिणी बुद्धिः
अपोहः-प्रतिकूलतर्केण प्रकृततर्कापनयनम् १शिष्यस्य मिथ्याग्र-
हणापाकरणसामर्थ्यम् २सिद्धान्तप्रतिपक्षनिराकरणसामर्थ्यं
अपौरुषेयत्वं-वाक्यार्थज्ञानापेक्षोच्चारणकमात्रवृत्त्यानुपूर्वीशू-
न्यत्वम् १ सजातीयोच्चारणानपेक्षोच्चारणकवृत्त्यानुपूर्वीर-
हितत्वं वा २स्वानुपजीविप्रमाणजन्यसमानप्रकारविशेष्यको-
च्चारणसापेक्षोच्चारणविषयत्वम् ३पूर्वकल्पीयानुपूर्वीसमा-
नानुपूर्वीघटितत्वमिति वे०४स्वसजातीयोच्चारणसापेक्षोच्चा-
रणसामान्यकत्वम्५संप्रदायाविच्छेदत्वे अविच्छिन्नव्यवहा-
रत्वे वा सत्यस्मर्यमाणत्वम् । अज्ञातकर्तृके जीर्णकूपारामादौ

व्यभिचारवारणाय संप्रदायाविच्छेदत्वे सतीति,भारतादिषु
व्यभिचारपरिहारायास्मर्यमाणकर्तृकत्वमिति मी० ॥६१७
अप्रगल्भः-परिपक्वबुद्धिहीनः। अप्रतिकृतिः-अकृतप्रत्युपकारः
अप्रतिकारः-सिद्धिप्राक्कालपरापतितविनिपातप्रतिक्रियाननुष्ठानं
अप्रतिघं-अभेद्यम् १प्रतिघातशून्यम्। अप्रतिपत्तिः-प्रतिपत्तिमूढता
अप्रतिभः-अप्रगल्भः। [प्युत्तरस्यास्फूर्तिवशात्तूष्णीम्भावः
अप्रतिभानिग्रहस्थानं-उत्तरापरिस्फूर्तिः १उत्तरार्हं परोक्तं बुध्वा-
अप्रमत्तः-कार्यान्तरानासक्तः १अवधानरहितः। [ज्ञानमिति
अप्रमा-प्रमाभिन्नं ज्ञानम्।प्रमावारणाय भिन्नेति,घटादिवारणाय
अप्रमाणः-अपरिमितः। अप्रमादः-भ्रमशून्यः १सावधानता६३१
अप्रमाणतर्कः-अनुग्राहकशून्यस्तर्कः १यस्य तर्कस्यानुग्राहकं प्र-
माणान्तरं नास्ति सः,यथा यदि नित्यः फलारम्भको न स्या-
अप्राप्तः-अज्ञातः। [त्तदा स्वरूपयोग्य एव न स्यादित्यादिः
अप्रमेयः-दुर्मेयः १ अपरिच्छेद्यः२अविषयीभूतः३प्रमातुमशक्यः
अप्रस्तुतप्रशंसा-प्रसङ्गविरुद्धम् १अप्रस्तुत्या प्रस्तुतनिन्दाबोधनं
अप्रामाण्यं-बाधितार्थविषयकज्ञानम् १दोषसहकृतज्ञानसामग्री-
जन्यम् २तदभाववति तत्प्रकारकत्वम्।प्रमायामतिव्याप्तिवा-
अप्रियः-शत्रुः १अरुचिकरः। [रणाय तदभावेति
अप्रियवादः-निष्ठुरवचनम् १प्रतिकूलवाक्यम्।अप्रीतिः-घृणा१
अप्रौढः-अप्र(वृद्धः१)प्तव्यवहारः। [अरुचिः२पराङ्मुखता
अप्लवः-संस्तरणरहितः। अप्लुतः-अदीर्घीकृतः १अविलम्बितः
अफलः-निर्वीर्यः १फलरहितः।अबद्धं-लग्नशून्यम् १निरर्थकवचनं
अबाध्यत्वं-त्रैकालिकनिषेधाप्रतियोगित्वम्। अबलः-अल्पबलः
अबुद्धिः-चरित्रभ्रष्टः।अबुद्धिपूर्वः-सत्यासत्यविवेकशक्तिहीनः
अभयदानं-अनन्तप्राणिगणानुग्रहकरं वसत्यादिदानमिति जै-

ना:१मा भैषीरित्यादिशब्दप्रयोगपूर्वकं भयनिवारणम्६५३
अभयः-भीतिरहितः१नाशभयशून्यः। [नप्रयोजकीभूतमावरणं
अभानापादकावरणं-(कूटस्थो)न भातीत्याकारकाभानापाद-
अभावः-नञ्शब्दोल्लेखिप्रतीतिविषयः, यथा घटो न पटः १
प्रतियो(ग्यारोपितसंसर्गजन्यप्रती०२)गिनिरूपणाधीननिरू-
पणकः३इन्द्रियैरनुपलभ्यमानो नास्ति बुद्धिविषय इति ग्रं०४
संबन्धसादृश्यभिन्नत्वे सति प्रतियोगिज्ञानाधीनज्ञानविषयः।
अभावप्रमा-योग्यानुपलब्धिकरणिका प्रमा, यथा घटाद्यनुपल-
अभिक्षेपगदायुद्धं-अग्रेण ताडनम्[ब्ध्याघटाभावप्रमा भूतले जायते
अभिघातः-प्रहारः१परसैन्यमर्दनम्। अभिद्रोहः-अनिष्टचिन्तनं
अभिचारः-मारणोच्चाटनादिफलकतान्त्रिकप्रयोगविशेषः६६७
अभिज्ञा-इदन्तामात्रावगाहिज्ञानम्१विषयसंबद्धेन्द्रियजन्यं ज्ञा-
अभिद्रवणं-शीघ्रं संमुखगमनम्। [नं,यथायं घटोयं पट इत्यादि
अभिधानं-शब्दार्थनिदर्शनम् १ अन्वयबोधफलकशब्दप्रयोगः।
अभिधानविधिः-लिङ्गादिघटितं वाक्यं।अभिध्या-विषयप्रार्थना
अभिधानानुपपत्तिः-अनुपपद्यमानवाक्यैकदेशश्रवणात्तदुपपाद-
कीभूतार्थान्तरकल्पनम्, यथा द्वारमित्यस्य वाक्यैकदेशस्य
पिधेहीति पदार्थान्तरकल्पनमन्तरानुपपत्त्या तत्कल्पनम्।
अभिधाशक्तिः-शब्दस्यार्थप्रतिपादनशक्तिः१'शक्तिवृत्ति'लक्ष०
अभिधेयः-वाक्यार्थः१अभिधाविषयः २ शास्त्रजप्रमानिवर्त्याज्ञा-
अभिधेयविधिः-कृतिसाध्यत्वे सतीष्टसाधनत्वम्। [नगोचरः
अभिनन्दनं-शतञ्जीवेतिवचनेन सुखोत्पादनम्। अभिनमः-स्तुतिः
अभिनयः-अवस्थानुकरणम्१असाधारणशरीरो व्यापारः२अ-
भिप्रेतशब्दोच्चारणम्३अङ्गुलिनिर्देशेन पदार्थप्रकाशनम्।
अभिनिवेशः-आयुरभावेप्येतैः शरीरेन्द्रियादिभिरनित्यैरपि वि

योगो मे माभूदित्याविद्वदङ्गनावालं स्वाभाविकः सर्वप्राणि-
साधारणो मरणत्रासः१स्वीकृतस्य पुनस्त्यागासहिष्णुत्वम् ।
अभिन्नत्वं-भेदं(शून्यत्वम् १ भावविशिष्टत्वम् २)।नधिकरणत्वं
अभिन्ननिमित्तोपादान-निमित्तञ्च तदुपादानं चेति निमि-
त्तोपादानम् ,अभिन्नञ्च तन्निमित्तोपादानं चेति ॥ ६९२ ॥
अभिन्नभेदनं-सङ्घीभूतस्य परसैन्यस्य विशरणम् ॥ ६९३ ॥
अभिप्रायः-अभिप्रेतोऽर्थः१अभूतपूर्वो यो ह्यर्थः सादृश्यात्परि-
कल्पितः, लोकस्य हृदयग्राही सोऽभिप्राय इति स्मृतः६९५
अभिप्रेतं-वाञ्छितम्१इच्छाविषयीभूतमर्थम् । [रस्करणं
अभिभवः-पराजयः१वलवत्सजातीय(संवन्धकृतमग्रहणम् २)ति-
अभिभूतः-भग्नदर्पः१तिरस्कृतः २ किङ्कर्तव्यमिति ज्ञानशून्यः।
अभिमानः-परावज्ञाहेतुः१आरब्धात्याग इति ग्रं० २श्रेष्ठोऽस्मी-
ति वुद्धिः३मत्सदृशः को वेति वुद्धिः४आत्मन्युत्कर्षत्वारोपः।
अभिमुखं-अनुकूलार्थसंमुखीभवनम्।अभियुक्तः-व्यस्तः१प्रति-
अभिमुखीकरणं-स्ववचनार्थग्रहणे सादरत्वकरणम् । [वादी
अभिरामः-प्रीतिजनकः । अभिरुचिः-उच्चाभिलाषः। [केच्छा
अभिलाषः-इष्टविषयकतृष्णा १प्रीत्याश्रयकर्तृककिञ्चिद्विषय-
अभिवक्ता-अभिप्रायवक्ता।अभिवादकः-विनम्रः१संमानसूचकः
अभिवादनं-नामोच्चारणपूर्वकनमस्कारः १ पादस्पर्शपूर्वकन०
अभिव्यक्तिः-घोषणा१प्रदर्शम्२सूक्ष्मरूपेण स्थितस्य कारणस्य
कार्यरूपेणाविर्भावः३ कार्यस्यास्ति प्रकाशते इति व्यवहारः।
अभिव्यञ्जकः-अस्तिव्यवहारजनकः१पूर्वसिद्धवस्त्ववभासकः
अभिशापः-लोकगर्ह्यता । [यते कान्तं स्वयं वा साभिसारिका
अभिसारिका-हित्वा लज्जां समाकृष्टा मदनेन या,अभिसार-
अभिहितानुपपत्तिः-अनुपपद्यमानसमग्रवाक्यश्रवणात्तदुपपा-

कीभूतार्थान्तरकल्पनम्,यथा तरतिशोकमात्मविदिति प्रमातृत्वादिबन्धस्य शोकोपलक्षितस्य ज्ञाननिवर्त्यत्वश्रवणाच्छोकस्य मिथ्यात्वमन्तरानुपपद्यमानाच्छोकस्य मिथ्यात्वकल्पनम्,यथा वा ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिवा-

अभीप्सा-प्राप्तुमिच्छा। [वयश्रवणाददृष्टस्य प्रकल्पनं

अभीष्टं-सत्कारपूर्वककर्म*१स्वकर्तव्यताप्रयोजकेच्छाविषयः

अभेद्यः-भेत्तुमनर्हः।अभ्यागतं-भिन्नस्थानीयत्वेसतिस्वस्थानागतं

अभ्यासः-पौनःपुन्येन प्रवृत्तिः १ पुनः पुनरनुशीलनम् २ ध्येये वस्तुनि चित्तस्य स्थिरीकरणार्थो यत्नः३प्रकरणप्रतिपाद्यस्य पुनः पुनः प्रतिपादनम् , यथा तत्त्वमसीति नवकृत्वोऽभ्यासः

अभ्युपगमवादः-वादिबलनिरीक्षणार्थमनिष्टस्यापि स्वीकरणं

अमरः-विनाशहीनः१ध्वंसाप्रतियोगिकः। अमरता-अविनश्वरता

अमर्षः-अक्षमा१चिरानुबद्धकोपः२शत्रोरपकारोपायचिन्तनम्

अमर्षी-परोत्कर्षासहिष्णुः। अमितः-असीमः१परिच्छेतुमशक्यः

अमलिनः-निष्कलङ्कः।अमानः-पूजावर्जनम्।अमायः-निष्कपटः

अमानी-स्वदेहसत्कारानभिलाषी १आत्मन्यविद्यमानगुणाभि-

अमी-रोगी१अमृतः२कल्पद्रुमः३भोगलम्पटः। [मानरहितः

अमुक्तः-नित्यसंबद्धः।अमूर्तं-अदृश्यम्१आकारशून्यः।अमेयः-वा-

अमृतं-मृतसंजीवकम्१मरण(वर्जितं२)निवर्तकम् [चामगोचरः

अमोघः-अप्रतिबद्धफलः। अम्बष्ठः-वैश्यायां ब्राह्मणादुत्पन्नः।

अम्बुधिः-समुद्राभिमानी जीवः। अयत्नः-कुण्ठितप्रयत्नः।

अयथार्थानुभवः-दुष्टसामग्रीजन्योऽनुभवः१बाधितार्थविषयकानुभवः,यथा शुक्ताविदं रजतमिति ज्ञानम्।प्रमायामतिव्याप्तिवारणायाद्यविशेषणम्,अयथार्थस्मृतिवारणाय द्वितीयम्।

अयन्त्रितः-मनमुखः१स्वेच्छाचारी।अयशकरी-अपकीर्तिकारी।

अयाचितव्रतः-याच्ञां विनैव स्वयमुपस्थितवस्तुना जीवनः ।
अयुक्तः-अनवहितः१युक्तविरुद्धः। अयि-प्रार्थना१प्रियंवचः।
अयुतसिद्धिः-पृथगाश्रयाश्रितत्वाभावः१असंबद्धयोरविद्यमानत्वं
अयुतावृत्तिः-अन्तरालपदसहितावृत्तिः१अपरपदव्यवधानसहि०
अयोनिजशरीरं-शुक्रशोणितसन्निपातानपेक्षजं शरीरम्।।७६८
अयोगः-उपायाभावः। अयोगवः-वैश्यायांशूद्रादुत्पन्नः। [लता
अरणिः-घर्षणद्वारान्निजनककाष्ठम्। अरतिः-चेष्टाहीनः१व्याकु-
अरण्यः-वनम् १ विविक्तदेशः । अरा-नाभिनेमिसंधानदारु ।
अरत्निः-द्विवितस्तिः १ निष्कनिष्ठो मुष्टिः । अराला-पुंश्चली ।
अरिः-रथाङ्गः१स्वकृतापकारमनपेक्ष्य स्वभावक्रौर्येणापकर्ता।
अरित्रं-नावाकर्षणदण्डः। अरिष्टं-निरुपद्रवम्१बाधारहितम् ।
अरिष्टकं-रिष्टप्रतिघातकम् । अरुचिः-घृणा१अनिच्छा२संतो-
अरोगः-आधिव्याधिरहितः । [षजनकसमाधानाभावः
अर्कः-अर्चनीयः । अर्घ्यं-पूजोपहारम् । अर्जकः-उपार्जनकर्ता ।
अर्थः-कामसाधकः१पुरुषार्थभोगः२प्रधानार्थोपक्षेपः ३ अर्थ्यते
प्रार्थ्यते प्राणिभिरिति वित्तादिः४सुखाधिकदुःखाजनक इति
मी०५एकैकेन्द्रियमात्रग्राह्य विशेषगुणः ६ प्रवृत्तिफलत्वम् ।
अर्थकर्म-आत्मगतापूर्वजनकं कर्म। अर्थध्वनिः-अर्थाश्रितं ध्वननं
अर्थपतिः-प्रधानस्वामी । अर्थना-विषययाचना। [नरभिधानं
अर्थपुनरुक्तं-समानार्थकभिन्नानुपूर्वीकशब्दस्य निष्प्रयोजनं पु-
अर्थवादः-विध्यधीनप्रवृत्त्युत्तम्भकः१विध्यसमभिव्याहृतवाक्यं
वा २ प्राशस्त्यनिन्दान्यतरपरं वाक्यम् ३ प्रकरणप्रतिपाद्य-
स्य प्रशंसनम् ,यथा येनाश्रुतं श्रुतं भवतीत्यद्वितीयवस्तुप्रशंसनम्
अर्थवत्त्वं-शक्तिमत्त्वम् । [कम्पहुङ्कारैर्विशेषणं
अर्थविशेषणं-अर्थस्य विरूपतया प्रतिपन्नस्य पुनः पुनः शिरः-

अर्थव्यवितः-अनेयार्थत्वम् १अव्यवहितान्वयप्रसिद्धार्थपदत्वम्
अर्थव्यसनं-शास्त्रतात्पर्याग्रहणेन समग्रावस्थाशास्त्रार्थासवितः
अर्थशास्त्रं-धनाद्युपार्जनोपायबोधकं शास्त्रं।अर्थागमः-धनागमः
अर्थश्लेषः-असम्भावितस्यार्थस्य युक्तिभिः सिद्धत्वेन कथनम्
अर्थसामानाधिकरण्यं-भिन्नार्थानामेकस्मिन्नर्थेवृत्तिः ॥८०३॥
अर्थाध्यासः-प्रमाणाजन्यज्ञानविषयत्वे सति पूर्वदृष्टसजातीयत्वम् । यथा शुक्तौ रजताध्यास आत्मनि चानात्माध्यासः। स्मर्यमाणगङ्गादौ अभिनवघटे चातिव्याप्तिनिरासाय प्रमाणेत्यादिपदद्वयम् । [रिस्थितिः१अनभिमतार्थसिद्धिः
अर्थाध्याहारः-आकाङ्क्षितार्थानुसंधानम् । अर्थान्तरं-नवप-
अर्थान्तरनिग्रहस्थानं-प्रकृतानुपयुक्ता (न्वितोवितः१)र्थकथनं
अर्थान्तरन्यासः-प्रस्तुतवाक्यार्थस्याप्रस्तुतवाक्यार्थेन समर्थनम्
अर्थापत्तिप्रमा-साध्यज्ञानेन साधककल्पनम् १अन्यथानुपपन्नदर्शनादुपपादके बुद्धिरिति ग्रं० २ अनुपपद्यमानार्थज्ञानात्तदुपपादकीभूतार्थान्तरकल्पनम्, यथा दिवाऽभुञ्जानस्य देवदत्तस्य रात्रिभोजनं विनानुपपद्यमानपीनत्वज्ञानात्तदुपपादकरात्रिभोजनकल्पनम् ३संपाद्यज्ञानप्रभवं संपादकज्ञानम् ४अर्थस्यपदार्थविशेषस्य आपत्तिर्ज्ञानमिति तत्पुरुषसमासेनार्थापत्तिशब्दः प्रमापरः, अर्थस्यापत्तिर्यस्मादिति बहुव्रीहिणा प्रमाणपरः ।
अर्थापत्तिप्रमाणं-संपादकप्रमाकरणम् १उपपादककल्पनाहेतुभू-
अर्थार्थी-धनेच्छुकः १ अपूर्वैश्वर्यकामः । [तोपपाद्यज्ञानं
अर्थापत्तिसमा-अर्थापत्तिं पुरस्कृत्य साध्याभावोद्भावनम् ।
अर्थालङ्कारः-अर्थशोभानिवृत्तिहेतुर्विच्छित्तिः१ अर्थोपकारकद्वारा रसोपकारकः । [पुनरुपस्थितिः
अर्थावृत्तिः-वाक्यान्तर्गतपदप्रतिपाद्यस्य अर्थस्य वाक्यान्तरे

अर्थित्वं-तात्कालिवयपेक्षा। अर्थ्यं-प्रार्थनीयम्। अर्धः-समानांशः
अर्द्धमात्रा-मात्रा(र्धः१)कणः२अर्धपरिमाणं३वर्णस्यास्फुटावस्था
अर्पणं-निवेशनम् १स्वत्वत्यागानुकूलव्यापारः। अर्हितः-पूजितः।
अलघूकृतं-प्रयत्नशैथिल्यहीनकरणम्।अलक्षणं-लक्षणरहितम्।
अलम्-दृढम् । अलङ्कर्ता-निष्पादकः।अलङ्कृतं-सज्जीकरणम्।
अलङ्कारः-अलङ्क्रियतेनेनेति १शब्दार्थयोः शोभाकारकः २का-
व्यत्वाव्यापकत्वे सति शब्दार्थगतसौन्दर्यातिरेकजनकरसा-
अलब्धभूमिकत्वं-समाधिभूमेरलाभः [द्युपकारकशब्दार्थधर्मः
अलसकः-निरुद्योगः१क्रियामन्दः । अलातः-अर्द्धदग्धकाष्ठः ।
अलाभविजयः-अलाभेऽपि लाभवत्संतोष इति जैनाः॥८४७॥
अलीकत्वं-ज्ञानाविषयत्वम् १सर्वदेशकालनिष्ठात्यन्ताभावप्र-
तियोगित्वे सति सत्तादात्म्यशून्यत्वमिति ग्रं० तादृशप्रति-
अलीकी-अरुचिकरः। [योगिताविशिष्टत्वे सत्यप्रतीयमानत्वं
अलोकाकाशः-लोकत्रयाद्बहिः यत्र केवलमाकाशद्रव्यं वर्तते
अलोलुपः-विषयसन्निधानेप्यविक्रियः । [साधनताश्रयान्यः
अलौकिकः-विधिमन्तरा रागादिप्राप्तिभिन्नः१लोकावगतेष्ट-
अल्पं-परिच्छिन्नम् १यस्य वस्तुनः यावती इयत्ता उचिता ततो
अल्पमतिः-दीर्घदर्शनानर्हबुद्धिः।अल्पविद्यः-अशिक्षितः। [न्यूनं
अवकाशः-अवस्थितियोग्यतासंपादकोवसरः।अवकीर्णः-क्षतव्रतः
अवगीतः-भगलिङ्गादिविगीतशब्दः। [त्राधिककालेनोच्चारणं
अवग्रहः-समस्तपदस्यावांतरपदविच्छेदः १स्वाभाविकार्द्धमा-
अवघातः-ताडनमात्रम् १व्रीहिसंस्कारार्थव्यापारः[धोवद्धवस्त्रं
अवछिन्नः-संकुचितः१ तत्तत्पदार्थविशिष्टः । अवचूडं-ध्वजा-
अवच्छेदः-इयत्ताकारकः१ विशेषणोपाधिना विशेषकरणम् ।
अवच्छेदकत्वं-इतरव्यावर्तकत्वम् १ अन्यूनानतिप्रसक्ततत्वम् २

अवच्छेद्याधिकरणत्वमितिग्रं० ३अनतिरिक्तदेशवृत्तित्वम् ४
अवच्छित्त्यन्यूनानतिरिक्तकालीनविशेष्यसंबन्धवत्त्वम् ८६६
अवच्छेद्यः-अवच्छेदकतानिरूपकताकः। अवज्ञा-अपमानम्।
अवतरणत्वं- } वक्तव्यार्थविषयकजिज्ञासोत्थापकत्वम् १ग्रन्थ-
अवतरणिका } प्रस्तावार्थं प्रथममुपोद्घातरूपा सङ्गतिः८७०
अवतारः-देवानामंशावेशवशेन प्रादुर्भावः १ उत्कृष्टावस्था-
त्यागित्वे सति निकृष्टावस्थाग्रहणत्वमवतारत्वम् २ सर्वथाऽ
विलुप्तज्ञानक्रियाशक्तित्वे सति साक्षान्मायिकविलासवत्त्वम्।
अवतारप्रयोजनं-दुष्कृतिविनाशपूर्वकसद्धर्मसंस्थापनं १स्वादृष्टा-
अवदानं-प्रशस्तकर्म [रचितत्वे सति साध्वसाधुसुखदुःखहेतुत्वं
अवधानं-विशुद्धम् १चित्तैकाग्र्यम् २विषयान्तरसंचाराभावः।
अवधारणं-एकाकारावगाहिज्ञानम् १अन्ययोगव्यवच्छेदत्वम्।
अवधिः-अपादानभूतः *१ स्वाभिधेयापेक्षया विभागाश्रयः२
विभागजनकव्यापारानाश्रयत्वे सति विभागाश्रयत्वमवधित्वं
अवधूतः-दिगम्बरः१वस्त्रोपकरणहीनः२केशपाशतरङ्गाणां व्रजं
येन विकुण्ठितम्,सर्वावस्थाविनिर्मुक्तः सोवधूतोऽभिधीयते
अवधूतविद्या-बद्धबाहुमुष्टिप्रहारः।अवनेजनं-अवमार्जनम् [चनं
अवप्लुतखड्गविद्या-प्रहतं पादमुत्थायगमनम्।अवमर्शः-आलो-
अवयवः-उपकरणमात्रम् १समुदायस्यांशरूपः२अवच्छिन्नपरि-
माणवान् ३ द्रव्यारम्भकद्रव्यम् ४ द्रव्यसमवायिकारणम्।
आकाशादिवारणाय द्रव्येति, निमित्तकारणवारणाय सम-
वायीति ५ साधनवत्ताप्रयुक्तसाध्यवत्तानुभावकः ६ तृतीय-
लिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यं
अवयवी-स्पर्शाश्रयः१अवयवजन्यद्रव्यम्। अवरः-हीनः१अप-
अवरोधः-गतिप्रतिरोधहेत्वावरणम्। [कृष्टः२अधमोधमः

अवरशैलः-अस्ताचलः। [वलगितं नाम विज्ञेयं कविभिर्यथा
अवलगितकं-यत्रान्यस्मिन्समावेश्यकार्यमन्यत्प्रकाश्यते,तच्चा-
अवलेपः-भूषणम् १अन्येषामवज्ञा।अवलोककः-अवलोकनार्थी।
अवश्यं-नूनम् १सर्वथा २ अप्राप्त्यभावः ३ अशक्यनिवारणम्।
अवष्टम्भः-प्रारम्भः। अवसरः-प्रस्तावः१अवकाशः। [वतव्यत्वं
अवसरसङ्गतिः-प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्त्यनन्तरव-
अवसानं-स्वाभाविकार्धमात्राकालव्यवायेनवर्णोच्चारणाभावः।
अवस्था-आयुः१कालादिकृतपरिणामान्तरदेहादेर्दशा॥९०८॥
अवस्करः-मलमूत्रविसर्गस्थानम्। अवस्कन्दः-सौप्तिकापहारः।
अवस्थाज्ञानं-विषयचैतन्यावरकमज्ञानम्।अवस्रंसनं-अधःपतनं
अवहरणं-स्थानान्तरितकरणम्। अवहारः-स्वधर्मपरित्यागः।
अवान्तरत्वं-प्रधानान्तःपातित्वम्। अवहित्थं-प्रबुद्धस्य संवरणं
अवान्तरतात्पर्यं-मुख्यतात्पर्यविषयसिद्धावुपायभूतार्थे तात्पर्यं
अवान्तरप्रकरणं-अङ्गभावनासंबन्धिप्रकरणं।अवाच्यं-वचनानर्हं
अवान्तरप्रलयः-सर्वकार्यद्रव्यध्वंसः १ 'नैमित्तिकप्रलय' लक्ष०
अवान्तरवाक्यं-श्रोतृस्वरूपबोधकपदाघटकं वाक्यम् १ महावा
क्यान्तःपातिवाक्यमिति ग्रं० २तत्त्वम्पदार्थान्यतरबोधकं वाक्यं
अवाप्तिः-संयोगविशेषः१स्वाधीनोच्चारणक्षम(=योग्य)त्वम्।
अवास्तवत्वं-अविद्याप्रयुक्तत्वे सत्यविद्यादशायाम्प्रतीयमानत्वं
अविकल्पः-अपरिवर्तनशीलः। अविक्रमः-भीरुः१शक्तिहीनः।
अविगीतत्वं-बलवदनिष्टाननुबन्धित्वम्।अविकत्थनः-श्लाघा-
अविग्रहः-कलहशून्यः १ लौकिकविग्रहहीनः। [शून्यः
अविचारितनिर्णयः-पक्षपातपूर्णसंमतिः।अविच्छेदः-संततत्यागः
अविज्ञातार्थनिग्रहस्थानं-परिषत्प्रतिवाद्यबोधप्रयोजकपदप्रयोगः
अविज्ञातः-दुर्लक्ष्यः।अविज्ञाता-ज्ञानहीनः।अविद्यः-अशिक्षितः

अविद्या-विद्याभावः१विपरीतज्ञानमिति जैनाः२स्वाश्रयव्या-
मोहकरी ३ रजस्तमोऽभिभूतमलिनसत्त्वप्रधाना ४ असत्प्र-
अविद्यावृत्तिः-साक्षादविद्योपादाना वृत्तिः। [काशनशक्तिः
अविनाभावः-व्याप्यनिष्ठव्यापकनिरूपितधर्मः।अविनीतता-नि-
अविभक्तः-विभागरहितः। अविरतः-विरामशून्यः। [र्लज्जता
अविरोधः-सुसङ्गतिः१अनुकूलता। अविविक्तः-विवेचनाशून्यः
अविवेकः-अज्ञानता १ कर्तव्याकर्तव्यादिविषयविचाराभावः।
अविवेकिता-सदसद्विवेकराहित्यम्। अवृष्टिः-वृष्ट्यभावः।
अविशेषसमा-भेदकधर्माभावः १ सर्वाविशेषप्रसङ्गोद्भावनम्।
अविश्वासः-प्रत्ययाभावः १ विश्वसनीयेऽपि विश्वासाकरणम्।
अवीतानुमानं-निषेधमुखेन प्रवर्तमानं सन्निषेधकम्। [गोचरं
अवेक्षार्थं-इष्टसिद्ध्यर्थम्। अव्यक्तं-गूढाभिप्रायम्१ चक्षुराद्य-
अव्यभिचरितं-साधनसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं
अव्यभिचारी-केनापि प्रतिकूलहेतुना निवारयितुमशक्यः १
साध्यवदन्यावृत्तित्वं२ स्वलक्ष्यार्थाधिकार्थावृत्तित्वम०रित्वं
अव्ययः-आद्यन्तरहितः१सर्वविकारशून्यः२न विद्यते व्ययो वि-
नाशो धर्मतः स्वरूपतोवयवतो यस्य सः५सदृशं त्रिषु लिङ्गेषु
सर्वासु च विभक्तिषु,वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्
अव्ययीभावसमासः-नियमतः पूर्वपदार्थविशेष्यकबोधजनकः
अव्यवहितः-साक्षात्संबन्धः१अन्तरायरहितः२ व्यवधानाभाव-
अव्यवहितलाटानुप्रासः-अनावृत्तशब्दानंतरितानुप्रासः [वान्
अव्यापकत्वं-साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वम्॥९५१॥
अव्याप्तिः-लक्ष्यैकदेशे लक्षणस्यागमनम् १ लक्ष्यैकदेशावृत्ति-
त्वम्,यथा गोः कपिलत्वं लक्षणं श्वेतगवादौ लक्ष्यैकदेशेऽवृ-
त्तिः२लक्ष्यतावच्छेकसमानाधिकरणात्यन्ताभावप्रतियोगित्वं

अव्याप्यत्वं-व्याप्तिशून्यत्वम् १व्याप्याभाववद्वृत्तित्वं वा ९६६
अव्यवस्था-असिद्धान्तः। [करणनिष्ठात्यन्ताभावप्रतियोगित्वं
अव्याप्यवृत्तित्वं-स्वात्यन्ताभावसमानाधिकरणत्वम् १स्वाधि-
अव्युत्पन्नः-अकुशलः१अनभिज्ञः२ सिद्धिशून्यः*३पदज्ञानरहितः
अशक्तः-असमर्थः१शक्तिहीनः। अशक्यं-असाध्यम् १असंभवम्।
अशठं-कुटिलपुरुषहीनम्। अशङ्की-शङ्काशून्यः। अशनं-भोजनं
अशरीरः-स्थूलसूक्ष्मकारणशरीरैर्विरहितः। अशितः-भक्षितः
अशस्त्रवधः-आज्ञाभङ्गो नरेन्द्राणां विप्राणां मानखण्डनम्,पृथ-
अशिश्वी-शिशुहीना स्त्री [क्शय्या च नारीणामशस्त्रवध उच्यते
अशुचिः-शौचशून्यः१वैदिककर्मानर्हत्वप्रयोजको धर्मविशेषः।
अशुद्धः-निषिद्धानुष्ठाता *१ व्याकरणादिलक्षणाननुसारी।
अशुद्धिः-कर्तृद्रव्यादेःस्पर्शनाद्यनर्हतापादको दोषविशेषः९८३
अशुभवासना-निषिद्धनिषिद्धसमविद्याकर्मतत्संस्कारतत्फलसं-
स्काररूपा। निषिद्धा विद्या स्त्रीचिन्तनादिरूपा,निषिद्धसमा
यदृच्छया काकविडालाद्यवेक्षणात्मिका,निषिद्धं कर्म पलाण्डु-
भक्षणादि,निषिद्धसमं तृणच्छेदनादि,एतेषां चतुर्णां संस्का-
रास्तथैतेषां ततोपि पूर्वजन्मकृतानां यानि जन्मान्तरे फलानि
नरकाद्याप्तिरूपाणि तेषां च संस्कारा इत्यशुभवासनोदाहर-
अशेषः-शेषहीनः१विधेयशून्यावृत्त्युद्देश्यतावच्छेदकः। [णानि
अशौचं-शरीरमनसोर्मालिन्यं१विहितकर्मानधिकारित्वसंपादकं
अश्रद्धा-गुरुशास्त्रोपदिष्टेऽर्थे इदमेवं न भवत्येवेति विपर्ययबुद्धिः
अश्लीलं-व्रीडादिजनकः१असभ्यस्मृतिहेतुः। अश्रुः-नेत्रोदकम्।
अश्रुतः-अनाकर्णितः१शास्त्रार्थतात्पर्यविधारणरहितः॥९९३॥
असक्तः-परस्परमलग्नः१फलाभिलाषशून्यः। असंगृह्यत्वं-अनुपसं
असत्कार्यवादः-कार्यस्यासत्त्वनिर्णायकः कथाविशेषः। [ह्यत्वं-

असत्ख्यातिः-असतः(शून्यस्य) एवाध्यस्तपदार्थाकारेण भानम् ।
असत्त्वं-मानायोग्यत्वम् १कार्यानारम्भकत्वं वा२ स्वतःसत्ताही-
नत्वम् ३सत्तास्फूर्तिशून्यत्वमिति ग्रं० ४सर्वदेशकालसंबन्धिनि-
षेधप्रतियोगित्वम् ५क्वचिदप्यधिकरणे सत्त्वेनाप्रतीयमानत्व-
मित्यद्वैतदीपिकायाम् ६सद्वैलक्षण्ये सत्यपरोक्षप्रतीतिविषयत्वं
असत्त्वापादकावरणं-नास्तीत्यसत्त्वापादनप्रयोजकीभूतमावरणं
असङ्गतिः-सङ्गतिविरहः १ औचितीशून्या । [वत्त्वं
असत्यत्वं-प्रागभावप्रतियोगित्वम् १ वस्तुस्वभावविरोधिधर्म-
असदुत्तरं-स्वव्याघातकमुत्तरम् । असद्ग्रहः-दुष्टाग्रहः१अस-
असद्विग्रहः-निष्फलविरोधः । [मीचीनोऽभिनिवेशः
असभ्यः-सभायामनुपयुक्तः १ग्रामीणहालिकादिजनप्रयोज्यःशब्दः
असमवायिकारणं-कार्यकारणभावसंबन्ध्येकार्यसमवेतं कारणं
असंबद्धं-अनाढ्यम् १ संबन्धाभावः २ परस्परानन्वितवाक्यम् ।
असंबन्धः-प्रतियोगितानुयोगितान्यतरसंबन्धेन समवायाभावः
असंभवः-अनुपपन्नः*१लक्ष्यमात्रा (वर्तनम्२) वृत्तित्वम्, यथा
गोरेकशफवत्त्वलक्षणं लक्ष्यगोमात्रावृत्ति, गोर्द्विशफवत्त्वात् ३
लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वम् [यरहितः
असंभावना-बलवन्निषेधकोटिकः संशयः । असंशयः-बाधकसंश-
असहायत्वं-एकजातीयक्रियाकरणेऽन्यसहायरहितत्वम् १०२४
असाधारणकारणत्वं-कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यतानि-
रूपितकारणताशालित्वम् १कार्यतावच्छेदकावच्छिन्नकार्यानु-
असाध्यः-दुर्दमः । [त्पादकत्वे सति कार्यविशेषोत्पादकत्वं
असाधारणधर्मः-तद्वृत्तित्वे सति तदितरावृत्तित्वम् १लक्ष्यताव-
च्छेदक(समनियतत्वम्२)व्यापकत्वे सति लक्ष्यतावच्छेदकव्या-
प्यत्वम्। अव्याप्त्यसंभवग्रस्तयोर्वारणाय सत्यन्तम्,अतिव्याप्त-

स्य वारणाय विशेष्यम्।असारः-निःसारः१तुच्छता२तत्त्वशून्यः
असाधारणानैकांतिकः-पक्षमात्रवृत्तिः१साध्यासमानाधिकरणः
असाधुः-असच्चरित्रः१महाजनपरिगृहीतव्याकरणस्मृतिनिषिद्धः
असिक्नी-अन्तःपुरचारिणी दासी । असीमा-निरवधिः ।
असिद्धिः-पाकाभावः१अनिष्पत्तिः२धर्मज्ञानवैराग्यादेरलाभः।
असिधाराव्रतं-खड्गधा(राताण्डवम् १)रेव तीक्ष्णतरो नियमः।
असुतृपः-प्राणपोषकः। असुरभिगन्धः-प्रतिकूलवेदनीयो गन्धः।
असुरः-देवारिः१पूर्वदेवः२सुरापरिग्रहरहितः ३मायया असन-
असूयकः-परगुणदोषारोपकः। अस्तं-अन्तर्धानम् । [शीलः
असूया-गुणेषु दोषाविष्करणम् १परकीयगुणेषु दोषारोपो वा-
असंसक्तिज्ञानभूमिका-सविकल्पकसमाध्यभ्यासेन निरुद्धे मन-
अस्त्रयुद्धं-बाणयुद्धम् । [सि निर्विकल्पकसमाध्यवस्था
अस्त्रं-आयुधम्१रिपुकर्तृकप्रहारसाधनम्२मन्त्राभिमन्त्रितत्वं
अस्ति-सत्ताश्रयः१जातस्यकार्यस्य क्षणमवस्थानं२कालसंबन्धी
अस्तेयं-परस्वग्रहणाभावः१अदत्तदानरूपपरस्वहरणराहित्यम्
अस्पष्टब्रह्मलिङ्गकत्वं-संभाव्यमानस्वारस्यजीवलिङ्गाभिभू-
तब्रह्मलिङ्गकत्वं, यथा सर्वत्र प्रसिद्धाधिकरणे जीवे विषये
स्वरसानि मनोमयत्वादीनि सत्यकामत्वादिब्रह्मलिङ्गान्य-
अस्पष्टं-संदिग्धः। अस्वकः-अनाप्तः। [भिभवन्तीति
अस्वसंज्ञः-संज्ञाहीनः। अस्वस्थः-व्याधितः।अस्वैरी-पराधीनः
अस्मिता-सामान्याहङ्कारः१अहङ्कार(स्य सूक्ष्मावस्था२)धर्म्य-
अहं-व्यष्टिसमष्ट्यहङ्कारः। [ध्यासः३बुद्ध्यादावभेदाभिमानः
अहः-संपूर्णादित्यमण्डलदर्शनयोग्यः कालः। अहरहः-प्रतिदिनं
अहङ्कारः-परेषां तुच्छीकरणम्१अनादिसंपत्तिहेतुको दर्पः२अह
मुत्कृष्टइत्याकारकसंस्कारः३अभिमानात्मिकान्तःकरणवृत्तिः

अहङ्कारी-दुर्मदजनः । अहमहमिका-अन्योन्यात्मस्तुतिः ।
अहङ्ग्रहोपासनं-उपास्यस्वरूपस्य स्वाभेदेन चिन्तनम्॥१०६७
अहिंसा-वाङ्मनःकायैःसर्वभूतानामनभिद्रोहः१प्राणवियोगप्रयो
जकव्यापारराहित्यमिति ग्रं० २अशास्त्रीयप्राणिपीडनाभावः
अहिंस्रः-अहिंसाशीलः। अहितः-वैरी१अनर्थसूचकः१परिणाम-
अहितेच्छा-अपचिकीर्षा। अहेतुकत्वं-युक्तिशून्यत्वम्। [विरुद्धः
अहेतुसमा-कालत्रयेऽपि साधनत्वाऽसंभवेन असाधनकत्वकथनं
आकरः-जन्मस्थानं१सुवर्णरजतरत्नाद्युत्पत्तिस्थानम्॥ आ
आकर्षः-गतिहेतुविकर्षः१धान्यादिकर्षकः पञ्चाङ्गुलः काष्ठवि-
आकर्षिकः-अयस्कान्तः। आकल्पः-आभूषणम् । [शेषः
आकर्षक्रीडा-दूरस्थान्यपि क्रीडाद्रव्याणि यत्राकृष्यन्ते स क्री-
आकस्मिकः-कारणं विना,अकस्माद्वोद्भवः। [डाविशेषः
आकाङ्क्षा-दीर्घाभिलाषः१रमणीयवस्तुस्पृहा*२वाक्यसमय-
ग्राहिका३अन्वयानुपपत्तिः४येन पदेन विना यस्य पदस्यान्व-
यबोधाजनकत्वं तेन तस्य समभिव्याहारः,यथा द्वारमित्य-
नेन पिधेहीत्यादेः५तादृशशाब्दबोधे तादृशशाब्दबोधाभावः६
अन्वयबोधसमर्थत्वे सत्यजनिततात्पर्यविषयान्वयबोधकत्वं
आकारः-निकाशः१संस्थानम् २रतिरागादिबोधको मुखरक्त-
आकारमौनं-अवचनमात्रमौनम्। [तादिरूपोऽवस्थाविशेषः
आकाशं-आवरण(विरोध्यवकाशः१)।भावाधिकरणम् २ शब्द
(समवायिकारणम् ३)गुणकम्।असंभववारणाय शब्दगुणोभ-
यम् ४संयोगाजन्यजन्यविशेषगुणसमानाधिकरणविशेषाधि-
आकाशमदः-वाहनभरितस्य गजाश्वादीच्छाहेतुर्मदः। [करणं
आकीर्णं-जनसंकुलस्थानम्।आकुलः-चञ्चलचित्तः। [ताकर्षणं
आकृतिः-अवयवसं(निवेशविशेषः१)स्थानविशेषः।आकृष्टं-कृ-

आक्रन्दः-प्रोत्साहकः१ शोकसमुत्थमुक्तधैर्यमाक्रेडितमयमव-
आक्रीडं-क्रीडाभूमिः१लीलोद्यानम्। [नीपातपूर्वकमाक्रन्दनं
आक्रोशः-अभिशापः१विरुद्धानुध्यानम् २क्रोधाकर्तव्यनिश्चयः।
आक्रुष्टं-परुषवाक्१ कृताक्रोशः । आक्रोष्टा-आक्रोशकर्ता ।
आक्षिप्तिका-चञ्चत्पुटादितालेन मार्गत्रयविभूषिता, आक्षिप्ति-
आखेटकं-मृगयाविनोदः। [का सारपदग्रथिता कथिता बुधैः
आक्षेपः-इष्टनिषेधः१वीजयोजनम्*२प्रतिषेधपुरःसरोक्तिः३
स्वयमुक्तस्यार्थस्य किञ्चिन्निमित्तमभिसंधाय प्रतिषेधः४स-
आखनः-खनन(साधनम्१)योग्यः। [मानवित्तिवेद्यत्वं
आख्यातं-क्रियाप्रधानम्१सुब्भिन्नत्वे सति संख्याबोधकप्रत्ययः
आख्यानं-पुरातनकथा१पूर्ववृत्तकथनं वा २ स्वयं दृष्टार्थबोधनं
आख्यानकं-कथानकम्। आख्यायकः-परोक्तस्यान्यत्र कथकः।
आख्यायिका-कथाविशेषः १ गद्यपद्यात्मकरचना२उपलब्धा-
आगतः-आगमनम्१समुपस्थितः२समीपस्थितः। [र्थबोधिका
आगमः-आगमयतीति१निर्दोषः शब्दः२विधिनिषेधशास्त्रम्३
शाब्दप्रमाकरणम्४संदिग्धार्थसिद्धिहेतुः५समयबलेन सम्य-
क्परोक्षानुभवसाधनमिति जैनाः६ अवयवत्वावच्छिन्नविधे-
यताश्रयः ७ आगतं शिववक्त्रेभ्यो गतं च गिरिजाश्रुतौ,मतं च
आगन्तुः-आगमनशीलः। [वासुदेवस्य तस्मादागममुच्यते
आगमनं-प्रयोक्तृसन्निकृष्टप्रदेशानुयोगिकसंयोगानुकूलव्या-
आगामिकर्म-इह जन्मनि(वर्तमाने)क्रियमाणं कर्म। [पारः
आग्रहः-दुष्टादुष्टविषयकोभिनिवेशः।आङ्गारिकः-इङ्गालकर्ता।
आचारः-समयानुकूलव्यापारः१धर्माविरुद्धशारीरिकव्यापारः
आचार्यः-मतप्रस्थापकः १ मन्त्रव्याख्याकर्ता २ नानाविधानि
कार्याणि कर्ता कारयिता च यः,सर्वधर्मविधिज्ञश्च स आचार्य

इत्युच्यते ३ आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि, स्वयमप्याचरेद्यस्तु स आचार्य इति स्मृतः ४ स त्रिविधः- चोदको दर्शयेन्मार्गं बोधकः स्थानमाचरेत्, मोक्षदस्तु परं

आच्छिन्नं-बलाद्ग्रहणम्। [तत्त्वं यज्ज्ञात्वा परमश्नुते

आजीविका-जीवननिर्वाहः [नुमतत्वे सति कर्तुरनिष्टहेतुत्वं

आज्ञा-निकृष्टस्य भृत्यादेः कृत्यादौ प्रवृत्त्यर्थव्यापारः१वक्त्र-

आज्ञाकारी-उपस्थाता१ परिचारकः२आज्ञानुसरेण कर्मकर्ता

आज्ञाभङ्गः-आदेशान्यथाकरणम् १स्वविषयेषु प्रचाराभावः।

आडम्बरः-औद्धात्यम्१परवञ्चनार्थकृत्रिमबहुविधचेष्टितः।

आडम्बरी-अभिमानी। आढकं-द्रोणचतुर्थभागः१प्रस्थचतु-

ष्टयम्२चतुर्विंशत्यधिकसहस्रमुष्टिपरिमाणम्३त्रिंशयोज-

नविस्तीर्णं शतयोजनमायतम्,विंशयोजनगम्भीरमाढकं प-

आततायी-वधोद्यतः१महापापी२द्रोहकारी। [रिकीर्तितं

आतपः-दिनप्रभा१रविप्रकाशः२संतापदायकः३पीडाहेतुकः।

आतिदेशिकीसङ्गतिः-अधिकाशङ्कानिराकरणार्थं पूर्वन्याया-

आतुरः-कार्याक्षमः१अनवस्थितः२व्याधिग्रस्तः। [तिदेशः

आत्मख्यातिः-विज्ञानात्मन एवाध्यस्तपदार्थाकारेण भानम्।

आत्मगुप्तः-स्वशक्त्यैव रक्षितः। आत्मम्भरिः-स्वोदरपूरकः।

आत्मग्राही-स्वार्थी। [धेनैव मार्गेण आत्मघाती स उच्यते

आत्मघाती-व्यापादयेद्वृथात्मानं स्वयं योग्न्युदकादिभिः, अवै-

आत्मज्ञानं-तत्त्वसंवन्धिज्ञानम्१इदं सर्वं द्वैतजातमद्वितीये चि-

दानन्दात्मनि मायया कल्पितत्वान्मृषैव आत्मैवैकः परमार्थ-

आत्मनीनः-स्वहितकारी [सत्यः सच्चिदानन्दाद्वयोहमिति ज्ञानं

आत्मनिवेदनं-स्वीयसमाचारः१सपरिकरात्मसमर्पणम्११६७

आत्ममदः-अहङ्कारभरितस्य विद्यादिभिर्मम समः को वेतिप्र-

ज्ञाहेतुर्मदः । आत्मरतिः-अनन्यनिष्ठः १ आत्मैकप्रियः ।
आत्मरामः-आत्मनि रतिमान् १ योगेनात्मन्येव रममाणः ।
आत्मश्लाघः-आत्मगर्वः १अहमेव ज्ञाता शूरश्चास्मीति बुद्धिः ।
आत्मा-स्वरूपम् १चैतन्याश्रय इतिवैष्णवाः २ज्ञानाधिकरणम् ३
अमूर्तसमवेतद्रव्यत्वापरजातिमानितिनै० ४ सर्वदेहेषु पूर्णः ५
अहम्प्रत्ययविषयः ६ मुख्यप्रीत्याश्रय इति ग्रं० ७स्वयंप्रतीति-
विषयः ८ परमप्रेमास्पदमिति वे० ९ यच्चाप्नोति यदादत्ते
यच्चात्तिविषयानिह,यच्चास्य संततो भावस्तस्मादात्मेति कथ्यते
आत्माश्रयः-स्वग्रहसापेक्षग्रहकः १स्वापेक्षापादकप्रसङ्गः, यथा
ज्वरोपसर्गयुक्ते रोगो ज्वर इत्युक्तौ ज्वराज्ञानवन्तमुद्दिश्य
ज्वरे लक्षणीये ज्वरज्ञानापेक्षायां तदभावात्कथं ज्वरोप-
सर्गज्ञानं संभविष्यति २इतराव्यवधानेन स्वजनने कारणत्वेन
आत्मीयः-स्वकीयः [स्वापेक्षणम् ३स्वस्याव्यवहितस्वापेक्षित्वं
आत्यन्तिकदुःखनिवृत्तिः-सर्वाधिका १स्वाधिकरणदुःखप्रागभा-
वासमानाधिकरणा दुःखनिवृत्तिः २ यादृश्या दुःखनिवृत्तेरु-
त्तरं पुनर्दुःखान्तरं नोत्पद्यते तादृशी दुःखनिवृत्तिरिति ग्रं० ।
आत्यन्तिकप्रलयः-ब्रह्मसाक्षात्कारनिमित्तकः सर्वमोक्षः १अज्ञा-
आत्रेयी-ऋतुमती स्त्री । [नसहितसकलभावकार्योच्छेदः
आदरः-गौरवहेतुका संमानना १ सत्कारबोधको व्यापारः ।
आदानं-धनादेः स्वीकारः १बीजकार्योपगमनम् । [शिष्टः
आदिः-प्राक्सत्ता १उत्पत्तिहेतुः २सर्वस्मात्प्रथमः * ३समुदायवि-
आदेशः-स्थान्यर्थाभिधानसमर्थः । आदेष्टा-शासनकर्ता ।
आधारः-अधिकरणम् १पतनप्रतिबन्धकः * २शबले संसृष्टत-
याध्यस्तोऽधिष्ठानांशः ३ अध्यस्तेन सहाभिन्नप्रतीतिविषयः
आधिः-प्रत्याशा १बन्धकम् २ मानसीपीडा। आधिज्ञः-पीडितः।

आधिदैविकतापः-दुःखविशेषः १देवान् यक्षरक्षआदीन् दिवःप्र-
भवान् वातवर्षातपशीतोष्णादीन् वाधिकृत्य जायमानस्तापः
आधिभौतिकदुःखं-भूतानि जरायुजाण्डजस्वेदजोद्भिज्जरूपा-
णि चौरवैरिकुक्कुरसिंहव्याघ्रमहिषपक्षिसर्पयूकादंशमशक-
वृश्चिकनक्रमकरवृक्षशिलाप्रभृतीनि चराचरजातीयानि अधि-
आधुनिकः-इदानीन्तनः [कृत्य निमित्तीकृत्य जायमानं दुःखं
आध्यात्मिकतापः-शरीरमनसी अधिकृत्य जायमानस्तापः ।
आध्यानं-उत्कण्ठापूर्वकं स्मरणम् । आनतः-कृतप्रणामः ।
आनन्दः-दुःखाभावः १इष्टार्थसिद्धिः २तिरोहितस्येष्टार्थस्य पुनः
प्राप्तिरिति ग्रं० ३ सात्त्विकैकाग्रबुद्धिप्रतिबिम्बितः सुखरूप
आत्मा ४निरुक्तात्मप्रतिबिम्बिता वृत्तिर्वा ५निरुपाधिकेष्टत्वं
आनन्दमयकोशः-सुखाकारवृत्तिमदन्तःकरणमज्ञानपर्यन्तम् १
आनंदप्रच(रः कोशः २)रत्वे सति कोशवत्प्रत्यक्चेतनाच्छादकः
आनुपूर्वी-परिपाटी १पूर्वस्य योग्यमनुपूर्वमनुपूर्वम् २ तदुत्तर-
त्वविशिष्टतदुत्तरत्वादिरिति ग्रं० ३वर्णानां पूर्वापरीभावः ४
तदुच्चारणानन्तरोच्चारणविषयत्वम् । [यकतया प्राप्तं
आनुषङ्गिकं-संयुक्तम् १उद्देश्यान्तरप्रवृत्तस्य तत्कर्मनान्तरी-
आंतरदृश्यानुविद्धसमाधिः-आन्तरदृश्यमिश्रः(आंतराणां क्रो-
धादीनां द्रष्टा तेष्वनुस्यूतोहमिति)समाधिः [दिशब्दव्यामिश्रः
आन्तरशब्दानुविद्धसमाधिः-आंतरक्रोधादिभ्योऽसङ्गोहमित्या-
आन्तरनिर्विकल्पसमाधिः-आन्तरदृश्यविषयकविकल्पविधुरः
आपत्तिः-सम्यग्वर्तनोपायानुपलम्भः । [द्धान्तप्रवृत्तिः तत्र
आपवादिकीसङ्गतिः-पूर्वसिद्धान्तं पूर्वपक्षीकृत्य यत्रोत्तरसि-
आपणः-क्रयस्थानम्।आपणिकः-क्रयविक्रयव्यवहारकः। [ज्ञानं
आपातज्ञानं-अज्ञाननिवृत्तावसमर्थं ज्ञानं १अप्रामाण्यशङ्कास्पद-

आपातत्वं-संशयादिग्रस्तत्वम् १ अविचारितवाक्यजन्यत्वं वा।
आपातरमणी-विचारमन्तरा सुन्दरी। वस्त्राभरणाञ्जनकुङ्कुमच-
न्दनालेपाद्यन्यगुणैरेव रमणीयत्वेन रमणी न स्वयं रमणीति।
आपूर्त-वापीकूपतडागादिनिर्माणम्।आपादनं-रूपान्तरेण वर्णनं
आप्तः-यथादृष्टार्थवादी १यथार्थशब्दववता २ प्रयोगहेतुभूत-
यथार्थज्ञानवान्वा ३लोकवेदसाधारणं प्रतारणाद्यजन्यहिता-
हितोपदेशकर्तृत्वे सति तद्भिन्नोपदेशाकर्ता ४रागादिरहितत्वे
सति सकलवस्तुविषयकानुभवप्रयोज्यनिश्चयवत्त्वमाप्तत्वम्।
आप्लवनं-मण्डूकवद्गमनम्। आभीरः-ब्राह्मणादम्बष्ठीजातः।
आभण्डनं-लक्षणस्वरूपप्रामाण्यादिप्रकारकज्ञानानुकूलव्यापारः
आभासः-कथाप्रस्तावः * १ अप्रमाज्ञानहेतुः २चिदाभासप्रकाशः
आमन्त्रणं-कामचारानुज्ञा। आम्नायः-गुरुपरम्परागतोपदेशः।
आम्रेडनं-पुनरावृत्तिः।आयः-धनप्राप्तिः।आयथातथ्यं-अनौचित्यं
आयुः-जीवितावच्छिन्नः कालः १ लिङ्गषाट्कौषिकशरीरयोः
संयोगेनावच्छिन्नः कालः। [विद्वद्भिः स आयुर्वेद उच्यते
आयुर्वेदः-आयुर्हिताहितं व्याधेर्निदानं शमनं तथा, विद्यते यत्र
आयोगवः-वैश्ययां शूद्रादुत्पन्नः। आरक्षिकः-न्यायाधीशः।
आरम्भः-आद्यप्रवृत्तिः १ प्राथमिकव्यापारोपक्रम इति ग्रं०
आरम्भकं-समवायिकारणम् १अनेककारणसंयोगवत्त्वे सति
आरम्भकार्य-स्वभिन्नत्वे सति समवेतम्। [कार्यजनकत्वं
आरम्भकारणवादः-पूर्वमीश्वरेच्छावशात्पार्थिवादिपरमाणुषु
क्रियाद्युत्पत्त्यनन्तरं द्व्यणुकमुत्पद्यते ततस्त्र्यणुकचतुरणका-
दिक्रमेण भूतभौतिकानि द्रव्याणीति। [कारः
आरामः-अकृत्रिमं वनम् १फलप्रधानं वनम्।आरालिकः-भक्ष्य-
आरादुपकार्यङ्गं-'फलोपकार्यङ्ग'वदस्यलक्षण०। आरा-प्रतोदः

आराधनं-गुर्वादेरनुकूलाचरणम् १ गौरवितवृत्तिनिष्ठप्रीतिहे-
तुभूता क्रिया २गौरवप्रयुक्तप्रीत्यवच्छिन्नक्रिया। [रकज्ञानं
आरोपः-भिन्नयोः सामानाधिकरण्यनिर्देशः १अतद्वति तत्प्रका-
आरोग्यं-निर्व्याधित्वम्। आरोपितः-आरोपजन्यप्रतीतिविषयः
आरोहणं-ऊर्ध्वदेशावच्छिन्नसंयोगानुकूलक्रिया। [सारित्वं
आर्जवं-अवक्रता १सरलवृत्तिः २कौटिल्याभावः३परचित्तानु-
आर्तः-रोगादिपीडितः१भ्रष्टैश्वर्यकामः२नष्टेष्टवस्त्विच्छुकः।
आर्द्रः-क्लिन्नः १ तिमितः २ स्निग्धः। आर्थिकः-प्राकृतिकः।
आर्थक्रमः-'राजपुरप्रवेश'न्यायेन स्वस्वाकांक्षितार्थान्वयक्रमः
आर्थीभावना-प्रयोजनेच्छाजनितक्रियाविषयव्यापारः १२८३
आर्थीव्यञ्जना-यत्र वक्त्रादिवैशिष्ट्यादपरार्थप्रतीतिः१२८४
आर्यः-श्रेष्ठकुलोत्पन्नः १ शीलाभिजनसंपन्नः२वेदोक्तप्राचीन-
जातिविशेषः३सततकर्तव्यकर्मानुष्ठाता४कर्तव्यमाचरन् काम-
मकर्तव्यमनाचरन्,तिष्ठति प्राकृताचारे स तु आर्य इति स्मृतः।
आर्यधर्मः-सदाचारः। [अष्टादश द्वितीये चतुर्थे पञ्चदश सार्या
आर्याछन्दः-यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि,
आर्यावर्तः-सर्वोत्तमदेशः १ विन्ध्यहिमाचलयोर्मध्यदेशः २
आसमुद्रात्पुरस्तात्तु आसमुद्राच्च पश्चिमात्,तयोरेवान्तरगि-
आर्षः-पवित्रः१ऋषिप्रसादहेतुकः। [र्योरार्यावर्तं प्रचक्षते
आर्षविवाहः-वराद्गोमिथुनं शुल्कं गृहीत्वा कन्यादानम्।
आलपनं-व्यक्तसंभाषणम्। आलम्बनं-आश्रयणम् १निबन्धनम्
आलयविज्ञानं-अहमहमित्याकारकप्रवाहः १ कर्मानुभववास-
नालयाधिकरणं विज्ञानम् २आलयं लयपर्यन्तं स्थायिविज्ञानं
आलस्यं-कृतेरभावः१चित्तजाड्यम्२प्रयत्नेन कर्तव्येकार्येश्रद्धावै-
आलापनं-परस्पर(संभाषणं १)कथोपकथनं [धुर्येणोत्साहाभावः

आलिङ्गनं-अङ्गेनाङ्गसंयोजनम् १ प्रीतिपूर्वकपरस्पराश्लेषः।
आलोकः-अवलोकनम् १ ईषद्दर्शनम् २ सूर्यादितेजःप्रकाशः।
आलेख्यं-चित्रकर्म। आलोचनं-विशेषधर्मादिना विवेचनम्।
आवरणं-प्राप्तिप्रतिषेधः १ प्रवृत्तिविघातकमाच्छादनम् २
अस्ति प्रकाशते इति व्यवहारयोग्ये नास्ति न प्रकाशत इति
व्यवहारयोग्यम्। [लमज्ञाननिष्ठं सामर्थ्यं
आवरणशक्तिः-मानसिकाविद्या १ स्वाश्रयात्माद्यावरणानुकू-
आवश्यकं-अनिवार्यपरिणामः। आवाहनं-अभिव्यक्तचनुसंधानं
आविर्भावः-उद्भवः १ प्रादुर्भावः। आविष्करणं-प्रकटीकरणम्।
आवुत्तः-भगिनीपतिः। [स्थानस्थितस्य पुनरनुसंधानं
आवृत्तिः-पुनः पुनरुच्चारणम् १ भूय एकजातीयक्रियाकरणं २स्व-
आवेगः-उद्विग्नता। आवेदनं-प्रतिस्मरणम्। आवेशः-चित्तचा-
आवेष्टकः-आवरणकारकः। आशङ्कः-अनिश्चितता। [ञ्चल्यं
आशयः-अभिप्रायः १अजीर्णस्थानम् २शयनगृहः ३विश्रामस्थलं
आशंसा-ईप्सितस्य दुर्लभस्याशंसनम्। आशंसिता-आकांक्षाशीलः
आशा-दीर्घाकांक्षा १ इदं कृत्वेदं करिष्यामीति सङ्कल्पविकल्प-
आशापिशाचिका-आशाराक्षसी। [प्रवाहानुपरमः
आशाहीनः-हतोत्साहः। आशितः-सम्यग्भुक्तः १बहुभोजनशीलः।
आशी-भक्षणशीलः १ इष्टावधारणम् २वक्त्रिच्छाविषयत्वम्।
आशीर्वादमङ्गलं-आशीर्वचनम् १परमेश्वरात्स्वस्य स्वशिष्यस्य
आश्रयः-आधारः १ गुणवद्ग्रहणम्। [वा वाञ्छितार्थप्रार्थनं
आश्रमः-मुनिगृहम् १ऋषीणां स्थानम् २शास्त्रोक्तधर्मविशेषः।
आश्रमगुरुः-प्रधानाध्यापकः। आश्रमवासी-तपस्वी १संन्यासी
आश्रयासिद्धः-पक्षतावच्छेदकाभाव (को हेतुः १) वत्पक्षकः।
आश्वलायनः-ऋग्वेदाचार्यः। आश्वासनं-सान्त्वना १शोकापनोद:

आसक्तिः-खचिता १ विषयान्तरपरिहारेणैकविषयावलम्बनं
आसत्तिः-प्रकृतान्वयबोधानुकूलव्यवधानाभावः१ यत्पदार्थेन
सह यत्पदार्थस्यान्वयोपेक्षितस्तयोः पदयोरव्यवधानमिति
ग्रं० २शक्तिलक्षणान्यतरसंबन्धेनाव्यवधानेन पदजन्यपदार्थो-
पस्थितिः।प्रमाणांतरजन्यपदार्थोपस्थितिवारणाय पदजन्येति
आसनं-शयनम् १मैथुनविधिः२उपवेशसंवेशाधारः३दुर्गादिः संग्र-
हीकरणम्※४स्थिरसुखम्५योगकर्मविरोधिक्लेशजयार्थं कर-
णबन्धः६ सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिन्तनम् ,आसनं तद्वि-
आसनफलं-द्वन्द्वानभिघातः। [जानीयादन्यत्सुखविनाशनं
आसनोपायः-प्रयत्नशैथिल्यम् १अनन्तसमापत्तिर्वा ॥१३५५॥
आसुरविवाहः-वराद्बहुधनं गृहीत्वा कन्यादानम् [भिनिवेशः
आस्तरकः-शय्यास्तरणकर्ता १आसनशयनकल्पकः।आस्थः-अ-
आस्तिकः-अस्ति परलोकः तत्साधनमदृष्टादिस्तत्साक्षीश्वर
इति मतिकः १ परलोकादिसत्ताविषयकाबाधितज्ञानवान्।
आस्तिक्यं-धर्मानुरागः १शास्त्रचक्षुष्ट्वम् २ शास्त्रार्थविश्वासः ३
गुरुवेदवाक्यादिषु फलावश्यम्भावनिश्चयः। [गलाधःकरणं
आहारः-क्षुन्निवारकः१ हितमितमेध्याशनम्२ कस्यचिद्वस्तुनो
आहार्यं-कृत्रिमम् १आहारणीयम्। [प्रेम्णा चिन्तामणिबुद्धिः
आहार्यज्ञानं-बाधसमानकालीनेच्छाजन्यज्ञानम्,यथा माणवके
आहुतिः-देवोद्देशेन मन्त्रेणाग्नौ हविःप्रक्षेपः।आह्लादः-प्रसन्नता।



इ [दष्टाविशेषः
इङ्गितं-मनोभिप्रायसूचकभ्रूक्षेपकटाक्षवीक्षणादिरूपकायचे-
इच्छा-इयं मे स्यादित्याशाविशेषः१ लब्धे तस्मिन्नुच्यतिशया-
त्पुनस्तदभिलाषः२इष्टसाधनताज्ञानजन्योभिलाष इति ग्रं० ३
इच्छामीत्यनुभवविषयवृत्तिगुणत्वव्याप्यजातिमती ४ यत्नसं-

स्कारभिन्नत्वे सति संबन्धानवच्छिन्नप्रकारताकत्वमिच्छात्वं
इच्छाप्रारब्धं-स्वेच्छापूर्वकं भुज्यमानम्। इज्या-देवतापूजनं
इडा-वाणी १ पुरोडाशखण्डः२वामनासिकास्था(चन्द्र)नाडी।
इतिकर्तव्यतात्वं-कर्तव्यप्रकारत्वम्१कथम्भावाकाङ्क्षापूरकत्वं
इतिहासः-धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्, पुर्ववृत्तकथ
(नम्१)युक्तमितिहासं प्रचक्षते। [स्य चित्प्रकारस्य प्राप्तः
इत्थम्भूतः-कंचित्प्रकारं प्राप्तः। इत्थम्भावः-अङ्गजातम्१क-
इत्यर्थः-वाक्यप्रयोक्तृतात्पर्यविषयार्थः। इत्वरः-क्रूरकर्मा।
इदं-पुरोवर्ति १प्रत्यक्षबुद्धिविषयः। इदन्ता-सन्निकृष्टवाचित्वं
इन्द्रः-त्रिलोकीप्रभुः१ परमैश्वर्यसंपन्नः २ सर्वदेवस्वामी१३९४
इन्द्रजालं-मायाकर्म१विस्मायनम्२प्रत्यक्षतो मिथ्यार्थप्रदर्शन-
म्३ मन्त्रौषधादिभिश्चक्षुरादिप्रतिबन्धेनान्यथाप्रतिभानम्।
इन्द्रजालिकः-कुहककारी१भ्रान्त्युत्पादकः। इमं-वक्ष्यमाणम्।
इन्द्रियं-सुखदुःखानुकूलसाक्षात्कारप्रमितिक्रियान्यतरकरणम-
तीन्द्रियम्। आलोकादावतिव्याप्तिवारणायातीन्द्रियमिति,
धर्मादावतिव्याप्तिवारणायाद्यविशेषणम्,अनुमित्यादिकर-
णेतिव्याप्तिवारणाय साक्षादिति१शब्देतरोद्भूतविशेषगुणा-
नाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयः। आत्मान्यतिव्या-
प्तिवारणाय सत्यन्तम्,कालादावतिव्याप्तिवारणाय विशेष्यं
इष्टः-आप्ततमः१सर्वपूज्यः२इच्छाविषयः३अश्वमेधपर्यन्तयागः
इष्टकर्म-अग्निहोत्रं तपः शौचं वेदानाञ्चानुशासनम्, आतिथ्यं
इष्टिः-यज्ञः१अभिलाषः। [वैश्वदेवश्च इष्टमित्यभिधीयते
इष्टापत्तिः-यत्र तर्के परस्येष्टमेव सिद्ध्यति, यथा यदि विष-

---

१ शब्देतरे ये उद्भूतविशेषगुणाः घटनिष्ठरूपादयस्तदनाश्रयत्वं ज्ञानस्य कारणभूतो यो मनःसंयोगस्तदाश्रयत्वञ्च चक्षुरादावस्तीत्यर्थः।

याणां भेदो ज्ञानान्न स्यात्तदा तेषां सत्यत्वं न स्यादिति १ यश्च तर्कः प्रतिवादिनोऽनिष्टस्याकृतौ अकरणे पर्यवसानः परानिष्टानारम्भकः, यथा व्यवहारे यदि कर्मवैचित्र्यं न स्यात्तदा सृष्टिवैचित्र्यं न स्यादिति कर्मवैचित्र्यसाधने परमार्थाद्वैतवादिनो न किञ्चिदनिष्टमिष्टमिति ☞ ई

ईक्षा-हेयोपादेयविवेकः। ईडितः-कृतस्तवः। ईप्सुः-आप्तुमिच्छुः। ईप्सितः-धात्वर्थव्यापारजन्यफलाश्रयः। ईशा-लाङ्गुलदण्डः। ईरिणं-सर्वसस्यशून्यप्रदेशः। ईशः-शिक्षकः १ईशानकोणाधिपतिः ईर्ष्या-परप्रद्वेषः १अनिष्टानुपेक्षणम् २परसंपदुत्कर्षासहिष्णुता ३ उत्कर्षविरोधिधर्मारोपानुकूलव्यापारजनकश्चित्तवृत्तिविशेषः ईर्षुः-द्वेषी १ईर्ष्यालुः। ईशानकोणं-उत्तरपूर्वयोरन्तराला दिक् ईशित्वसिद्धिः-येनैश्वर्येण भूतभौतिकादीनां नियन्तां भवति तत् ईश्वरः-नियन्ता १ऐश्वर्यशाली २ नित्यज्ञानाधिकरणमिति नै० ३ क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ४ त्रैकालिकबन्धशून्यः। बन्धशून्यमात्रोक्तौ मुक्तप्रकृतिलयेष्वतिव्याप्तिरिति त्रैकालिकत्वं बन्धविशेषणं तथा च मुक्तेषु भूतबन्धस्य प्रकृतिलयेषु च भाविबन्धस्य सत्त्वान्न तत्रातिव्याप्तिरीश्वरस्य तु त्रैकालिकबन्धशून्यत्वादिति ५ कर्तुमकर्तुमन्यथा वा कर्तुं समर्थः ६ जगदुत्पत्तिस्थितिसंहारकर्तेति ग्रं० ७ माया (विशिष्टचैतन्यम् ८) प्रतिबिम्बितं चैतन्यम् ९ चैतन्यमित्येकसत्ता वादे १०समष्टिकारणशरीरोपहितं चैतन्यम् १४३५ ईश्वरज्ञानं-स्वपरगतसर्वार्थविषयकज्ञानम्। ईषत्-किञ्चित्। ईश्वरपूजनं-प्रसन्नस्वभावेन यथाशशिविष्णुरुद्रादिपूजनम्। ईश्वरप्रणिधानं-सर्वकर्मणां भगवत्यर्पणम् १ भगवद्भावेतर्वा। ईश्वरसाक्षी-मायावृतचैतन्यम् १ समष्टिसङ्घातोपहितश्चेतनः २

अन्तःकरणोपलक्षितं चैतन्यम् ३ मायोपाधिकः साक्षी ४
मायातद्वृत्त्यन्यतरोपहितं चैतन्यम्। [प्रतिबिम्बिता चित्
ईश्वराश्रयप्रमा-ईक्षणापरपर्यायस्रष्टव्यविषयाकारमायावृत्ति-
ईहा-तृष्णा १कायपरिस्पन्दरूपो व्यापारः। ईषदुष्णं-मनागुष्णं
उक्थशासः-कर्मानुशासनपरः ☞ उ
उखा-इन्धनस्थाली। उग्रः-दुःसाहः १निष्ठुरः। उग्रता-भीषणता
उच्चरितप्रध्वंसित्वं-उच्चारणाधिकरणकालोत्तरकालवृत्तिध्वं-
उच्चाटनं-स्थानभ्रंशः १ उत्पाटनम्। [सप्रतियोगित्वं
उच्चारणं-कण्ठताल्वाद्यभिघातेन शब्दजनकव्यापारः १४५०
उच्चूलनं-ध्वजोर्ध्वस्थितवस्त्रखण्डः। उच्छादकः-अङ्गमर्दकः।
उच्छिष्टं-भुक्तावशिष्टम्। उच्छिष्टभोजनः-देवनैवेद्यबलिभोजन-
उच्छ्वासः-मुग्धस्योत्थानम्* १बाह्यवायोरन्तराकर्षणम् [कर्ता
उज्जृम्भः-मुखविकासः। उड्डीनं-नभोगमनम्। [ग्रहणं
उञ्छः-दैवात्प्रकीर्णानां व्रीह्यादिधान्यानामङ्गुल्या एकैकशो
उत्कण्ठा-उद्वेजनम् १रमणीयवस्तुविषयोभिलाषः २झटितिझटि-
उत्कन्धरः-उद्ग्रीवः। [त्युद्बुद्धसंस्कारजन्यस्मरणं
उत्कर्षः-अविद्यमानधर्मारोपः। उत्कीर्तनं-कर्तव्यकार्योपक्षेपः।
उत्क्षिप्तं-व्रीजोद्भेदनम्। उत्क्षेपणं-ऊर्ध्वदेशसंयोगानुकूलो
उत्क्रमः-अक्रमः १विपरीतिः २क्रमविपर्यासः। [व्यापारः
उत्तम्भकः-प्रतिबन्धकशक्तिरोधकः। उत्तमत्वं-साध्वाचारत्वं
उत्तरं-दोषभञ्जनम् १परपक्षप्रतिषेधः २प्रश्ननिवर्तकमिति ग्रं० ३
जिज्ञासितविषयावेदकवाक्यम् ४प्रकृतसिद्धान्तानुकूलतर्को-
पन्यासेन प्रकृतसिद्धान्तसिद्धसंशयापरकोटिव्यवस्थापनम् ५
पक्षस्य व्यापकं सारमसंदिग्धमनाकुलम्, अव्याख्यागम्यमित्ये-
उत्तरङ्गः-कम्पायमानः १द्वारोर्ध्वस्थदारु। [तदुत्तरं तद्विदो विदुः

उत्तरत्वं-क्रियाजन्यसंयोगानुयोगित्वम् १ मेरुसन्निहितदेशाव-
उत्तरच्छदः-शय्योपर्यास्तरणवस्त्रम् । [च्छिन्नत्वं
उत्तरमीमांसा-ब्रह्मसूत्रम् १उत्तरस्य वेदशेषभागस्य उपनिषद्रू-
पस्य मीमांसा पञ्चाङ्गन्यायोपेतवाक्यसमुदायात्मको विचारः
उत्तरायणमार्गः-इदानीमिष्टापूर्तादिकारिणां कर्मिणां चन्द्र-
उत्तानः-उद्घाटितः१विस्तारशून्यः। [लोकप्राप्तिमार्गः
उत्तेजकः-प्रोत्साहकः १ शक्त्यनुकूलः २ प्रतिबन्धक (स्य
प्रतिबन्धकः ३) कोटिप्रविष्टाभावप्रतियोगी ४ प्रतिबन्धक-
विद्यमानेपि कार्यजनकः ५ कारणाभावातिरिक्तकार्याभाव-
उत्तेजनं-प्रेरणावाक्यम् । [प्रयोजकाभावप्रतियोगित्वं
उत्पत्तिः-उत्तरक्षणसंबन्धः१ कार्यस्याद्यक्षणसत्तासंबन्धो वा २
स्वकारणसंसर्गः३ स्वाधिकरण(समयध्वंसानधिकरणसमय-
संबन्धः४)क्षणावृत्तिप्रागभावप्रतियोगिक्षणसंबन्धः५प्राथमि-
उत्थितः-प्रोद्यतः१जागरूकः । [कप्रतीतिविषयप्रवृत्तिसाधनं
उत्पत्तिपरतस्त्वं-ज्ञानमात्रकारणातिरिक्तदोषरूपप्रयोज्यम् ।
उत्पत्तिविधिः-कार्यस्वरूपमात्र(बोधको विधिः)।वगमको विधिः
उत्पातः-उपघातः १ प्राणिनां शुभाशुभसूचको भूतविकारः ।
उत्पादनं-फलोत्पत्त्यनुकूलो व्यापारः। उत्प्लवनं-उत्प्लुत्यगमनं
उत्प्रेक्षा-प्रकारान्तरेण स्थितस्य वस्तुनोन्यप्रकारेणोत्प्रेक्षणम् ।
उत्सः-प्रस्रवणम् । उत्सङ्गः-भुजयोर्मध्यः। उत्सङ्गं-उत्क्षेपणम् ।
उत्सर्गः-भूयोदर्शनम् १सामान्य(नियमः२)विधानं,यथा यत्र यत्र
चैतन्यं तत्र तत्र कर्तृत्वमिति संभावना ३ बलवद्बाधकापोद्यत्वं
उत्सर्जनं-स्वानुयोगिकप्राप्तवस्तुप्रतियोगिकसंबन्धविर(हानु-
उत्सवः-आनन्दजनकव्यापारः। [कूलो व्यापारः१)हेच्छा
उत्साहः-हृदयोद्यमः १ अध्यवसायः२सुखविशेषजनकीभूतकर्म-

विषयकः प्रयत्नः ३ अन्यैरशक्ततयाऽवधृतेप्यवश्यकर्तव्यता-
उत्साहव्यसनं-नृत्यगीतादिदर्शनेच्छाहेतुर्व्यसनम् । [वुद्धिः
उदरं-नाभिस्तनयोर्मध्यभागः। उदरकृतपापं-अभोज्यभोजनम् ।
उदरपूरकः-स्वार्थी १ भोजनभट्टः २ आत्मोदरमात्रभरणकर्ता ।
उदात्तः-महिमान्वितः१उच्चैरुच्चारितवर्णः*२समृद्धिमद्वस्तुवर्णनं
उदानः-ऊर्ध्वगामी १ पीताशितपानीयान्नदेरुद्गारक्रियाहेतुः ।
उदारः-अभीष्टदाता १मनोमुग्धकारी२वाक्यस्य वर्णनीयोत्कर्ष-
उदारात्मा-उन्नतचेता। उदासः-खिन्नचित्तः। [जनकगुणव्यञ्जकः
उदासीनः-निरुत्सुकः१प्रपञ्चशून्यः२पक्षपातशू०३मैत्रीवैररहि-
तः४विवदमानयो(रुभयोरप्युपेक्षकः५)रेकतरपक्षानवलम्बकः
उदाहरणं-साध्यसाधनव्याप्तिप्रदर्शकम् १व्याप्तिप्रतिपादकदृ-
ष्टान्तवचनम्२इतरार्थान्वितस्वार्थबोधकन्यायावयवः३कस्य-
चिद्विषयस्य सप्रमाणत्वस्थापनार्थं तादृशविषयान्तरोल्लेखनं
उदीची-प्राच्यभिमुखस्थितपुरुषवामदेशावच्छिन्ना दिक् ।
उद्गमनं-उद्धूननम्१आविर्भावः२ऊर्ध्वदेशसंयोगानुकूलव्यापारः
उदितः-आविर्भूतः। उदीरणं-उच्चारणम्। उद्घोषः-घोषणा ।
उद्गाता-सामवेद (गायकः १ वेत्तृत्विक् २) वैतकर्मकर्ता ।
उद्दानं-वन्दीग्रहः। उद्दामः-शक्तिशाली१मदमत्ता२उच्छृङ्खलः
उद्दीपनं-प्रकाशनम् १ स्वनायिकासहितनायकान्तरदर्शनम् ।
उद्देशः-गुणैः प्रापणम्१सविशेषविवरणम् २ प्राथमिकनामकी-
र्तनम्३नाममात्रेण वस्तुसङ्कीर्तनम्, यथा द्रव्यं गुण इति ।
उद्देश्यत्वं-इच्छाविषयत्वं१प्रवृत्तिनिमित्तत्वम्*२विधेयतानि-
रूपकत्वम्३मानांतरप्राप्तत्वे सति विधेयान्वयित्वेन निर्देश्य-
उद्धारकः-ऋणग्राही। [त्वम्४सिद्धप्रमितिविशिष्टतयासिद्धत्वं
उद्बोधकत्वं-उद्दीपकत्वम्१ विकासकत्वम् २ स्मृतिप्रयोजकत्वं

उद्भिज्जशरीरं-भूमिमुद्भिद्य जातं शरीरम्,यथा तरुगुल्मादि।
उद्भूतत्वं-प्रत्यक्षत्वप्रयोजकधर्मः१रूपादिविशेषगुणगतो धर्म-
उद्भूतरूपं-नयनगोचररूपम् । [विशेषः२प्रकटीभूतत्वं
उद्भेदः-स्फूर्तिः१वेधनम्२गूढार्थसूचनम्३बीजार्थस्य प्ररोहः।
उद्यतः-प्रवृत्तः१उद्यमितः२परिश्रमी३सञ्जीभूतः ४कृतसंधानं
उद्यमः-पुरुषयत्नः१दुष्करोऽध्यवसायः । उद्यमी-अध्यवसायी।
उद्यानं-आक्रीडनम् १ पुष्पप्रधानं वनम् । उद्योगः-प्रयत्नः ।
उद्विग्नं-शोकप्लुतः१उद्वेगयुक्तम् । उद्विग्नहृदयः-भीतमनस्कः।
उद्वेगः-विकलता१आशङ्कः२नृपतिजनितभयम्३दुःखासहिष्णु-
उद्वेगी-मनोमालिन्यघृणादिकारी । [तया व्याकुलता
उद्वेजनं-सर्वस्वापहरणादिभयप्रदर्शनम् । [न्योत्साहः
उन्नतिः-समृद्धिः * १ पराक्रमदानादि(जन्यं यशः २)स्मृतिज-
उन्मत्तः-चित्तविभ्रमवान्।उन्माथः-कूटयन्त्रं पशुमृगपक्षिबन्धनं
उन्मादः-चित्तविभ्रमः१अस्वाधीनचित्तः२विरहिणां काचिदवस्था
उपकरणं-प्रधानसाधनम्१उपक्रियतेनेनेति।उन्मेषः-उन्मीलनं
उपकारः-सहकारि(लाभः १)कारणजन्यः सामर्थ्यविशेषः ।
उपकारी-उपकर्ता । [करिष्यमाणः गृहीतब्रह्मचर्यव्रतः
उपकुर्वाणब्रह्मचारी-सावधिब्रह्मचर्यवान् १ विवक्षयन् विवाहं
उपक्रमः-उपायज्ञानपूर्वकारम्भः१तात्पर्यनिर्णायको हेतुविशेषः
उपक्षेपः-आक्षेपः१विन्यासः२अर्थोपस्थानम्३काव्यार्थोत्पत्तिः
उपक्रमोपसंहारलिङ्गं-प्रकरणप्रतिपाद्यस्याद्यंतयोः प्रतिपादनम्,
यथा सदेव सौम्येदमग्र आसीदिति। [स्वीकारद्योतकं पत्रं
उपगीतः-समीपस्थवर्णान्तिरगीत्यानुरवतः । उपगतं-द्रव्यादि-
उपगूहनं-आलिङ्गनम्१अद्भुतप्राप्तिः।उपगूह्यं-आलिङ्गनयोग्यं
उपचारः-शक्यार्थत्यागेनान्यार्थबोधनम्१अनियतसंबन्धेनान्यत्र

वृत्तिः, यथा 'मञ्चाः क्रोशन्ती'त्यादौ पुरुषैः समं मञ्चसंव-
उपचारिका-आस्तरणवीजनाद्युपचारकर्त्री। [न्धोऽनियतः
उपचारच्छलं-परसंतोषार्थमन्यार्थकथनम्।उपचरितः-प्रतारितः
उपजीवकं-इतरालम्बकम् १ परम्परया साक्षाद्वा कार्यमिति
मणिप्रभायाम् २ उपजीवति कारणाश्रितं भवतीति व्युत्प-
उपजीविका-जीवनोपायः। [त्योपजीवकशब्दः कार्यपरः
उपजीव्योपजीवकभावः-ज्ञानसत्त्वयोः प्रयोज्यप्रयोजकभावः,
यथा एकस्यान्यसत्ताप्रयोजकत्वमपरस्य च तत्प्रयोज्यसत्ता-
कत्वम्। एवमन्यज्ञानप्रयोजकत्वमन्याधीनज्ञानविषयत्वञ्च
उपजीवी-प्रयोज्यः। [यथायथं प्रयोगानुसारेण बोध्यं
उपजीव्यः-अवलम्बनीयः१परम्परया साक्षाद्वा जनकः२उपजी-
व्यते कार्येणाश्रीयते इति व्युत्पत्त्योपजीव्यशब्दः कारणपरः
उपज्ञा-आद्यकथनम् १विनोपदेशेन स्वयमुद्भाव्यप्रथमज्ञानम्।
उपदिष्टः-उपदेशविशिष्टः१ परिसंगृह्य शास्त्रार्थं यद्वाक्यमभिधीयते
उपदर्शकः-पक्षप्रदर्शकः [विद्वन्मनोहरं स्वन्तमुपदिष्टं तदुच्यते
उपदेशः-कृतिविषयः १ हितकथनम् २ प्रत्यक्षाख्यानम् ३ गुप्त-
वार्ताविष्कारः ४ धर्मविशिष्टो व्यापारः ५ प्रतिपत्त्यनुकू-
उपदेष्टा-उपदेशकर्ता१लेखनीयवाक्यवक्ता। [लव्यापारः
उपदेशकः-शिक्षकः १ दीक्षागुरुः २ अज्ञातज्ञापकः ३ दुर्बोध-
उपद्रवः-सङ्कटः१आकस्मिकबाधा। [वस्तुबोधनसमर्थः
उपधा-प्रवञ्चना१परवञ्चनेच्छा। उपधिः-छलनम् १विवशता
उपनायकः-प्रेमी१उपपतिः २सहकारी। [द्रव्यं
उपनिक्षेपः-रूपसङ्ख्याप्रदर्शनेन रक्षणार्थं परस्य हस्ते निहितं
उपनयः-प्रकृतोदाहरणोपदर्शितव्याप्तिमद्धेतुविशिष्टपक्षबोधकः
उपनिषद्-अज्ञाननिवारिणी विद्या१ ब्रह्मविद्याप्रतिपादकवेद-

शिरोभागः २उपनिषद्यते प्राप्यते ब्रह्मात्मभावोऽनया इति
उपन्यस्तमल्लविद्या-प्रतियोधिबाहुग्रहणार्थं स्वबाहुप्रसारणं
उपन्यासः-वाक्योपक्रमः १ तद्बोधकवाक्यप्रयोगः२ उद्देशरूप-
उपपतिः-कामकेलिः। [वाक्यजातम् ३प्रसङ्गतः कार्यनिवेदनं
उपपत्तिः-प्रकृतार्थानुकूला युक्तिः१ साधकप्रमाणोपन्यासरूपा
युक्तिरिति ग्रं० २ प्रकरणप्रतिपाद्य (र्थनिर्णायकत्वम् ३) स्य
दृष्टान्तैः प्रतिपादनम्, यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं
विज्ञातं स्यादित्यादिना मृदादिदृष्टान्तैरद्वितीयवस्तुप्रतिपादनं
उपपत्तिसमा-उभयपक्षसाधर्म्येण हेतूपपत्तिकथनम् ॥१६४१
उपपदं-समीपोच्चारितः पूर्वमुच्चार्यः शब्दः। [न्तरयोगं नि०
उपपदविभक्तिः-पदं निमित्तीकृत्य जायमाना विभक्तिः१पदा-
उपपादकः-यस्य कल्पनीयार्थस्याभावे सत्युपपाद्यं नोपपद्यते
स कल्पनीयोर्थः१उपपाद्याभावव्याप्याभावप्रतियोगित्वम्।
उपपाद्यं-योऽर्थोन्येन केनचित्कल्पनीयेन विना नोपपद्यते
सोर्थः१उपपादकाभावव्यापकाभावप्रतियोगित्वमुपपाद्यत्वम्
उपभोगः-निर्वेशः१ उपरुन्धतः २ विषयसेवनजन्यसुखविशेषः।
उपमर्दनं-विलोडनम् १पूर्वधर्मिविनाशनेन धर्म्यन्तरोत्पादनम्
उपमा-उपमानोपमेययोः साधर्म्ये भेदाभेदतुल्यता १ वैधर्म्या-
विषयैकवाक्यविषयकत्वे सतीवादिवाच्यमुभयसंबन्धिसाध-
र्म्यम् २कस्मिंश्चिदेवार्थे यः प्रसिद्धो गुणस्तदन्यस्मिन्नप्रसि-
द्धस्तद्गुणेऽर्थे शब्दमात्रेण यदुपसंयोज्य तद्गुणप्रकाशनम्।
उपमानं-दृष्टेनादृष्टसाधनम् १संज्ञासंज्ञिसंबन्धप्रमाकरणम् २
उपमितिकरणम्। कुठारादिवारणाय मितीति, प्रत्यक्षा-
दिवारणयोपेति ३व्यापारवत्तासंबन्धेनोपमित्यसाधारणका-
रणम् ४सदृशदर्शनाद(ज्ञाते सदृशान्तरे बुद्धिः५)सन्निकृष्टार्थ-

ज्ञानमिति मी० ६ साधारणधर्मवत्त्वे (न प्रसिद्धपदार्थः ७) नेपदितरपरिच्छेदकम् ८ सादृश्यप्रतियोगित्वमुपमानत्वम्।

उपमितिः-संज्ञासंज्ञिसंबन्धज्ञानम् । अनुमित्यादिवारणाय संबन्धेति, संयोगादिवारणाय संज्ञासंज्ञीति १ सादृश्यज्ञान-(ादपरत्रासन्निकृष्टे सादृश्यज्ञानम् २) जन्यं ज्ञानम् ३ सा-दृश्यवैसादृश्यान्यतरधीकरणिका धीरिति खण्डनोद्धारे ४श-

उपयमनं-स्वाधीनताकरणम् । [क्तिप्रकारकज्ञानं

उपमेयः-उपमाविषयः १सादृश्या (श्रयः२)नुयोगित्वमुपमेयत्वं

उपयुक्तः-युक्तानामुपरिनियुक्तः। उपयाचकः-याचनाकर्ता।

उपयोगः-आवश्यकता १ इष्टसिद्धिसाधनानुकूलव्यापारः *२ साक्षात्परम्परया वा कार्यजनकः३स्वजन्यावान्तरापूर्वद्वारेण

उपयोगी-योग्यः१इष्टसाधनम्१कार्यकारकः। [निमित्तं

उपरतिः-कर्मादौ तत्साधनेचदोषदर्शनपूर्विका घृणा १ज्ञानार्थ-विहितनित्याद्यागमजन्यकर्मसंन्यासः। [स्तवस्तुविस्मृतिः

उपरतिकार्यं-सर्वव्यवहारनाशः। उपरत्यवधिः-सुप्तिवत्सम-

उपलक्षणं-एकेन बहूनां कथनं *१वक्तव्यांशैकदेशोच्चारणम्२ स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकम्३स्वार्थबोधकत्वे सति स्वेतरार्थबोधकम्४अविद्यमानं सदुपस्थापकम्५स्वासं-बन्धिविशेष्यकेतरभेदबुद्धिजनकम्६विशेष्यानन्वयित्वे का-दाचित्कत्वे वा सति व्यावर्तकं,यथा काकादिकं देवदत्तगृहादेः

उपलक्षितः-उपलक्षणेन व्यावृत्तः १ चिह्नद्वारा प्रकाशितः २ स्वसमानाधिकरणस्वोत्तरकालीनस्वप्रतियोगिकाभाववत्त्व-

उपवनं-पार्कम्१रोपितवृक्षसमूहः। [संबन्धेन स्वसंबन्धित्वं

उपलब्धिसमा-वादिना दर्शिते हेत्वभावेपि साध्यस्योपलब्धि-

उपवादः-'उपालम्भ'वदस्य लक्षणमनुसंधेयम्। [कथनं

उपवासः-अहोरात्रभोजनाभावः १ उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह, उपवासः स विज्ञेयः सर्वभोगविवर्जितः २ उपसमीपे यो वासो जीवात्मपरमात्मनोः, उपवासः स विज्ञेयो न तु कायस्य शोषणम् । [न्तरेन्द्रियव्यापारोपरमः
उपवेधकं-भित्तिसंधिच्छेदनेन चौर्यकर्ता । उपशमः-वाह्याभ्य-
उपव्याख्यानं-व्याख्या १फलमाहात्म्योपासनप्रकारादिकथनम्
उपशयः-समीपशयनम् ※१ औषधादिजनितसुखानुवन्धः ।
उपशान्तः-जितचित्तः १ ह्रासप्राप्तः । उपश्लेषः-सङ्गतिकरणम्।
उपसर्गः-रोग (विकारः १) ोपद्रवः ※२ धात्वधिकरणसंयोग-गोचरकालिकधात्वर्थवोधकतावच्छेदकः ३जन्यवोधविषयी-भूतक्रियाविशेपविषयकतात्पर्यग्राहकत्वे सति प्राद्यन्यतमः ।
उपसर्जनत्वं-संमार्गसाधकत्वम् १स्वार्थविशिष्टार्थान्तरवोधक-त्वम् २अन्यपदार्थनिष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकत्वं
उपसंहारः-सम्यघरणम् १ प्रस्तावितशेप इति ग्रं० २ विस्तरेण निरूपितस्य पदार्थस्य सारांशकथनेनतन्निरूपणसमापनम् ३ एकत्र श्रुतार्थस्यान्यत्रान्वयार्थमुपक्षेपः,यथा गुणोपसंहारः ४ ग्रन्थतात्पर्यावधारकलिङ्गविशेपः ५सामान्यप्राप्तस्य विशेषे
उपसंग्रहः-उपकरणम् १चरणवन्दना। [नियमनमिति मी०
उपसङ्ख्यानं-गणना १ तत्रानुक्तार्थस्य ग्रन्थान्तरेण कथनम् ।
उपस्करणं-संशोधनम् । उपस्कारः-परिशिष्टः । उपस्कृतः-संग्र-
उपस्थः-मध्यभागः १ व्यवायानन्दसाधनमिन्द्रियम् । [हीतः
उपस्थकृतपापं-अगम्यागमनम् । उपस्थितिः-विद्यमानता ।
उपहतः-पीडितः १ धिक्कारितः । उपहतात्मा-उद्विग्नचित्तः ।
उपहारः-देवतावलिदानम्।उपहितः-उपजप्तः १ स्थापितः २उ-
उपाख्यानं-पूर्ववृत्तान्तकथनं १श्रुतस्यार्थस्य कथनं[पाधिसङ्गतः

उपादानकारणं-समवायिकारणम् १कार्या(भिन्नकारणम् २)न्वितं कारणम्,यथा घटादेर्मृदादि। रूपादावतिव्याप्तिवारणाय कारणमिति ३स्वतादात्म्यापन्नकार्यजनकम् ४ कार्याधारत्वे सति कार्यजनिहेतुः। निमित्तकारणवारणाय सत्यन्तम्, भूतलादिवारणाय विशेष्यदलम्। [क्रियाविषयः

उपादेयः-विधेयः १ कृतिसाध्यः २ उपादानजन्यः * ३ आदान-

उपाधिः-संमानसूचकः शब्दः *१ कृतिविषय इति मी० २ व्याप्तिप्रतिबन्धको धर्मः ३साध्यव्यापकत्वे सति साधनाव्यापक इति नै० ४ जातिभिन्नो धर्मः ५उपसमीपे स्थित्वा स्वीयं रूपमन्यत्रादधाति ६स्वस्मिन्निव स्वसंसर्गिणि स्वधर्मासंजकः ७ कार्यानन्वयी कार्यकाले नियमेन विद्यमानो व्यावर्तकः, यथा जपाकुसुमादिकं स्फटिके लौहित्योपाधिः ८ स्वान्वितांशविधेयानन्वयित्वे सति वर्तमानत्वे सति व्यावर्तकः। प्रथमसत्यन्तेन नीलं घटं पश्येत्यादौ नीलत्वादेरुपाधित्वनिरासः,काकैर्गृहं पश्येत्यादौ काकदेर्द्वितीयसत्यन्तेन निरासः, घटपटौ पश्येत्यत्र परस्परस्य परस्परोपाधित्ववारणाय

उपानत्-पादरक्षिका १चर्मादिनिर्मितपादकोशः। [विशेष्यदलं

उपाध्यायः-अध्यापकः १ एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः,योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते इति भविष्ये

उपायः-उपक्रमः १प्रतिकारपथः * २साक्षात्परम्परया वा यत्किञ्चित्कार्यजनने समर्थः ३उपाय्यतेऽर्थोऽनेनेति। [शीकृतः

उपार्जनं-स्वत्वसंपादको व्यापारः। उपार्जितः-एकत्रितः १स्वव-

उपालम्भः-आक्षेपवाक्यम् १निन्दापूर्वक (दुष्टवचनम् २) तिरस्कारः ३परपक्षदूषणदानम्। [किञ्चित्स उपांशुजपः स्मृतः

उपांशुजपः-शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयन्, अपरैरश्रुतः

उपासना-मुक्तिप्रयोजकविद्या १ निकृष्टेषूत्कृष्टबुद्धिः २ वस्तु-
स्वरूपानपेक्षः पुरुषेच्छामात्रतन्त्रो मानसप्रवाहः ३ विषया-
न्तरपरिहारेणैकत्र ध्येयवस्तुनि चित्तस्य स्थिरीकरणम् ।
उपासनाकाण्डं-पञ्चाक्षरविरुद्धविद्यान्तरोपासनावादः १मन्त्रो-
दितार्थस्येतिकर्तव्यताबोधनं २उपासनातदितिकर्त ०धककांडं
उपेक्षा-संस्काराजनिका बुद्धिः १पापेषु सत्कारतिरस्कारयोरौ-
दासीन्यम् २ स्वत्वध्वंसमात्रजनकस्त्यागः ३परस्वत्वानभिसं-
धानपूर्वकस्वत्वप्रागभावसमानकालीनस्वत्वाविषयकेच्छा ।
उपोद्घातः-निर्दिष्टोपसाधकः १प्रकृत(शास्त्रे प्रतिपाद्योपयोगि-
विचारः २)र्थसिध्यनुकूलचिन्ताविषयः ३ प्रतिपाद्यमर्थं बुद्धौ
संगृह्य प्रागेव तदर्थमर्थान्तरवर्णनम्।प्रतिज्ञातवर्णनं व्यावर्त-
यितुमर्थान्तरेति, असंबद्धार्थवर्णनव्यावृत्त्यर्थं तदर्थमिति,
अग्निमानयमिति प्रतिज्ञाय धूमवत्त्वादित्यर्थान्तरवर्णनं व्या-
वर्तयितुं प्रतिपाद्यमर्थं बुद्धौ संगृह्येत्युक्तम्, तावत्युक्ते बुद्धौ
संगृह्य पश्चात्प्रतिज्ञाय यद्वर्णनं तस्योपोद्घातत्वं व्यावर्तयितुं
प्रागेवेति ५ स्थानं निमित्तं वक्ता च श्रोता श्रोतृप्रयोजनम्,
उपोढं-प्रवृत्तम् । [संबन्धाद्यभिधानश्च उपोद्घातः स उच्यते
उभयत्वं-द्वित्वविशिष्टत्वम् ※ १अपेक्षाबुद्धिविशेषविषयत्वम् ।
उभयकर्मजसंयोगः-स्वजनकक्रियाऽभाववदसमवेतसंयोगः ।
उररी-स्वीकारोक्तिः । उरुः-वक्षस्थलम् । उरुकीर्तिः-सुपरि-
उलूकः-दिवाभीतः १दिवान्धः पक्षी । उल्मुकं-अङ्गारम् [चितः
उल्लापः-शोकरोगादिना ध्वनिविकारः । उल्लासः-आह्लादः ।
उल्लुण्ठनं-श्लेषवाक्यम् १व्यङ्ग्योक्तिः २ विपरीतार्थकवाक्यं
उल्वं-गर्भाशयः[च्चारणं ३एकस्यापि निमित्तवशादनेकधा ग्रहणं
उल्लेखः-उत्कीर्तनम् १ कर्तव्योपदर्शनं २सङ्कल्पितार्थकवाक्यो-

उष्णं-सूर्यतापः १तापजनकम् २ क्रियाशीलः ३जाड्यनाशकम्।
उष्णीषं-शिरोवेष्टनवस्त्रम्। उस्रा-प्रातःकालः। ऊचुः-गदितवन्तः
ऊढः-विवाहितपुरुषः। ऊरुः-जानूपरिभागः। ऊर्जः-भोज्यपदार्थः
ऊर्जितः-शक्तिसंपन्नः।ऊर्ध्वरेताः-अविप्लुतब्रह्मचर्यः।ऊर्मिः-स्व-
ऊषः-प्रातःकालः।ऊषरः-वृक्षादिरहितभूभागः।[भावसिद्धतरङ्गः
ऊहः-त्रुटिपूरकः१प्राकृतप्रयोगस्यान्यथाभावः२पदान्त(रप्रक्षेपः ३)
रेणाकाङ्क्षापूरणार्थाध्याहारः४शिष्येणानुक्तस्याप्यूहनम्५
उपदेशसमसमयं शिष्यप्रतिपत्त्यनुकूलापूर्वयुक्तिकल्पनं वा६
संशयपूर्वपक्षनिराकरणपूर्वकोत्तरपक्षव्यवस्थापनम् ७ अन-
न्वितार्थकविभक्तिलिङ्गत्यागपूर्वकमन्वययोगविभक्त्यादि-
कल्पनम्,यथा पार्वणे सौम्यस इति बहुवचनमन्वितमप्येको-
द्दिष्टेऽनन्वितत्वात्सौम्य इत्येकवचनान्ततया कल्पनम्८न्या-
याभासेभ्योनिष्कृष्यन्यायानामुपादानम्९प्रकृतावाम्नातस्य
विकृतौ समवेतार्थत्वाय तदुचितपदान्तरस्य प्रक्षेपेण पाठः।
ऊहापोहः-तर्कवितर्कः। ऋक्-ऋचा ☞ ऋ
ऋक्थं- संपत्तिः। ऋक्थग्राहः-उत्तराधिकारी। ऋक्षः-भल्लूकः
ऋक्संहिता-अग्निमीळे इत्यादिकः ऋक्समुदायात्मकः १८००
ऋग्वेदः-ऋग्बहुलो वेदः १ ऋगवयवको वेदः २ ऋग्(विनियो-
जकत्वम् ३)द्रव्यको वेद इति न्यायसुधायाम्४ ऋगेव वेदः।
ऋङ्मन्त्रः-नियताक्षरपादावसानो मन्त्र १पादबद्धगायत्र्यादि-
च्छन्दोविशिष्ट [१०४७२] मन्त्रः २ अर्थवशेन पादव्यव-
ऋजुः-अकुटिलः १ वक्रत्वाभाववान्। [स्थितो मन्त्रः
ऋणं-अवश्य(शोध्यम्१)देयम्२अन्यस्वामिकं द्रव्यं नियतकाले
ऋद्धिः-जीवदात्री१धनसमृद्धिः। [पुनरर्पणबुद्ध्या गृहीतं
ऋतम्भरा-ऋतं सत्यं भरति विभरति सा १ त्रैकालिकविष-

यावगाहिनी बुद्धिः। ऋतुः-मासद्वयात्मकः कालः।
ऋत्विक्-ऋत्वनुसारेण वैदिककर्मकर्ता १अग्न्याधेयं पाकयज्ञान-
ग्निष्टोमादिकान्मखान्, यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते
ऋषिः-मन्त्रद्रष्टा १अकृतव्रणः२ पुरातनतत्त्वस्मर्ता ३ अतीन्द्रि-
यार्थदर्शीति ग्रं० ४ गोत्रप्रवरप्रवर्तकः५ ज्ञानसंसारपारगामी।
ऋषियज्ञः-ब्रह्मयज्ञः। ऋष्टिः-सूक्ष्मखण्डः ☞ ए
एकः-असाधारणः १प्रथमसंख्यान्वितः२ द्वित्वाद्यभाववान् * ३
ज्ञेयज्ञानज्ञातृभावरहितः४सजातीयविजातीयस्वगतभेदशून्यः
एकचेतः-सर्वसंमतः। एकतानः-अनन्यचित्तवृत्तिः।एकतालः-तौर्य-
एकविषयी-प्रतिद्वन्द्वी। एकदेशिकः-प्रकृत्येकदेशाश्रितः [त्रिकः
एकदेशित्वं-सिद्धांतैकदेशाश्रयत्वेसतिस्वतंत्राधिकार्थनिरूपकत्वं
एकभक्तः-मुख्यभक्तः १नितान्तभक्तः। एकपदं-एकार्थविषयकश-
एकभविकवादः-एकजन्म(नि फल)जनकादिवार्ता [क्तिनिरूपकं
एकवाक्यत्वं-अविसंवादिवाक्यत्वम् * १ विशिष्टैकार्थप्रतिपा-
दकत्वम् २उपजीव्योपजीवकभावापन्नविषयताशालिबोधज-
नकत्वमिति ग्रं० ३साकांक्षत्वे सत्येकार्थप्रतिपत्तिपरत्वम् ४ए-
कार्थबोधकानां शब्दानां मिथ आकाङ्क्षयैकस्यां बुद्धावारूढत्वं
एकाग्रं-एकविषयकधारावाहिकवृत्तिसमर्थं। एकाकी-असहायः
एकाग्रभूमिका-अनन्यासक्तचित्तिः १ संप्रज्ञातसमाध्यवस्था।
एकान्तं-द्वैतवर्जनम् १ सर्वत्रायत्तम्। एकान्नं-एकभक्तव्रतम्।
एकार्थीभावः-अपृथगुपस्थितिविषयः१ विशेष्यविशेषणभावा-
वगाहित्वे परस्परान्वितत्वे वा सत्येकार्थोपस्थितिजनकत्वम्
एकेन्द्रियवैराग्यं-पक्वसर्वकषायज्ञानेन चित्तोत्सुकता १ इन्द्रि-
यान्तरेषूपसंहृतेष्वप्यनुपसंहृतस्य मनसो वृत्तिजिहासेति ग्रं०
एषणा-इच्छा १अभिमानः। ऐकमत्यं-एकाशयः ☞ ऐ

ऐकान्तिकत्वं-अव्यभिचारित्वम् १साधनानन्तरमवश्यं भावित्वं
ऐच्छिकः-इच्छानुवर्ती । ऐतिहासिकः-इतिहास(लेखकः१)वेत्ता
ऐतिह्यप्रमाणं-विशिष्यानिर्णीतप्रथमवक्तृकः शब्दविशेषः,
यथात्र वटे यक्षः १ अनिर्दिष्टप्रवक्तृकं प्रवादपारम्पर्यम् ।
ऐश्वर्यं-नियन्तृत्वम् १शासनकर्तृत्वम् २इच्छानभिघातात्मकत्वं
ऐश्वर्यकामः-विभूत्यभिलाषुः पुरुषः ☞ ओ
ओजः-पराक्रमम् १पराभिभवशक्तिः २ शत्रुनिर्जयसामर्थ्यम् ।
ओतप्रोतः-अन्तर्व्याप्तिः । ओल्लः-बन्धकः । ओषणः-तीक्ष्णता ।
ओष्ठः-अधरः१दशनच्छदः। ओष्ठ्यः-ओष्ठोच्चार्यमाणो वर्णः
औग्र्यं-उग्रभावः१आत्मन्युत्कर्षप्रत्ययः ☞ औ
औत्पातिकः-विपत्तिकारकः । औत्सर्गिकः-त्याज्यः१प्राकृतिकः।
औत्कर्ष्यं-सर्वश्रेष्ठता । [कार्याविचारेण प्रवृत्त आह्लादविशेषः
औत्सुक्यं-विषये रमणीयत्वबुद्ध्या जायमानोत्कटेच्छा १कार्या-
औदार्यं-उदारता १सर्वावस्थासु प्रियस्य न च प्रश्रयखण्डनम् ।
औदुम्बरं-उलूखलम् १उदुम्बरनिर्मितं भद्रपीठम्।और्णः-प्रावारः
और्ध्वदैहिकं-प्रेतकर्म १ अन्त्येष्टिकर्म । औषधं-ओषधिविकारः
औष्ट्रिकः-स्नेहभाण्डजीवी,तैलिक इत्यर्थः ☞ क
कक्षः-भुजमूलम् १शुष्कतृणम् २शिक्यतलम् ३परिधानवस्त्रम् ।
कङ्कः-छद्मद्विजः १अविप्रो विप्ररूपधारी । कङ्कणं-करभूषणम् ।
कङ्कटः-सन्नाहः १करघर्षणजन्यः किणः।कङ्कतिका-नागबला १के-
कचग्रहणी-शालापटलतृणहरणसाधनम् । [शप्रसाधनी
कच्छदेशः-सजलोऽनूपप्रदेशः । कटः-कटिदेशः १हस्तिगण्डस्थलं
कञ्चुकी-कवचधारी १अन्तःपुरसञ्चरणशीलः। कटकं-हस्ताभरणं
कटाक्षः-अपाङ्गदर्शनम् १ यद्गतागतविश्रान्तिर्वैचित्र्येण विवर्त-
कटी-श्रोणिदेशः। [नम्,तारकायाः कलाविशारतं कटाक्षं प्रचक्षते

कटाहः-कूर्मकर्परः१तैलविपाकसाधनपात्रम्। कटुकं-अरोचकं
कटोदकं-प्रेतमुद्दिश्य दीयमानमुदकम्। कठिनं-कठोरम्।
कठेरः-कृच्छ्रजीवी। कडम्बः-अग्रभागः। कणिकः-गोधूमचूर्णः।
कणं-अतिसूक्ष्मो धान्यांशः। कणेरा-वेश्या। कण्टकः-क्षुद्रशत्रुः।
कण्ठः-गलाभ्यन्तरदेशः।कण्डनी-उदूखलम्।कण्डिका-वेदैकदेशः
कण्डोली-वंशदलादिनिर्मितं भाण्डम्। कण्डूः-गात्रविघर्षणम्।
कत्थनः-गुणश्लाघकः।कथनं-जल्पनम्।कथम्भूतः-किंप्रकारं भूतः
कथा-धर्मालोचना※१इतिवृत्तवर्णनपरःप्रबन्धविशेषः२नाना-
कर्तृकपूर्वोत्तरपक्षप्रतिपादकवाक्यविस्तरः२तत्त्वनिर्णयविज-
यान्यतरस्वरूपयोग्यो न्यायानुगतवचनसंदर्भः। लौकिकवि-
कथाछलं-मिथ्यावर्णनम्। [वादवारणायन्यायेत्यादि
कदर्यः-विषयलुब्धः१आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयेत्,
लोभाद्यः पितरौ भ्रातॄन्स कदर्य इति स्मृतः। [न्काले
कदुक्तिः-प्रतिकूलवाक्यम्। कदर्थः-कुत्सितोऽर्थः। कदा-कस्मि-
कनिष्ठः-अल्पतर(तरणिस्पन्दसंबन्धवान्१)स्पन्दान्तरितजन्यं
कन्थः-सूत्रग्रथितो जीर्णो वस्त्रखण्डः१तिर्यक्स्यूतबहुवस्त्रख-
ण्डसमूहः२त्यक्तं वस्त्रं गृहस्थेन बहिःप्रक्षाल्य यत्नतः, सहस्रं
कन्दरः-पाषाणसंधिः। [डोरिकं दद्यात्कन्था सेत्यभिधीयते
कंदर्पमूषलः-पुंसोऽसधारणचिह्नम्। कन्दर्पशृङ्खलः-रतिबन्धः
कन्दलः-वाग्युद्धः। कपटी-प्रपञ्चबुद्धिः१कुटिलस्वभावः। [वती
कन्या-अनूढा१योन्यादिलज्जिताङ्गागुह्यकत्वे सति पांशुक्रीडा-
कपटः-अन्यथा स्थितस्य वस्तुनोन्यथाप्रकाशनरूपो व्यापारः।
कपोलः-गण्डस्थली। कमला-वरस्त्री। कम्पनं-विधूननम्।
कम्बलः-मेषादिलोमनिर्मितं वसनम्। कम्बली-कम्बलधारी।
कम्बुग्रीवा-शङ्खवद्रेखात्रयाङ्कितग्रीवा।करकोटरः-मुष्टिछिद्रम्

करणं-संवेशनम्१ प्रकृतारम्भः २ क्रियानिष्पादकमिति ग्रं० ३ कारकान्तरसाध्यव्यापारः ४ व्यापारवदसाधारणकारणम्, यथा छिदिक्रियां प्रति कुठारः। कालादिवारणायासाधारणेति, व्यापारेऽतिव्याप्तिवारणाय व्यापारवदिति५फलायोगव्यवच्छिन्नकारणम्५शूद्रायां वैश्यादुत्पन्नः। [नुकूलत्वं

करणापाटवं-स्वस्वकार्यासामर्थ्यम्१ इच्छाविषयीभूतवर्णाद्यन-

करण्डकः-वंशवेत्रादिशलाकारचितो वस्त्राद्याधानपात्रविशेषः

करमाला-आरभ्यानामिकामध्यं दक्षिणावर्तयोगतः, तर्जनीमूल-

करङ्कः-शरीरास्थि१मस्तकखर्परः। [पर्यन्तं प्रकीर्तिता

करीरः-वंशाङ्कुरः१हस्तिदन्तमूलम्।करीषं-शुष्कगोमयचूर्णम्

करुणा-दुःखिषु दुःखप्रहाणार्थं दया१परदुःखप्रहापणेच्छा वा।

कर्कशः-क्रूरबुद्धिः१कठिनहृदयः। कर्णशष्कुली-कर्णगोलकम्।

कर्णिः-कर्णाकृतिफलको बाणः।कर्णिका-मध्यमा१कर्णभूषणम्

कर्तरी-कृपाणी १ खण्डधारा २ श्मश्रुकर्तनोपयुक्तोऽस्त्रः।

कर्तव्यं-कार्यम्१कर्तुं(योग्यं)उचितं२अवश्यकरणीयं३कर्तव्यमेव कर्तव्यं प्रौणः कण्ठगतैरपि,अकर्तव्यं न कर्तव्यं प्राणैः कण्ठगतैरपि।

कर्ता-कर्तृत्वाभिमानः१क्रियायां स्वतंत्रः२क्रियानुकूल(कृत्याश्रयः३)ज्ञानशक्तिसंपन्नः४धात्वर्थानुकूलप्रत्ययार्थव्यापाराश्रयः

कर्तृत्वं-कर्तुर्भावः१कर्तृधर्मः२उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम् ३ इतरकारकाप्रयोज्यत्वे सति सकलकरक-(प्रेरकत्वम्२)प्रयोक्तृत्वम्। कुठारादिकारकप्रयोक्तरिहस्ता-

कर्तृका-क्षुद्रखड्गः। [दावतिव्याप्तिवारणाय सत्यन्तं

कर्पटं-मलिनत्वादिदुष्टजीर्णवस्त्रखण्डम्। कर्पासः-वस्त्रयोनिः।

कर्म-शुभाशुभ(दृष्टजनको व्यापारः१) क्रियाजन्यमदृष्टम्२ करणव्यापारविषयः, यथा वास्यादिकरणव्यापारस्योद्यम-

ननिपातनादेर्विषयः काष्ठादिः३संयोगविभागयोरनपेक्षका-
रणम्। घटादिवारणायानपेक्षपदम्,संयोगविभागद्वयग्रहणेन
संयोगविभागव्यावृत्तिः४क्रियाजन्यफलाश्रयः५ कर्तुरीप्सि-
ततमम् ६ धात्वर्थतावच्छेदकपरसमवेतक्रियाफलशालित्वम्
कर्मकाण्डं-काम्यकर्मवादः१कर्मणां कर्तव्यताप्रतिपादकं कांडं२
कर्मठः-कर्म(शूरः१)रुचिः। [द्रव्यदेवताद्यर्थस्मारको वेदभागः
कर्मक्षेत्रं-भोगमोक्षसाधनानुष्ठानस्थानम्। [तत्परः
कर्मिष्ठः-परिश्रमी१ व्यापारपटुः। कर्मी-क्रियाशाली१कार्य-
कर्मधारयसमासः-तुल्यविभक्तिलिङ्गयोरुभयोःपदयोः समा-
नाधिकरणः समासः, यथा कृष्णमृगः, श्वेतपताकेत्यादिः।
कर्ममध्यमं-आत्मपरयोः बलसाम्ये क्रियमाणं संधानम्।
कर्ममीमांसा-कर्मविषयकः पूजितो विचारः१'पूर्वमीमांसा'ल०
कर्मयज्ञः-स्नानशौचगुरुशुश्रूषाद्यावश्यकधर्मानुष्ठानम्। [यणं
कर्माधमं-परोदयात्मज्यानिसमये क्रियमाणं दानपूर्वसमाश्र-
कर्मेन्द्रियं-वदनादिव्यापारकरणमिन्द्रियम् १ अपञ्चीकृतपञ्च-
महाभूतकार्यत्वे सति वचनादिक्रियासाधनत्वम्। [गियानं
कर्मोत्तमं-आत्मोदयपरज्यानिसंभवसमये क्रियमाणं दंडोपयो-
कर्षकः-कृषिशीलः। कलङ्कः-अपवादः। कलङ्की-अपकीर्तिग्रस्तः
कर्षणं-क्षीणता१देशान्तरसंयोगानुकूलव्यापारानुकूलव्यापारः।
कलञ्जं-विपलिप्तशस्त्रहतमृगमांसम्।कलहः-विवादः१प्रचण्डता।
कलशः-चतुस्त्रिंशत्प्रस्थप्रमाणकः। [स्थानान्तरनिष्पन्नः
कला-षोडशांशः१त्रिंशत्काष्ठा२नादैकदेशः३ आलेख्यक्रिया४
कलिः-सर्वकालाश्रयः। कलिङ्गः-कृष्णाजगन्नाथयोर्मध्यदेशः।
कलियुगं-कलिरेव युगम् १ निर्बीजा पृथिवी निरौषधिरसा
नीचा महत्त्वं गताः, भूपाला निजधर्मकर्मरहिता विप्राः

कुमार्गे गताः। भार्याभर्तृविरोधिनी पररता पुत्राः पितुर्दू-
षकाः,हा कष्टं खलुवर्तते कलियुगे धन्या मृता ये नराः।
कलेवरं-स्थूलदेहम्। [पादकं शास्त्रम् २ब्रह्मणो दिवसः
कल्पः-मन्त्रार्थसामर्थ्यप्रकाशकः १ यज्ञपात्रनिर्माणप्रकारप्रति-
कल्पकः-क्षौरिकः १नापितः २कल्पनाकर्ता। [ता १वृहत्तरङ्गः
कल्पना-अप्रकृत (नूतन) विषयोद्भावनम्। कल्लोलः-प्रसन्न-
कल्पितः-आरोपितः। कविः-काव्यकर्ता १अनाग (क्रान) तदर्शी
कल्याणः-सौभाग्यशाली।कल्याणवचनं-सौहार्दव्यञ्जकभाषणम्
कव्यं-पित्रुद्देश्यकद्रव्यम्। कवोष्णं-ईषदुष्णम्।कशेरुः-मेरुदण्डः
कषायः-रागद्वेषादिकालुष्यम् १चित्तस्य रागादिना स्तब्धीभावः
कष्टं-दुःखसंपादकम्। कष्टकरः-पीडादायकः। काकः-काणूकः।
काकतालीयं-अतर्कितसंभवो व्यापारः। काकिनी-विंशतिक-
काकाक्षिगोलकन्यायः-उभयसंवन्धो दृष्टान्तः। [पर्दिका
काकुः-वक्रोक्तिः १ दैन्योक्तिः २ मदजनितो विकारविशेषः।
काचभारः-तृणकाष्ठादिवाही। काञ्ची-मेखला। [स्त्रप्रणेता
काणः-चक्षुरिन्द्रियशून्यैकगोलकवान्। काणादः-वैशेषिकशा-
काण्डं-ग्रन्थसंधिः। कातरः-भीतः १शोकान्वितः २उत्साहहीनः।
कादाचित्कत्वं-सत्त्वे सति किञ्चित्कालवृत्त्यभावप्रतियोगित्वं
कान्तिः-शोभा १छविः २छायौज्ज्वल्यम् ३नारीगणमनोहारित्वं
कापालिकः-क्षुद्रकपालः १कपालभिक्षुकः। [स्तुवर्णनं
कान्त्यलङ्कारः-विच्छित्तिविशेषशालित्वे सति लोकप्रसिद्धव-
कामः-फलेच्छा १इष्टविषयाभिलाषः २ स्त्रीप्रसङ्गः ३मैथुनेच्छा ४
स्त्रीपुंसव्यतिकरतृष्णा ५ स्त्रीषु जातो मनुष्याणां स्त्रीणाञ्च
पुरुषेषु वा, परस्परकृतः स्नेहः काम इत्यभिधीयेत ६ काम्यते
जनैरिति स्वर्गादिः ७विषयेन्द्रियजन्यं सुखम् ८अप्राप्तो विषय-

प्राप्तिकारणाभावेपि प्राप्यतामित्याकारश्चित्तवृत्तिविशेषः९ आत्मनोऽनुकूलेषु सुखेषु सुखहेतुषु दृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु वा तत्तद्गुणानुसंधानाभ्यासेन यो रत्यात्मको गर्वः स१०स वाह्यान्तरवासनामात्रभेदेन त्रिविधः।उपार्जितमोदकादिषु आद्यः,आशामोदकादिषु द्वितीयः,पथिपतिततृणादिवदापाततः प्रतीतेषु वासनारूपश्चेति। [क्रिया

कामकरः-कृत्यसाधकः। कामकेलिः-पिङ्गः१ लम्पटः२सुरत-
कामचरी-स्वेच्छाचारिणी। कामचारः-यथेष्टाचरणशीलः।
कामदशा-कामकृतनयनप्रीत्यादिदशा। कामना-फलतृष्णा।
कामनिवृत्त्युपायः-दमश्च निःसङ्कल्पश्च कामं शिथिलीकरोति१ब्रह्मचर्येण वस्तुविचारेण कामस्य निवृत्तिः।कामदः-अ-
कामरसः-वीर्यपातः। कामरसिकः-कामुकः। [भीष्टदायकः
कामरूपसिद्धिः-यथाभिमताकारापत्तिः।कामवशः-कामासक्तः
कामवृत्तं-यथेच्छवर्तनम्।कामशास्त्रं-प्रणयात्मकविज्ञानम्१का-
कामशृङ्खलः-रतिबन्धः। [मप्रतिपादकं शास्त्रं
कामाकुलः-कामकृतो व्याकुलः। कामाङ्कुशः-नराङ्गम्।
कामातुरः-प्रेमरोगाक्रान्तः। कामाप्तिः-इष्टलाभः। [लबन्धः
कामासनं-स्त्रीसंभोगोपयोग्यासनम्१ योनिलिङ्गसङ्घर्षानुकू-
कामार्तः-कामपीडितः।कामासक्तः-प्रेमविह्वलः।कामुकः-लंपटः
कामी-स्त्रीनिर्जितः१कामवशः पुरुषः।कामेशः-सर्वसंपत्तिमान्।
काम्यं-कमनीयम्१अभिलषणीयम्२ तत्तत्फलेच्छाधीनेच्छाविषयत्वं काम्यत्वम्३तत्तत्फलकामनावदधिकारिकर्तव्यताकत्वं
काम्यकर्म-स्वर्गादीष्टसाधनं कर्म,यथा ज्योतिष्टोमादि१अनुष्ठाने फलविशेषजनकत्वे सत्यननुष्ठाने प्रत्यवायाजनकत्वम्
कायः-देहमध्यः१ कटेरूर्द्ध्वप्रदेशः२ देहव्यापित्वगिन्द्रियम्।

कायव्यूहः-कर्मभोगार्थं योगिद्वारा युगपत्कल्पितः कायसमूहः।
कारकं-क्रिया(प्रकारीभूतोर्थः १)जनकत्वयोग्यताबुद्धिविषयः२
क्रियान्वितविभक्त्यर्थान्वितमिति वै० ३क्रियाजनकशक्तिमत्त्वं
कारकविभक्तिः-कारकत्वव्याप्यकर्मत्वादिशक्तिबोधिका विभक्तिः
कारणत्वं-बीजत्वम् १प्रयोजनत्वम् २ व्यभिचाराभावसहकृतस-
हचारवत्त्वे सति पूर्वभावित्वम् ३अनन्यथासिद्धत्वे सति निय-
तपूर्ववृत्तित्वम्। दण्डत्वादिवारणाय सत्यन्तम्,अनियतरा-
सभादिवारणाय नियतेति,कार्यवारणाय पूर्वेति ४कार्याव्य-
वहितप्राक्क्षणावच्छेदकत्वे सति कार्यसमानाधिकरणात्य-
कारणसृष्टिः-ब्रह्मणः सृष्टिः। [न्ताभावाप्रतियोगित्वं
कारणशरीरं-स्थूलसूक्ष्मोभयविधशरीरजनकम्। [त्यदत्तमिति
कारणोत्तरं-प्रत्यवस्कन्दनम् १ मयागृहीतमासीत्तत्पुनःपरावृ-
कारागारं-अपराधिनां बन्धनगृहम्।कारीरी-वृष्टिसंपादककर्म
कारिका-यातना १ अल्पाक्षरत्वे सति बह्वर्थज्ञापकः श्लोकः।
कारुण्यं-परदुःखदुःखित्वम्। कार्पटः-प्रार्थी १ आवेदनकर्ता।
कार्पण्यं-उचितत्यागविमुखता १ अर्थव्ययोपस्थितौ दैन्यम्।
कार्यं-कर्तव्यम् १ कर्तुमिष्टम्। कार्यचिन्तकः-परिणामदर्शी।
कार्यत्वं-आद्यक्षणसंबन्धित्वम् १ प्रागभावप्रतियोगित्वम्।
कालादिवारणाय प्रागिति,असंभववारणाय प्रतियोगीति२
वर्तमानावस्थोपपादनत्वमिति योगिनः३नियतपश्चाद्भावि-
त्वम् ४ कालत्रयानन्वितत्वे सति प्रवृत्त्यभावविरोधित्वं वा
५ कारणत्वाभिमतवस्त्वभिन्नत्वमिति वे० ६ कृतिसाध्यत्वे
सति कृत्युद्देश्यत्वम् ७कृतियोग्यत्वे सत्यलौकिकत्वमिति मी०
कार्यसमा-वादिप्रयुक्तहेतोरन्यकार्येणापि संभवाभिधानम्।
कार्यसृष्टिः-ब्रह्मणः सृष्ट्यनन्तरं दक्षादिप्रजापतीनां सृष्टिः।

कार्याध्यासः-कारणत्रयजन्योध्यासः १ दोषसंप्रयोगसंस्कारज-
कार्याविद्या-'तूलाविद्या' वदस्य लक्षणमनुसंधेयम्। [न्यत्वं
कायक्यसङ्गतिः-एककार्य(प्रयोजकत्वम् १)नुकूलत्वम् २१२९
कालः-कृष्णवर्णः १आयुःपरिच्छेदकर्ता २अतीतादिव्यवहारासा-
धारणं कारणम् ३विभुत्वे सति दिगसमवेतपरत्वासमवायि-
कालचक्रः-कालप्रवर्तकः १द्वादशराश्यात्मकः [कारणाधिकरणं
कालपरिच्छेदः-यत्किञ्चित्कालावृत्तित्वम् १ ध्वंसप्रागभाव-
कालरात्रिः-महाप्रलयकर्त्री भगवतः शक्तिः। [प्रतियोगित्वं
काव्यं-कवेः कर्म १ रसात्मकवाक्यम् २ इष्टार्थव्यवच्छिन्ना
पदावली ३रमणीयार्थप्रतिपादकःशब्दः४अर्थदोषशून्यत्वे सति
काव्यसंहारः-वरप्रदानसंप्राप्तिः। [व्याकरणादिदोषरहितः
काष्ठं-इन्धनम्।काष्ठा-पञ्चक्षणाः १अष्टादशनिमेषात्मककालः
काष्ठमौनं-इङ्गितेनापि स्वाभिप्रायाप्रकाशनम् २काष्ठमिवमौनं
किङ्कर्तव्यविमूढः-पूर्वापरकर्तव्याप्रतिसंधानं।कितवः-द्यूतकुशलः
किन्तुत्वं-प्रागुक्तविरुद्धार्थत्वम् १पूर्ववाक्यसङ्कोचज्ञापनत्वम्।
किञ्च-पुनरर्थः। किराटः-वणिग्जातिविशेषः। [रीजातः
किरातः-निषादः १अल्पतनुः २ घोटकरक्षकः ३ शवरात्पर्णशव-
किरातदेशः-तप्तकुण्डरामक्षेत्रयोर्मध्यदेशः। किरीटी-मुकुटधारी
किंवदन्ती-लोकप्रवादः। किंवराटकः-अपव्ययीपुरुषः। किंवा-अ-
किंशुकः-पुष्पितः पलाशः। किल्बिषी-शोकाक्रान्तः। [थवा
किशोरः-अप्राप्तव्यवहारः। किशोरी-युवती स्त्री। [कथनं
कीर्तिः-स्वगुणख्यातिः १ साद्गुण्यख्यातिः २ साधुतयाऽन्यैः
कीर्तनं-कथनम् १ यशःप्रकाशः २ भगवन्नाम्नां वैखर्याच्चारणं
कुक्षिः-गर्भाशयः। कुक्षिम्भरिः-आत्मोदरमात्रभरणकर्ता।
कुचरः-स्थिरग्रहः। कुटिलः-दुष्टात्मा। कुञ्जरः-श्रेष्ठार्थवाचकः

कुचपट्टिका-उत्तरीयान्तरस्थसूक्ष्मवस्त्रम्। [गृहे भिक्षाशीलः
कुटीचकसंन्यासी-प्रवचननिष्ठः१त्रिदण्डशिखाद्युपलक्षितः पुत्र-
कुट्टनं-संचूर्णम्।कुटुम्बः-पोष्यवर्गः।कुठारः-द्रुघणः१छेदनसाधनं
कुड्यं-भित्तिः। कुडवः-शरावार्द्धम्१प्रस्थचतुर्थांशः२द्वात्रिंश-
कुणपः-परासुः।कुंडिका-कमंडलुः१भिक्षाटनपात्रम् [त्तोलकं
कुणी-हस्तविकलः।कुण्ठितः-हतसमर्थः।कुण्डलं-कर्णभूषणम्
कुतनुः-विकलाङ्गः। कुतपः-दौहित्रः१द्विजन्मा। [सङ्कीर्तनं
कुतर्कः-श्रुतिविरोधितर्कः। कुत्सा-अपशब्दः१विद्यमानदोष-
कुतर्कज्ञानप्रतिबन्धः-प्रतिपादितस्यार्थस्य विपरीतग्रहणम्।
कुद्दालं-खननसाधनम्१भूमिदारणास्त्रम्। कुपितः-संजातकोपः
कुपूयः-दुष्टाचरणः। [लिका ३ अनागतार्तवकन्या
कुमारिका-द्विवर्षा१ द्वादशवर्षीया कन्या२ अविवाहिता वा-
कुंभः-षष्टिप्रस्थः१विंशतिद्रोणकः२मृत्तिकानिर्मितजलपात्रविशेषः
कुंभकप्राणायामः-अन्तःस्तंभवृत्तिः१पीतस्य वायोश्चतुःषष्टिमा-
कुंभकारः-चक्रजीविकः१वेश्यायां विप्रादुत्पन्नः [त्राभिरायमनं
कुम्भभारः-जलवाहकः।कुम्भिलः-ग्रन्थचोरः१श्लोकार्थचौरः
कुम्भीपाकः-यमानुचरास्तप्ततैलकुम्भ्यां पच्यन्ते यत्र सः।
कुरीरं-मैथुनम्।कुरुजाङ्गलं-कुरुक्षेत्रम्। कुलं-सजातीयसमूहः।
कुलकज्जलः-कुलाङ्गारः।कुलकरी-पुत्रपौत्रपरम्पराप्रसवयोग्या।
कुलटा-अपतिव्रता। कुलधर्मः-वंशपरम्पराप्रचलितधर्मः।
कुलनारी-सती स्त्री। कुलनाशः-जातिच्युतः१पङ्क्तितवहिष्कृतः।
कुलपतिः-एकोदशसहस्राणियोऽन्नदानादिना भरेत्,सर्वे कुल-
कुलाङ्गना-उच्चकुलोद्भवा स्त्री। [पतिर्नामवेदवेदाङ्गपारगः
कुलपाशः-अतिकुलीनस्य मम संन्यासाश्रममवलम्ब्याधुनैव
ब्रह्मज्ञानादिसंपादने पुत्राद्युद्वाहः कथं स्यादिति चिन्ताहेतुः

कुलाङ्गारः-कुलकलङ्कः।कुलाचारः-स्वकुलपरम्परागताचारः
कुलालशाला-भाण्डनिक्षेपस्थानम्।कुलीनः-सत्कुलोत्पन्नः१प्रा-
कुशचीरः-तृणवस्त्रम् । [माणिककुलोत्पन्न इति ग्रं०
कुशलः-ऊहापोहसमर्थः १ लौकिकवैदिकक्रियाविचक्षणः ।
कुशलमतिः-कुशाग्रबुद्धिः१प्रतिभाशाली।कुशाग्रबुद्धिः-तीक्ष्ण-
कुशीलवः-श्लोकपाठकः। कुसरिता-अल्पसरिता। [मतिकः
कुसीदं-वृद्धिजीवनम्१वृद्ध्यर्थार्थप्रयोगः।कूची-चित्रलेखनिका
कुहकं-छलग्रहः १ प्रवञ्चकः २ हस्तलाघवेनान्यथा दर्शनम् ।
कुशूलः-अन्नकोष्ठः।कूटं-कपटम्१विषमप्रश्नः२क्लिष्टरचना
कूटयुद्धं-बलव्यसनावस्कन्दकालादिच्छिद्रमुपलभ्यशत्रुहिंसनम्
कूटस्थः-सर्वोपरि१निर्विकारः२विषयसन्निधावपिविकारशून्यः
कूटाक्षः-कूटागारः। कूटार्थः-संदिग्धार्थः। कूटास्त्रं-अयस्का-
रकूटसदृशमायुधम्। कूर्चिका-दुग्धविकारः। [नदीतटः
कूपमण्डूकः-अनुभवशून्यमनुष्यः।कूबरः-युगन्धरः।कूलं-अग्रम्१-
कूर्मोपप्राणः-उन्मीलनकरः प्राणः।कृकलप्राणः-क्षुत्करः प्राणः
कृच्छ्रः-दुष्करः१कष्टकरः२सङ्कटम्।कृतं-अलम्१पुण्यहेतुकं कर्म
कृतकर्मा-चतुरः १ कृतोपकृतिः। कृतकामः-जातमनोरथः ।
कृतकृत्यः-कृतार्थः१सिद्धकार्यः २समाप्तकार्यः। कृतक्षणः-ल-
कृतघ्नः-कृतहन्ता१कृतोपकारस्यापकारकः। [ब्धावकाशः
कृतज्ञः-प्रत्युपकारकः१उपकारस्मर्ता२कृतोपकार(ज्ञः३)विस्मृ-
कृतमनोरथः-पर्याप्तमनोरथः। [त्याभाववत्त्वंकृतज्ञत्वं
कृतनाशः-कृतयोः पुण्यपापयोर्भोगमन्तरेण नाशः ॥२२२४॥
कृतप्रतिकृतं-अन्योन्यं शस्त्रास्त्रपरिहारम् । कृतश्रमः-महो-
कृतसंज्ञः-गृहीतसङ्केतः। कृताकृतिः-संकुचिताकारः। [त्साही
कृतार्थः-कृतस्वप्रयोजनः१सिद्धस्वमनोरथः२निस्तीर्णविपदः।

कृतिः-कर्तृनिष्ठो व्यापारः १लब्धार्थशमनम्। कृत्रिमः-कृत्यधीनः
कृतोपास्तिकाधिकारी-उपास्यसाक्षात्कारपर्यन्तोपासनाकारी
कृत्या-शत्रुमारणार्थं मन्त्रमयीशक्तिः। कृत्याशीलः-पिशाचावे-
कृपणः-प्राणान्तेपि वित्तव्ययमसहमानः। [शनकर्ता
कृपणता-उचितव्ययाकरणेनापि धनरक्षणेच्छा। कृदरः-कुसूलः
कृपा-परसुखार्थो यत्नः १परदुःखदर्शने व्याकुलता २स्वार्थमन-
कृपालुः-दयालुः १परदुःखासहिष्णुः। [पेक्ष्य परदुःखप्रहाणेच्छा
कृमिकं-मणिकीटम्। कृशः-जर्जरशरीरः। कृशार्थः-क्षीणार्थः।
कृषिः-कर्षणम् १ क्षेत्रबीजवापपरिकर्मादिप्रपादकं शास्त्रम्।
कृष्णः-कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः, तयोरैक्यं
कृष्णकर्म-हिंसाप्रावण्यम्। [परं ब्रह्म कृष्ण इत्यभिधीयते
कृशोदरी-क्षीणमध्या। कृसरः-तिलमिश्रौदनः। केतुः-पताका
केलिः-खेलः १क्रीडा २परिहासादिव्यवहारः। केलिकला-रति-
केलिकिलः-विदूषकः। केलिगृहं-प्रमोदभवनम्। [कला
केलिनागरः-कामासक्तः। केवललक्षणा-शक्यसाक्षात्संबन्धः।
केवलं-एकमात्रम् १पदान्तरशून्यम् २पदार्थान्तरसंसर्गविहीनम्
केवलान्वयित्वं-व्यतिरेकव्याप्तिशून्यत्वे सत्यन्वयव्याप्तिम-
त्त्वम् १अत्यन्ताभाव(प्रतियोगित्वम् २)ीयप्रतियोगितान-
वच्छेदकधर्मवत्त्वम्। [स्य लक्षणमनुसंधेयं
केशः-शिरोवालः १अन्योन्यसंलग्नः। केशमार्जकं-'कङ्कती'वद-
केशाकेशि-केशेषु केशेषु गृहीत्वा प्रवृत्तं युद्धम्। केशवेशः-सीम-
कैवल्यं-निर्दोषत्वम् १सजातीयद्वितीयरहितत्वम्। [न्तरचनं
कैवर्तः-कर्णधारः १ नौकोपजीवी। कैशोरं-आपञ्चदशाब्दात्।
कोङ्कणः-सह्यपर्वतसमुद्रयोर्मध्यदेशः। कोटरं-वृक्षान्तःसुषिरम्।
कोटित्वं-गुणारोपणस्थानत्वम् १ कोटिसङ्ख्याविशिष्टत्वम् २

संशयजनकज्ञानीयप्रकारतावत्त्वम् । कोणः-दिशादिमध्यः ।
कोपः-उच्छेदबुद्धिः । कोमलः-सुखस्पर्शः । कोष्णः-मन्दोष्णः ।
कोशः-गर्भाशयः १धनागारः २रत्नादिसंग्रहस्थानम् ३असिकोशव-
दात्माच्छादकः *४शब्दार्थसंग्रहः ५शब्दपर्यायप्रकाशकोग्रन्थः ६
कोष्ठं-उदरम् *१धान्यस्थानम् । [शब्दार्थनिर्वचनपरिज्ञानं
कौतूहलं-विनोदः १औत्सुक्यम् २विस्मयविशिष्टजिज्ञासाविशेषः
कौपीनं-गुप्ताङ्गः १कटिगुह्यवस्त्रम् २ पुरुषलिङ्गावरकोवस्त्रख-
ण्डः ३कुत्सितस्य पीनस्य मांसस्यावरणम् ४एकहस्तप्रविस्तारं
करद्वन्द्वसमायतम्, विलम्बिततृतीयांशं गुह्याच्छादनमीरितम् ।
कौमारं-पञ्चवर्षान्तम् । कौशलं-समृद्धिः १ क्रियानिपुणता ।
कौशिकः-उलूकः १ कोशाध्यक्षः । कौशलिकः-कुशलप्रश्नः ।
क्रतुपतिः-यज्ञकर्ता । [स्थानम् ४)सामर्थ्यहेतुकव्यापारः
क्रमः-गतिः १अग्रगमनम् २चिन्त्यमानार्थसंप्राप्तिः ३ पूर्वापर(ाव-
क्रमभङ्गः-अनियमितता। क्रमान्वयः-क्रमसंबन्धः १यथावस्थितः।
क्रमसमुच्चयः-एकेन कर्त्रा ज्ञानकर्मणोः क्रमेणानुष्ठानम्। [कूलः
क्रयः-पण्यसंग्रहः १मूल्यदानपूर्वकस्वीकारः।क्रयहितः-विक्रेतुरनु-
क्रयलेख्यं-गृहं क्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम्, पत्रं का-
क्रान्तदर्शी-सर्ववेत्ता । [रयते यत्तु क्रयलेख्यं तद्दुच्यते
क्रिया-शक्तेर्व्यक्तावस्थेति सां० १कर्तृनिष्ठो व्यापारः २करण-
व्यापारनिष्पाद्या,यथा छेदनादिः ३सर्वकारकान्वयितावच्छे-
दकधर्मवती ४सपरिस्पन्दसाधनसाध्येति वै० ५ संयोगविभा-
गयोरसाधारणहेतुरिति नै० ६क्रियान्तराकाङ्क्षानुत्थापकत्वं
क्रियापटुः-क्रियाकुशलः।क्रियामन्दः-दीर्घसूत्री।क्रियासाक्षी-कर्मा-
क्रीडनं-क्रीडापरिकरम् । क्रीडितः-क्रीडकः । [ध्यक्षः
क्रीडा-खेलनम् १ बाह्यसाधनसापेक्षा २हर्षजनकहस्तादिविक्षेपः

३ अन्योन्यं चातुर्या वाक्प्रयोगः। क्रीडारत्नं-रमणकार्यम्।
क्रीडास्थानं-विहारप्रदेशः। [ताप्रियः १ रोदनध्वनिः
क्रीतः-धनादिकं दत्त्वा गृहीतः। क्रुद्धः-क्रोधाविष्टः। क्रुष्टः-कथि-
क्रूरः-हिंसामात्ररुचिः। क्रूरकर्मा-दुष्कृतिकः १कूटव्यापारकर्ता।
क्रूरप्रकृतिः-तीक्ष्णस्वभावः। क्रेङ्कारः-विजयकालिकज्याकर्ष-
क्रयः-क्रेतव्यपदार्थः। क्रोडं-भुजान्तरम्। [णजन्यः शब्दः-
क्रोधः-रोषः १अनिष्टविषयदर्शनादिहेतुको मनोविकारः २कामि-
तार्थविघातजन्यो बुद्धिक्षोभः ३ इच्छाप्रतिघातादुत्पद्यमान-
स्ताडनाक्रोशनादिहेतुः ४ द्विष्टार्थसाधनीभूतचेतनविषय-
कद्वेषः ५ आत्मनः प्रतिकूलेषु दुःखेषु दुःखहेतुषु दृश्यमानेषु
श्रूयमाणेषु स्मर्यमाणेषु वा तत्तद्दोषानुसंधानाभ्यासेन प्रज्व-
क्रोधनः-क्रुद्धः। क्रोशनं-चीत्कारः। [लनात्मको मन्युः
क्रोधनिवृत्त्युपायः-दययाऽहिंसया क्षमया वा क्रोधस्य निवृत्तिः।
क्रोशः-निरक्षरध्वनिः*१गव्यूतिः२अष्टसहस्रहस्तपरिमाणम्।
क्लमः-बाह्यदुःखम्। क्लिदः-आर्द्रीभावः। क्लिष्टं-बाधकम्।
क्लीबः-कातरः १ निःशेषनष्टमैथुनशक्तिः पुरुषः २ न मूत्रं
फेनिलं यस्य विष्ठा चाप्सु निमज्जति, मेढ्रं चोन्मादशुक्राभ्यां
क्लेदनं-आर्द्रीकरणम्। [हीनः क्लीबः स उच्यते
क्लेशः-उद्वेगः १उपतापः२बाधनालक्षणः ३ सांसारिकविविध-
दुःखोपहारहेतुत्वेन पुरुषं क्लिश्नातीति ४ अविद्याद्यन्यतमः।
क्लेशपादविषयः-सामान्यशब्दस्य प्रकरणादिकमनपेक्ष्य क्व-
क्लेशलः-क्लेशावहो व्यापारः। [चिदभिप्रेतविषये प्रयोगः
क्षणः-निमेषत्रयम् १ व्यापारशून्यावस्थितिः २ स्वाधेयपदार्थ-
प्रागभावानाधारः समयः ३ घटिकायाः षष्ठो भागः ४
निमेषक्रियावच्छिन्नस्य कालस्य चतुर्थो भाग इति ग्रं०

क्षणभङ्गुरः-सन्निहितापायः १ क्षणवि(ध्वंसी २)-नश्वरः।
क्षणिकत्वं-स्वाधिकरणसमयप्रागभावाधिकरणक्षणा (नुत्पत्तिकत्वे सति कादाचित्कत्वम् १) वृत्तित्वम् २तृतीयक्षणवृ(त्त्यवृत्तिजातिमद्विशेषगुणवत्त्वम् ३)त्तिध्वंसप्रतियोगित्वम्। घटादिवारणाय वृत्त्यन्तम् ४ क्षणान्तरासंबन्धित्वे सति
क्षतवृत्तिः-खननलब्धकन्दमूलादिजीवनः। [क्षणसंबन्धित्वं
क्षतिः-मानधनादिहानिः। क्षत्ता-वर्णसङ्करः १अन्तःपुराध्यक्षः।
क्षत्रियः-उग्रकर्मा। क्षत्रियब्राह्मणः-अश्ववाहनतत्त्वज्ञः संग्रामं न परित्यजेत्,आरम्भनिरतः शूरो ब्राह्मणः क्षत्रिय उच्यते।
क्षत्रियविद्वत्संन्यासः-अपरोक्षात्मविद्विहितत्वे सति ससाधनवैधाखिलकर्मसु निष्फलत्वबुद्धिदार्ढ्येन तदास्थाराहित्यम्।
क्षपणकः-पाखण्डभिक्षुकः १ परिक्षिप्तरागः। क्षपा-रात्रिः।
क्षमा-आकृष्टस्य ताडितस्य वाऽविकृतचित्तता १सत्यपि सामर्थ्ये परिभवहेतुं प्रति क्रोधस्यानुत्पत्तिः २ आकृष्टोऽभिहतो यस्तु नाक्रोशेन्न हनेदपि, अदुष्टैर्वाङ्मनःकायैस्तितिक्षुश्च क्षमा
क्षमता-योग्यता १अर्थप्रकाशनसामर्थ्यम्। [स्मृता
क्षयः-अपचयः १क्षेतुं योग्यः। क्षरः-नश्वरः। क्षरणं-निस्सारणं
क्षयतापः-पुण्यकर्मक्षय (स्वर्गादितः) पतनभीतिजन्यस्तापः।
क्षान्तः-नस्तापः १तितिक्षितः २कृतापराधेऽप्यकृतप्रतीकारबुद्धिः
क्षान्तिः-परापराधसहिष्णुता।क्षान्तुः-सहनशीलः १क्षमास्वभावः
क्षिप्तः-अनवस्थितः। क्षिप्तावस्था-चित्तस्य विषयप्रवणावस्था
क्षिप्रं-शीघ्रम् १त्वरितम्। क्षीणः-च्युतः १कृशाङ्गः २क्लेशप्राप्तः
क्षीयमाणः-विनाशोन्मुखः। क्षुण्णः-अभ्यस्तः १संचूर्णितावयवः
क्षुद्रः-अधमः १अल्पेपि निमित्ते प्राणग्राहकः। क्षुधा-भोजनेच्छा
क्षुधुनः-म्लेच्छजातिः। क्षुपः-क्षुद्रवृक्षः। क्षुब्धः-परिखिन्नः।

क्षुरः-लोमच्छेदनः । क्षेत्रज्ञः-प्राणशरीरप्रकाशको जीवः ।
क्षेपकः-विक्षेपकारकः १विक्षेपकर्तरि ग्रन्थकृदकृतांशस्यतद्ग्र-
क्षपणं-दूरीकरणम् १स्थानात्प्रच्यावनम् [न्थमध्ये सन्निवेशकः
क्षेप्तुं-दूरीकर्तुम् । क्षेमी-परसुखार्थी। क्षेम्यं-संसारमोचकम् ।
क्षेमं-स्थितरक्षणम् १लब्धप्रतिपालनम् । क्षैत्रं-क्षेत्रसमुदायः ।
क्षोभः-चालनम् १प्रकृतिविपर्यासः २चित्तचाञ्चल्यम् ३इच्छा-
क्षोभितः-संचालितः१संजातक्षोभः । [विघाताच्चित्तपरितापः
क्षौद्रं-नीचता १ रजःकणः । क्ष्वेडः-कुटलः१वर्णात्मकध्वनिः ।
खगोलः-आकाशमण्डलः । ☞ ख
खञ्जः-एकपादः१पादविकलः२संस्थानविशेषशून्यपादवान् ।
खट्वा-अष्टकाष्ठादिनिर्मितशयनसाधनम् । खड्गः-द्विधारः ।
खट्वारूढः-तीव्रदुःखग्रस्तः। खण्डः-एकदेशः।खण्डितः-छिन्नैकदेशः
खण्डधारा-कर्तरी*१गीतिविशेषः२यद्गीतं गुणकार्या च रा-
गेण क्रीडकेन च,तालेन सा खण्डधारा यष्टिकेन प्रकाशिता
खण्डनं-नाशानुकूलव्यापारः१स्वमतदोषपरिहारपूर्वकपरमत-
पदार्थनिराकरणम् २शब्दार्थानिर्वचनीयताप्रतिपादको ग्रन्थः
खण्डप्रलयः-जन्यद्रव्यानधिकरणकालः। खनकः-संधितस्करः।
खननं-उत्पाटनम् । खनी-स्वर्णरत्नाद्याकरः । [योग्यं
खरुः-पतिंवरा कन्या१गुणवाचिकेपि पर्युदासः। खाद्यं-खादितुं
खर्वटः-गिरितटग्रामः१क्षुल्लकप्राकारवेष्टितः।खादकः-भक्षकः
खलः-मूर्खः१दुष्टपुरुषः । खल्वाटः-केशविहीनमस्तकः पुरुषः ।
खष्पः-नृशंसता१ निष्ठुरता । खसूचिः-निन्दाव्यञ्जकशब्दः ।
खानपानं-कठिनद्रवद्रव्ययोर्गलाधःकरणम्। खलु-निःसंशयम् ।
खारी-षोडशद्रोणा१द्वादशाधिकपञ्चशतप्रस्थः।खिन्नं-प्राप्तपीडं
खिलकाण्डं-नानाजातीयप्रत्ययोदाहरणबोधकं काण्डम् १कर्मो-

पासनब्रह्मकाण्डेषु त्रिष्वपि यद्यद्वक्तव्यमवशिष्टं तस्य सर्व-
खेचरः-खेऽधिकञ्चरणशीलः। [स्याभिधानेन प्रकीर्ण
खेचरीमुद्रा-अन्तःकपालविवरे जिह्वां व्यावृत्यधारयेत्, भ्रूम-
ध्यदृष्टिरप्येषा मुद्रा भवति खेचरी। [योपजीवनप्रदेशः
खेटः-सुनिन्दकः १ कृषीवलग्रामः २ पांसुप्राकारनिबद्धः ३ मृग-
खेदः-मनश्चेष्टासमुत्पन्नः श्रमः १ उपायाभावेष्टनाशादिकृत-
खेरकः-पशूनां पादरोगः। खेला-कूर्दनम्। [मनोभङ्गः
ख्यातः-प्रसिद्धः। ख्यातिः-महत्त्वम् १ पुण्यत्वकीर्तिः २ भ्रमज्ञानं
गगनं-घनोपगूढम्। गजः-साधारणनरांगुल्या त्रिंशदंगुलकः। ग
गणिका-रूपाजीवा १ धनमेवगणयतीति। गणितं-अङ्कविद्या।
गण्डः-अन्यदन्यच्च वदतो द्वयोर्वाक्यसमागमे, जायतेऽनिष्ट-
गण्डुः-उपाधानम्। [मिष्टं वा स गण्ड इति कीर्तितः
गतं-निरस्तम्। गतिः-परिणामः १ उत्तरदेशसंयोगानुकूलक्रि-
गदगदः-वाक्स्खलनम्। [या २ पठितेः पदात्पदान्तरसंचारः
गद्यं-कथनीयम् १ छन्दोरहितवाक्यम् २ पादलक्षणशून्यपदसमूहः
गन्धर्वः-दिव्यगायनः १ षड्जादिकुशलः। [समानमभ्रचित्रं
गन्धर्वनगरं-नानारत्नमयगोपुरप्रासादादियुक्तनगरादिवद्भ्रा-
गन्धर्वलोकः-गुह्यकलोकोपरिस्थविद्याधरलोकस्याधोनिवि-
गन्धर्वविवाहः-गन्धर्वमतानुसारी विवाहः। [ष्टस्थानं
गन्ता-गमनकर्ता। [त्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं
गन्धत्वं-आमोदत्वम् १ घ्राणग्राह्यत्वम् २ पृथिवीवृत्तिमात्रवृ-
गमकः-सङ्केतकारी १ नित्यसाकाङ्क्षः २ स्वरोत्थानप्रकारः।
गमनं-अनियतोत्तरदेशसंयोगासमवायिकारणं कर्म १ स्त्रीमैथुनम्
गम्भीरः-गूढार्थः १ निमित्ते सति हर्षभयकामाद्यभिव्यक्तिरहितः
गम्यः-निरसनीयः १ लक्षणया बोध्योर्थः। गरिष्ठः-गुरुतरः।

गरिमा-मेरुपर्वतवद्गुरुत्वभवनं।गर्गरः-दधीक्षुतैलादिनिपीडनयंत्रं
गर्भः-देहजन्मकारकशुक्रशोणितसंयोगजन्यमांसपिण्डः१उद्भे-
दस्तस्य बीजस्य प्राप्तिरप्राप्तिरेव च, पुनश्चान्वेषणं यत्र स
गर्भितः-गर्भयुक्तम्१वाक्यान्तरानुप्रवेशः [गर्भ इति संस्मृतः
गर्वः-व्यभिचारिभावविशेषः*१अभिमानात्मिकाचित्तवृत्तिः२
ऐश्वर्यरूपतारुण्यकुलविद्याबलैरपि, इष्टलाभादिनान्येषामवज्ञा
गर्व ईरितः। [नाद्बहुशो.ज्ञेयं गर्हणं नाम सूरिभिः
गर्हणं-भर्त्सना१ यत्र सङ्कीर्तयेद्दोषं गुणं च विनिपातयेत्, भर्त्स-
गर्हा-विनिन्दनम्१अविद्यमानदोषारोपः। गर्ह्यः-गर्हितव्यार्थः
गर्हितः-निर्भर्त्सितः। गलः-स्रवणम्। गहनः-दुष्प्रवेशः१ अनिगूढः
गलग्रहः-यत्रारम्भानन्तरं प्रत्यारम्भो न दृश्यते सः। [वेशं
गह्वरं-महती दरी१भयानकस्थानम्। गाढं-दृढीकृतम्१दुष्प्र-
गाथा-सुभाषितत्वेन सर्वैर्गीयमाना।गान्धिकः-सुगन्धिव्यवहारी
गाथाछन्दः-प्रथमं द्वादश मात्रा द्वितीयेऽष्टादशभिः संयुक्ता,यथा
गान्तुः-पथिकः। [प्रथमं तथा तृतीयं पञ्चदशविभूषिता गाथा
गान्धर्वविवाहः-वरवध्वोरैकमत्येन कृतो विवाहः ॥२५७४॥
गानं-आभ्यन्तरयत्नजनितः स्वरविशेषाणामभिव्यञ्जकः शब्दः
गान्धर्ववेदः-सर्वलोकानुरञ्जननृत्यगीतादिविषयको वेदः।
गान्धारीनाडी-दक्षिणनेत्रस्था नाडी। गार्हस्थ्यः-गृहस्थयोग्यः।
गांभीर्यं-अक्षोभ्यत्वम्१दुःखग्राह्याभिप्रायत्वम्२दुर्विरोधाशयत्वं
गालिदानं-व्याभिचारिणीपुत्रोऽयमिति सतीपुत्रेऽपि कथनम्।
गीतं-छान्दसहार्दान्यतरस्वरेण गुणकीर्तनम् १ स्वरतालग्रामभे-
दरागरागाङ्गभूषितम्, संस्कृतं वा प्राकृतं वा गीतं गीतविदो
गुच्छः-पुष्पस्तबकः। गुञ्जा-पक्वफलगुच्छः। [विदुः
गुञ्जिका-त्रियवपरिमाणम्। गुडापूपः-गुडेन मिश्रितोऽपूपः।

गुडाकेशः-जि(तनिद्रः १ तालस्यः २)तेन्द्रियः ३ धनुर्वेदपारगः।
गुडापापः-गुडाभिलाषी १ गुडवद्मधुराशयः। गुडकः-गुडपक्वः।
गुणः-प्रमाया असाधारणकारणम् * १ निर्गुणत्वे निष्क्रियत्वे च
सति सामान्यवान् २द्रव्यकर्मभिन्नत्वे सति समवायेन द्रव्यमा-
त्राश्रितः ३संयोगाजन्यसंयोगासमवायिकारणवृत्तिसंयोगास-
गुणकर्म-संस्कारजनकं कर्म। [मानाधिकरणजातिमान्
गुणत्यागी-दोषैकदृग्जनः। गुणहीनः-विद्यादिहीनः। [वाक्यं
गुणवावयं-विहिते कर्मणि तदङ्गतया द्रव्यदेवतादिविधायकं
गुणवादः-प्रमाणान्तरविरोधे सत्यर्थवादः १ मानान्तरविरुद्धार्थ
(प्रतिपादकत्वम् २)ज्ञापकः शब्दः,यथादित्यो यूप इत्यादिः।
गुणानुवादः-गुणकथनम् १दोषपरेण दर्पादवधीरितस्य व्याहारः
गुणोपसंहारः-भिन्नशाखागतानां गुणानामङ्गानां विशेषणानां
गुप्तः-वाङ्मनसगोचरातीतः। [वा एकवुद्ध्युपारोहणं
गुप्तिः-इष्टप्रापणम् १ अवस्करस्थानम् * २ संचारकारणाद्यो-
गुप्तिकर्म-प्राकारपरिघादिनिर्माणम्। [गादात्मनो गोपनं
गुरुः-भारिकः १दीर्घस्वरवद्वर्णः * २हितोपदेष्टा ३ संशयापनोद-
कः ४सविध्युपनयनपूर्वकवेदाध्यापनकर्ता ५संस्कृतैः प्राकृतैश्चैव
गद्यपद्याक्षरैस्तथा, देशभाषादिभिः शिष्यं बोधयेत्स गुरुः स्मृतः ६
गुशब्दस्त्वन्धकारः स्याद्रुशब्दस्तन्निरोधकः,अन्धकारनिरोधित्वा-
गुरुक्रमः-गुरुपरम्परोपदेशः। [द्गुरुरित्यभिधीयते
गुरुतल्पगः-गुरुपत्नीगामी। गुरुता-गुरोर्भावः। गुरुतरं-गरिष्ठं
गुरुत्वं-आद्यपतनासमवायिकारणम् दण्डादिवारणायासमवायी-
ति,रूपादिवारणाय,पतनेति,वेगेऽतिव्याप्तिवारणायाद्येति १
स्वसमानाधिकरणपतनप्रतियोगिकध्वंसासमानकालिकत्वम्
गुल्फः-पादजङ्घासंधिग्रन्थिः।गुल्मः-कुशादिगुच्छः १सैन्यैकदेशः २

गजानव,रथानव,अश्वाः सप्तविंशतिः,पदातयः पञ्चचत्वारिंशत्
गुहः-देवखातविलम्। गुहा-पर्वतादेर्गह्वरम् १अल्पप्रमाणा दरी।
गुह्यं-रहस्यम् १लब्धुमर्हम् २गोपनीयम् ३गुप्तत्वम्। [गम्यता
गूढः-दुर्लक्ष्यः १अनभिव्यक्तः २गम्भीराभिप्रायः। गूढता-अवोध-
गूढपथः-गुप्तमार्गः। [श्राव्यते सदा गूढं[1] स[2] उच्यते
गूढसाक्षी-अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम्,यः
गूथं-पुरीषम्। गृध्रदृष्टिः-गृध्रवद्दूरदर्शी। गृष्टिः-सद्यः प्रसूता
गृहज्ञानी-अनुभवशून्यः।गृहस्थब्रह्मचर्य-ऋतोरन्यत्र स्त्रीसङ्गम-
गृहस्थः-कर्मनिष्ठः १वैवाहिकेन विधिना कृतपत्नीपरिग्रहः [त्यागः
गृहीतार्थः-प्रज्ञातार्थको जनः। गृहिणी-गृहकार्यकुशला स्त्री।
गृह्यः-निगृह्यः १ गृहासक्तः २ आकर्षणीयः ३ परमुखापेक्षी।
गोगोष्ठं-गोशाला। गोचरः-भूचरः १ ज्ञाननिरूपितो विषयः।
गोचर्म-गवां चर्म १शरीरावरकं शस्त्रम् २ऋषभैकशतं यत्र गवां
तिष्ठति संवृतम्, बालवत्सप्रसूतानां गोचर्म इति संविदुः।
गोतमः-तार्कशास्त्रप्रणेता। गोत्रं-संभावनीयबोधः १पुत्रपौत्रप्रभृ-
गोत्रसंवलितं-नामान्तरग्रहणम्।गोपुरं-पुरद्वारम् [तिकमपत्यं
गोप्ता-स्ववृतरक्षकः १ आच्छादनकारी।गोमार्गः-इन्द्रियचालकः
गोमूत्रिका-गोमूत्रवद्वक्रगत्या प्रवृत्तिः। गोरक्षा-गोचारणम्
गोरुतं-क्रोशद्वयम् १द्विसहस्रधनुःपरिमाणम्।गोलः-सर्ववर्तुलः।
गोशीर्षं-गोमस्तकम्। [द्विशीलवयसां विनोदार्थमासनवन्धः
गोष्ठी-विद्वत्सभा १विलासस्थानम् २परस्परप्रेमालापः ३समानवु-
गौणः- } गौणिकः १गुणादागतः २वास्तविकारोपितान्यतरगु-
गौणार्थः } णसत्ताप्रयोज्यारोपविषय इति ग्रं० ३स्वार्थमुत्सृज्य-
परार्थावलम्बनम् ४तद्धर्मप्रकारकप्रतीतिविशेष्याप्रसिद्धार्थः।
गौणप्रयोजनत्वं-प्रयोजनान्तरेच्छाधीनेच्छाविषयत्वम् २६३१

गौणीवृत्तिः-गुणमधिकृत्य प्रवृत्ता वृत्तिः १सादृश्यसंवन्धयुक्ता
वृत्तिः २ लक्ष्यमाणगुणयोगेन स्वार्थादन्यत्र वृत्तिः,यथा सिंहो
गौरी-गौरवर्णा १असंप्राप्तरजा स्त्री। [माणवक इत्यादौ
ग्रथनं-कुटिलीकरणम् १कार्याणां वहूनामुपक्षेप इति ग्रं० २अ-
न्योन्यनिर्णयोत्पन्नपरिचयपल्लवितविभ्रमाभिरामोर्थविशेषः
ग्रन्थः-अलौकिकैकप्रयोजनोद्देशेन प्रवृत्तवाक्यसमुदायः २६४०
ग्रन्थसंधिः-अध्यायः। ग्रसनं-मुखान्तवर्तिच्छिदम्। [पारः
ग्रस्तः-जिह्वामूले निगृहीतः। ग्रहः-वुद्धिविशेषप्रयुक्तहस्तव्या-
ग्रहणं-त्यक्तस्यादरः १अर्थावगमः २उपदिष्टार्थस्य सद्योवधा-
रणसामर्थ्यम् ३शिष्यकृतप्रश्नाक्षेपवाक्यार्थानां सद्योवधा०
ग्रामः-हट्टादिशून्यवसतिः १विप्रादिवर्णप्राया प्राकारपरिखा-
ग्रामधर्मः-स्त्रीमैथुनम्। [दिरहिता वहुजनवसतिः
ग्रामसङ्घः-ग्रामीणसंस्था। ग्रासः-कवलः १मुखपूर्णयोग्यान्नम्।
ग्राह्यं-अङ्गीकार्यम् १लौकिकप्रत्यक्षस्वरूपयोग्यम्। ग्रीवा-लेर्य-
ग्लानिः-अनुत्साहः १दोषदर्शनजन्याप्रवृत्तिः। [नया १कन्धरा
घ [पारविषयतानिरूपकः ३तद्विषयता०तावत्त्वं
घटकः-स्वविशिष्टः १द्रव्यविशेषयोजकः २प्रत्येकविषयताव्या-
घटत्वं-स्वाश्रयघटभिन्नाधिकरणावृत्तिर्जातिः १घटेतरासमवे-
घटिका-षष्टिपलात्मककालः [तत्वे सति सकलघटसमवेतत्वं
घटितत्वं-समुदायविषयताव्याप्यविषयतानिरूपकत्वम्।
घटीयन्त्रं-एकरज्जुसंवद्धघटमालारूपम्। घातः-वधदण्डः।
घातनः-मारकः।घुणः-काष्ठकीटकः।घुणकीटः-काष्ठवेधकः कृमिः
घृणा-अरुचिः १धिक्कारः २भर्त्सना ३कारुण्यम् ४लोकापवादभयं
घृणालुः-कोमलहृदयः।घृणी-निन्दितः।घृष्टिः-स्पर्धा १प्रतिद्वंद्विता
घोरः-भयङ्करः १अतिदारुणः। घोरात्मा-विषयप्रसङ्गनिमित्त-

संसारभयरहितः । [ष्टम् ३ घुष्टघोषणं
घोषः-गोपग्रामः। घोषणा-राजाज्ञा१उच्चैः शब्दः २ उच्चैर्घु-
घ्नः-नाशकः। घ्राणतर्पणः-नासिकाप्रियः। घ्रेयः-घ्रातव्यार्थः।
घ्राणेन्द्रियं-गन्धोपलब्धिसाधनमिन्द्रियम् । चक्षुरादावतिव्या-
☞ च [प्तिवारणाय गन्धेति,कालादिवारणायेन्द्रियमिति
चकितः-भयभीतः १ शङ्कान्वितः। चक्रं-सारवृत्तमायुधम् ।
चक्रकदोषः-तदपेक्षापेक्ष्यपेक्षित्वनिबन्धनो दोषः१ स्वापेक्षणी-
यापेक्षितसापेक्षत्वनिबन्धनोऽनिष्टप्रसङ्गः२स्वग्रहसापेक्षग्रह-
सापेक्षग्रहसापेक्षग्रहकः३पूर्वस्य पूर्वापेक्षितमध्यमापेक्षितोत्त-
चक्रवर्ती-आसमुद्रक्षितीशः१सार्वभौमाधिराजा। [रापेक्षित्वं
चक्षुः-रूपोपलब्धिसाधनम्।चञ्चलः-अस्थिरः।चटुलः-शोभनः
चण्डः-क्रूरः१ सर्वसूदनक्षमः।चण्डालः-ब्राह्मण्यां शूद्रादुत्पन्नः।
चतुरः-'कुशल' वदस्य लक्षणमनुसंधेयम्। चतुर्भागः-चतुर्थांशः
चतुरशीतिभ्रमणं-उच्चावचमध्यदेहप्रभेदग्रहणम् ॥२६८६॥
चतुर्थीत्वं-ददात्यर्थधर्मिकसंप्रदानत्वानुभावकसुप्सजातीयत्वम्
चन्द्रमुखी-उज्ज्वलमुखवती स्त्री । चपलः-अस्थिरप्रकृतिः ।
चपेटः-प्रसृतकरतलम् । चमत्कारः-लोकातीतवस्तु। [शेषः
चमसः-चतुरस्राकारस्समुष्टिकः प्रादेशमात्रो दारवः पात्रवि-
चमूः-कोटित्रिशताधिकसप्तसहस्रम्१रथाः ७२९ हस्तिनः७२९
चमूरुः-मृगभेदः । [अश्वाः २१८७ पदातयः ३६४५
चम्पूः-गद्यपद्यमिश्रितवाक्यम् । चयनं-छिदाहेतुर्विघट्टनम् ।
चरमत्वं-अवसानत्वम्१ स्वसजातीयपदार्थप्रागभावानधिकरण-
चरिका-अष्टहस्तप्रमाणो मार्गः। चरित्रं-लोकाचारः। [त्वं
चरुः-अनास्राविताम्तरूष्मपक्व ओदनः। चर्म-शरीरावरकं शस्त्रं
चर्चरी-द्रुतमध्यलयं समाश्रिता पठति प्रेमभराम्नटी यदि,प्रति-

मण्ठकरासकेन वा द्रुतमध्या प्रथमा हि। चर्चकः-आलोचकः।
चर्वणं-भक्षणम्। चलनं-कम्पनम्। चषालः-यूपकटकः।
चहः-परिकल्पनम्। चाटुः-प्रियं वाक्यम्। चाटुपटुः-मिथ्या प-
चाण्डालः-शूद्राद्ब्राह्मणीजातः। [रितोषणे वाक्ये पटुः
चांडालब्राह्मणः-देवद्रव्यगुरुद्रव्यपरदाररतः सदा, निष्ठुरः सर्वभू-
चातुरी-युगपद्भूरिसमाधानकारिता। [तानां विप्रश्चांडाल उच्यते
चान्द्रायणं-एकैकं वर्द्धयेत्पिण्डं शुक्ले कृष्णे च ह्रासयेत्, इन्दुक्षये
न भुञ्जीत एष चान्द्रायणो विधिः। [मणकारी २पुराणपाठकः
चारः-गमनम् १गूढपुरुषः २गूढप्रेषणम्। चारणः-वन्दीजनः १ भ्र-
चारितार्थ्यं-सफलता। चारित्रं-पापात्मकक्रियारम्भमात्रत्यागः।
चार्वाकः-तार्किकविशेषः १बृहस्पतिशिष्यत्वे सति देहात्मवादी।
चिकित्सकः-दोषापहर्ता। चिकित्सा-व्याधिनिवारणो व्यापारः
चिकीर्षा-संपादनेच्छा १प्रवृत्तिहेतुरिच्छा २कृतिसाध्यविषयिणी
चिकीर्षुः-इच्छुकः १अभिलाषी। [कृतिसाध्यत्वप्रकारिकेच्छा
चिकुरः-अस्थिरः १ दुस्साहसी। चिच्चितिः-चैतन्यस्फूर्तिः।
चितत्वं-संचेतनत्वम्। चित्तमोहः-ऊष्मादिजनितचित्तभ्रमः।
चित्तं-अनुसंधानात्मकवृत्तिमदन्तःकरणम्। चित्तविश्लेषः-मै-
चित्तमात्रं-चित्ततादात्म्याध्यासाच्चित्तप्रायः। [त्रीभङ्गः
चित्तस्थैर्यं-अतिसङ्कटेप्यङ्गीकृतविषयपरित्यागराहित्यम्।
चित्त्वं-विद्वत्ता १अलुप्तप्रकाशत्वम् २समस्तवस्त्ववभासकत्वम्।
चित्रं-चित्रीकरणम् १आलेख्य(कर्म २) ाभिमतजनदर्शनोपायः।
चित्रज्ञः-चित्रकः १ चक्रबन्धादिसहितचित्रकाव्यरचनाचतुरः।
चित्रीकरणं-आश्चर्यकरणम् १आलेख्यकरणम्। [समानत्वं
चिदाभासः-चित्प्रतिबिम्बः १चिल्लक्षणरहितत्वे सति चिद्वद्भा-
चिदचिद्ग्रन्थिः-अन्तःकरणतद्धर्म्यतादात्म्यसंसर्गाध्यासः।

चिन्तनं-उपदिष्टार्थानुसंधानम्। [मानसो विकारविशेषः
चिन्ता-इष्टाप्राप्त्यनिष्टप्राप्तिहेतुको भूलेखनाधोमुखत्वादिकरो
चिन्मयः-चिदेव। चिरकालः-दीर्घकालः। चिरक्रियः-दीर्घसूत्री।
चुम्बनं-वक्त्रसंयोगविशेषः१रागहेतुकोऽधरकरणकः संयोगानु-
चूर्णं-सङ्कोचनम्। चूर्णिः-कपर्दकशतम्। [कूलो व्यापारः
चूतं-स्त्रिया गुप्ताङ्गम्।चेटः-उपनायकः। [क्रियते साहि चूलिका
चूलिका-यथा पटीमध्यगतैः सूतमागधवन्दिभिः,अर्थोपक्षेपणं यत्र
चेतना-घटाद्याकारा वृत्तिः। चेतोमुखः-कर्तव्यपरिपाकदर्शी।
चेष्टा-हिताहितप्राप्तिपरिहारार्था क्रिया१सङ्केतवलेन स्वाभि-
चैतन्यं-ज्ञानवत्त्वम्१ज्ञानेच्छायत्नवत्त्वम्। [प्रायप्रकाशनं
चैत्यं-वन्द्यशाला। चोदना-विधिवाक्यम् १ इदं क्रियताम्।
चोदितः-प्रेरितः१उत्तेजितः। चोरः-स्तेयकर्ता१परद्रव्यापहारी
चोष्यं-रसमात्रं गृहीत्वा त्याज्यम्। चौक्षं-शुद्धम्१मनोज्ञम्।
चौर्यं-परमात्रस्वत्ववद्द्रव्यहरणम्। ☞ छ [कारी
छत्रं-आतपत्रम्।छन्दोमृत्युः-इच्छामरणम्।छंवट्कारी-विनाश-
छन्दः-छन्दोवद्धवाक्यम्१नियमितवर्णमात्रानिबद्धचतुष्पादादि-
पद्यम्२लौकिकवैदिकशब्दान् छन्दयति नियमति प्रतिपादय-
छन्नं-आच्छादितम्। [ति विरामादिव्यवस्थापको ग्रन्थः
छलं-विपरीतार्थकल्पनोपपत्त्या वचनविघातः१शब्दवृत्तिव्य-
त्ययेन प्रतिषेधहेतुः२वक्तृतात्पर्याविषयार्थकल्पनेन दूषणाभि-
धानम्,यथा नवकम्वलोयं देवदत्तः३परोक्तस्यार्थान्तरं परि-
छात्रः-अध्यपकाध्येतृवृत्तिः। [कल्प्य तद्दूषणेन परोक्तभङ्गः
छादनं-सङ्गोपनम्। छान्दोग्यं-मन्त्रब्राह्मणस्वरूपशास्त्रसमूहः।
छाया-प्रतिमा १ अनातपः २ कथासाम्यम् ३प्राकृतादिभाषाणां
छायापुरुषः-आकाशे दृष्टः स्वीयच्छायारूपः पुरुषः। [संस्कृतभाषा

छायावृक्षः-छायाप्रधानो वृक्षः।छिद्रं-विवरम्। छिद्रदर्शनं-दोष-
छिद्रान्वेषी-दोषग्राही।छिन्नसंशयः-निस्संदेहः[(न्वेषी १)प्रदर्शकः
छुरिका-करवालिका।छेकानुप्रासः-परस्परसाम्यम्। [कूलक्रिया
छेकोक्तिः-श्लेषकारी।छेदनं-आरम्भकसंयोगविरोधिविभागानु-
छेमण्डः-मातृपितृविहीनो बालकः। जगच्चक्रं-जगतो जन्मस्थि-

[तिलयप्रवाहः
जगदीश्वरः-निखिलप्रपञ्चनियन्ता। जगन्नाथः-सृष्टिस्वामी।
जगत्-भूगोलकम्।जगती-द्वादशाक्षरपादच्छन्दः।जगत्कर्ता-सृष्टि-
जघनं-स्त्रीकटीपुरोभागः।जङ्गमः-गतिशक्तिसमन्वितः। [कर्ता
जङ्घा-अक्षाधारकाष्ठम् * १ जानुगुल्फयोरन्तरालोऽवयवः।
जटः-गीर्वाहीकः१अपरिच्छिन्नासभ्यवदनपरः,मैत्र्युपनिषट्टीका
जटा-जूटकचः१अन्योन्यसंलग्नकेशः। जठरपिठरं-उदरकुण्डम्।
जडः-मानापमानानभिज्ञः१वेदग्रहणासमर्थः२लोकव्यवहारान-
जडता-तूष्णीभावः। [भिज्ञः३स्वतःप्रत्ययाभाववान्
जडात्मा-बुद्धिरहितः। जनः-सुजनः। जनता-जनसमूहः।
जनकत्वं-उत्पादकत्वं१अनन्यथासिद्धत्वे सति नियतपूर्ववृत्तित्वं
जनवादः-जनप्रवादः१राजादिवार्ता [पनिबद्धशरीरग्रहणं
जन्म-आद्यशरीरप्राणसंयोगः१आत्मनि देहसंबन्धः२स्वादृष्टो-
जन्मप्राप्तिः-शरीरवियोगक्षणमारभ्य पुनः सुखाद्युपलब्धिपूर्वक्ष-
जन्मस्थानं-पैतृकभूमिः१उत्पत्तिस्थानम्। [णपर्यन्तमवस्थितिः
जपः-मन्त्रपाठः१प्रत्यहमावृत्तिः २ जिह्वा दग्धा परान्नेन हस्तौ
दग्धौ प्रतिग्रहात्,मनो दग्धं परस्त्रीभिर्जपसिद्धिः कथं भवेत्।
जम्बुद्वीपः-जम्बुवृक्षचिह्नितो द्वीपः। जम्भः-खादनस्थानम्।
जम्भलिका-गीतिविशेषः१उद्ग्राहो द्विःसकृद्वैकखण्डो द्विःश-
कलोथवा, यत्र ध्रुवो द्विराभोगो ध्रुवे मुक्तिः स जम्भकः।।२०९८

जयः-उत्कर्षलाभः १शत्रुपराङ्मुखीकरणम्।जयपत्रं-जयसूचकं पत्रं
जरायुः-गर्भवेष्टनचर्मपुटकम्।जरायुजशरीरं-जरायोर्जातं शरीरं
जर्जरा-शिथिलाङ्गी । जलचरः-जलेऽधिकं चरणशीलः ।
जलहारकः-उदकपरिचारकः। [पनावती विजिगीषुकथा
जल्पः-प्रलापः १वार्तालापः२परपक्षनिराकरणपूर्वकं स्वपक्षस्था-
जल्पकः-उन्मत्तप्रलापी।जल्पनं-वाचालता१वाग्विशेषकथनम्।
जहदजहल्लक्षणा-'भागत्यागलक्षणा'वदस्य लक्षणमनुसंधेयम्
जहल्लक्षणा-शक्यमात्रपरित्यागेन तत्संबन्ध्यर्थान्तरे वृत्तिः,यथा
गङ्गायां घोष इति गङ्गापदस्य तीरे। अजहल्लक्षणावारणाय
शक्यमात्रपरित्यागेनेति १लक्ष्यतावच्छेदकरूपेण लक्ष्यमात्र-
जाग्रज्जाग्रत्-प्रमाज्ञानम् । [बोधप्रयोजिका लक्षणा
जाग्रत्सुषुप्तिः-जाग्रदवस्थायां श्रमादिना स्तब्धीभावः२८००
जाग्रत्स्वप्नः-शुक्तिरजतादिभ्रमः। जाङ्गलः-कुरुदेशैकदेशः।
जाग्रदवस्था-इन्द्रियजन्यान्तःकरणवृत्त्यवस्था १दिगाद्यधिष्ठा-
तृदेवतानुगृहीतैरिन्द्रियैः शब्दादिविषयानुभवावस्था।सुषुप्ता-
वतिव्याप्तिवारणाय शब्दादीति, स्वप्नवारणाय दिगादीति।
जातिः-मात्रानि (यतम् १) योजिता* २समानज्ञानजननी ३भि-
न्नेष्वभिन्नाभिधानप्रत्ययनिमित्तम् ४ अनुगतबुद्धिव्यवहारहे-
तुभूतापरसामान्यम्,यथा गोत्वमनुष्यत्वब्राह्मणत्वशूद्रत्वादिः५
मनस्त्वात्मत्वातिरिक्तनित्यमात्रसमवेतान्यत्वे सति समवे-
तसत्तानाश्रयः६ अनिर्वचनीयबहुपदार्थघटितधर्मान्यतरधर्म-
रूपोपाधिभिन्नत्वे सति नित्यत्वे सत्यनेकव्यक्तिवृत्तिधर्मः।
घटादौ व्यभिचारनिरासाय नित्यत्वे सतीति,अखण्डोपाधिरू-
पाभावत्वादौ व्यभिचारनिरासायोपाधिभिन्नत्वे सतीति,ज-
लपरमाणुरूपादौ व्यभिचारनिवृत्तयेऽनेकव्यक्तिवृत्तित्वमिति

जात्युत्तरं-असदुत्तरम् १स्वव्याघातकमु० *२ स्वप्रतिबन्धक-
मु०३ सिद्धमपि दूषणासमर्थमुत्तरम् ४ छलादिभिन्नदूषणा०
जानुः-ऊरुजङ्घयोरन्तरालोऽवयवः । जामाता-दुहितृपतिः ।
जारत्वं-पराङ्गनाविषयकास्फुटानुरागवत्त्वम्।जालं-गवाक्षः ।
जिगीषा-जयेच्छा १जेतुमिच्छा।जिगीषुः-जयेच्छुकः। [च्छुः
जिघत्सा-भक्षणेच्छा।जिघांसुः-हन्तुमिच्छुः। जिघृक्षुः-ग्रहीतुमि-
जिजीविषुः-जीवनार्थी । [सिद्धये प्रवर्तिका इच्छा
जिज्ञासा-ज्ञातुमिच्छा १ अनुभवेच्छेति ग्रं० २ अज्ञातादिबुद्धि-
जिज्ञासुः-ज्ञातुमिच्छुः १आत्मज्ञानार्थिमुमुक्षुः।जितं-आयत्तीकृतं
जितक्रोधः-क्रोधपारवश्यरहितः । जिताक्षरः-सुपठितः१ वशी-
जितात्मा-स्वाधीनमनस्कः । [भूताक्षरकः
जित्वरः-विजयी । जिनः-जयशीलः । जिहीर्षुः-अपहर्तुमिच्छुः ।
जिह्मः-मन्दः१कुटिलः । जिह्वलः-तृष्णालुः। जिह्वा-सुधास्रावः।
जितेन्द्रियः-वशीकृतान्तर्बहिःकरणः १ श्रुत्वा स्पृष्ट्वाथ दृष्ट्वा च
भुक्त्वा घ्रात्वा च यो नरः, नहृष्यति ग्लायति वा स विज्ञेयो'
जीवः-ज्ञानदर्शनादिमानिति जैनाः १ सुखादिसमवायिकरणमि-
ति नै०२शेषत्वे सति कर्तेति वैष्णवाः३प्राणधारणानुकूलव्या-
पाराश्रयः ४ इन्द्रियविशिष्टशरीरवानिति ग्रं०५अविद्य (ाव-
च्छिन्नं चैतन्यम् ६ ोपहितं चैतन्यम् ७) ाप्रतिबिम्बितं चैतन्यम् ८
यद्वा,अन्तःकरण (ाभासश्चेतनः९ ावच्छिन्नं चैतन्यम् १०) प्र-
तिबिम्बितं चैतन्यम् ११ चैतन्यमित्येकजीववादे १२व्यष्टिस्थू-
लसूक्ष्मकारणशरीरत्रयोपहितश्चेतनः १३ आत्मनः प्रतिबिम्ब-
श्च देही जीवः स एव च, प्राणदेहादिभृद्देही स जीवः परिकीर्तितः
जीवनं-जीविका १प्राणधारणानुकूलो व्यापारः । [क्षाद्युपायः
जीवनचरितं-जीवनवृत्तान्तयुक्तो ग्रन्थः । जीवनहेतुः-शिल्पभि-

जीवन्मुक्तः-स्वतः परतश्च व्युत्थानाव्युत्थानरूपपञ्चमीष-
ष्ठ्यादिभूमिकायुक्तः १प्रारब्धकर्मनिवृत्तिपर्यन्तं (बाधितचि-
त्तादिमत्त्वम् २) सुषुप्तिवद्व्यवहर्ता ३ जीवदवस्थायां (त्यक्त-
संसारः ४) हर्षशोकादिरहितत्वे सति स्वस्वरूपज्ञानवत्त्वम् ।
जीवन्मुक्तिः-श्रवणादिभिरुत्पन्नसाक्षात्कारस्य विद्वत्संन्यासिनः
कर्तृत्वाद्यखिलबन्धप्रतिभासनिवृत्तिः १ स्वस्मिन्स्वदृशा सत-
ताध्यासाप्रतिभासे सति यावत्प्रारब्धं स्वचित्ताद्यवस्थितिः।
अज्ञसमाधौ लोकदृष्ट्याऽध्यासाप्रतिभासे सत्येव चित्ताद्य-
वस्थितिरस्तीति तत्रातिव्याप्तिवारणाय स्वस्मिन्स्वदृशेति,
तत्त्वज्ञानोत्तरक्षणिकवृत्त्यभावे व्यभिचारवारणाय सततेति
स्वपदमादिपदं च क्रमात्कस्यचिज्जीवन्मुक्तिसत्त्वे कस्मिंश्चिदज्ञे
यावत्प्रारब्धं चित्ताद्यवस्थितिसत्त्वात्तत्रातिव्याप्तिस्तथा व्यु-
त्थितस्थितप्रज्ञे चक्षुरादिसत्त्वात्तत्राव्याप्तिरिति तयोर्व्यावृत्त्यै।
जीवसाक्षी-व्यष्टिसङ्घातोपहितश्चेतनः १अन्तःकरण(ोपलक्षितं
चैतन्यम् २ ोपाधिकः साक्षी ३) तद्वृत्त्यन्यतरोपहितं चैतन्यम्
जीवाश्रयप्रमा-अनधिगताबाधितविषयाकारान्तःकरणवृत्तिप्र-
तिबिम्बिता चित् । स्मृतावतिव्याप्तिवारणायानधिगतेति ।
जुगुप्सा-परगुणानपह्नोतुमिच्छा १ गुणवतोपि दोषख्यानम् ।
जुहूः-पलाशकाष्ठनिर्मितार्द्धचन्द्राकृतियज्ञपात्रम्। जुष्टं उच्छिष्टं
जृम्भः-मुखादिविकाशः । ज्ञप्तः-ज्ञापितः । ज्ञप्तिः-ज्ञानम् १ती-
ज्ञप्तिस्वतस्त्वं-'स्वतोग्राह्य'वदस्य लक्षणमनुसंधेयम् [क्ष्णीकरणं
ज्ञातं-लब्धम् १विदितम् २ज्ञानभास्यम् ३ ज्ञाननिवर्त्याज्ञानविषयः
ज्ञातता-ज्ञानजन्यप्रकटता।ज्ञातसत्ता-ज्ञानसमकालीनविषयसत्ता
ज्ञाता-तत्त्वज्ञः १विषयचैतन्याभिव्यञ्जकान्तःकरणाज्ञानयोः परि-
ज्ञातिः-स्वजनः १पितृकुलजः। [णामात्मकवृत्त्युपहितं चैतन्यं

ज्ञानं-अर्थप्रकाशः १ सदसद्विवेकः २ प्रमेयनिश्चयः ३ आवरण-
भङ्गानुकूलो व्यापारः४ जीवब्रह्मणोरभेदनिश्चयः५ प्रत्यगा-
त्मनि देहाद्यतिरिक्तत्वप्रकारको देहादौ वा प्रत्यगात्मातिरि-
क्तत्वप्रकारको निश्चयः६ विषयचैतन्याभिव्यञ्जकान्तःकरण-
ज्ञानयोः परिणामरूपा वृत्तिः७ ज्ञायतेऽनेनेति करणव्युत्पत्त्या
वृत्तिज्ञानम्, ज्ञप्तिर्ज्ञानमिति भावव्युत्पत्त्या संविज्ज्ञानम् ।
ज्ञानकाण्डं-परमात्मैक्यादिज्ञानवादः१ज्ञेयार्थप्रतिपादको वेद-
ज्ञानकार्यं-अनात्मन्यात्मत्वबुद्ध्यभावः । [भागः
ज्ञानकारणं-श्रवणादित्रयम् । ज्ञानदुर्बलः-ज्ञानहीनो मूर्खः ।
ज्ञानगतप्रत्यक्षं-स्वव्यवहारनुकूलचैतन्यस्यानावृतविषयेण स-
हाभेदः १ तत्तद्व्यवहारानुकूलचैतन्यस्य तत्तदर्थाभेद इति
ग्रं० २स्वाविषयविषयकज्ञानाजन्यज्ञानम् । विशेषणज्ञानजन्य-
विशिष्टज्ञानेऽव्याप्तिवारणाय स्वाविषयविषयकेति ३अपरो-
क्षार्थगोचरव्यवहारजनकत्वयोग्यज्ञानम् ४अयोग्यप्रमाणाज-
न्यत्वे सति वर्तमानयोग्यविषयचैतन्याभिन्नप्रमाणचैतन्यत्वं
ज्ञानदण्डत्वं-परमपुरुषार्थपदाश्रयत्वं १अज्ञानतत्कार्यदमनहेतुत्वं
ज्ञाननिवर्त्यत्वं-ज्ञानप्रयुक्तावस्थितिसामान्यविरहप्रतियोगित्वं
ज्ञानप्रतिबन्धकत्वं-ज्ञानोत्पादप्रयोजकीभूतधर्मविघटकत्वम् ।
ज्ञानपतिः-ज्ञानोपदेशकगुरुः । [अनात्मन्यात्मत्वबुद्ध्यभावः
ज्ञानफलं-वर्तमानलिङ्गदेहनिवृत्तिः १ भाविजन्मानारम्भो वा२
ज्ञानभूमिका-ज्ञानेतरकर्माद्यनधिकारित्वे सति ज्ञानस्यैवाधि-
ज्ञानयोगः-ब्रह्मज्ञानप्राप्त्युपायः।ज्ञानमयः-ज्ञानस्वरूपः [कारित्वं
ज्ञानरक्षा-उत्पन्नब्रह्मसाक्षात्कारस्य पुनः संशयविपर्ययानुत्पत्तिः
ज्ञानलक्षणसन्निकर्षः-स्वविषयविषयकप्रत्यक्षजनको ज्ञानविशेषः
ज्ञानसंपन्नः-ब्रह्मज्ञानपरिपूर्णः । ज्ञानशास्त्रं-ज्ञानप्रदायकं शास्त्रम्

ज्ञानात्मा-सर्वविद् १ ज्ञातृत्वोपाध्यहङ्कारावच्छिन्नं चैतन्यम्।
ज्ञानाध्यासः-अतस्मिंस्तद्बुद्धिः, यथा शुक्तौ रजतबुद्धिर्यथा
वात्मन्यनात्मबुद्धिः। [कपरत्वञ्च ज्ञानाभ्यासं विदुर्बुधाः
ज्ञानाभ्यासः-तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम्, एतदे-
ज्ञानावधिः-पुनः संशयविपर्ययाद्यनुत्पादः। ज्ञानी-ज्ञाननिष्ठः।
ज्ञानेन्द्रियं-ज्ञानकरणमिन्द्रियम् १ अपञ्चीकृतपञ्चमहाभूत-
कार्यत्वे सति शब्दाद्युपलब्धिसाधनम्। [नजनकः
ज्ञापकः-संवादस्य वेदयिता १ज्ञानानुकूलशब्दः २ तद्विषयकज्ञा-
ज्ञापनं-प्रकाशनम् १ज्ञानानुकूलव्यापारानुकूलव्यापारः। [च्छा
ज्ञाप्यं-बोध्यम् १ज्ञानजन्यम् २ जन्यज्ञानविषयः। ज्ञीप्सा-ज्ञाने-
ज्ञेयः-ज्ञातव्यार्थः १ ज्ञानेऽतिशयाधायकः २विषयचैतन्याभिव्य-
ज्या-जरा [ञ्जकान्तःकरणाज्ञानयोः परिणामात्मकज्ञानविषयः
ज्ञेयगतप्रत्यक्षत्वं-योग्यत्वे सति प्रमातृचैतन्याभिन्नत्वम् २९२४
ज्ञेयचैतन्यं-घटाद्यवच्छिन्नं चैतन्यम्। [क्षणवृत्तित्वं
ज्येष्ठः-बहुतरसूर्यस्पन्दान्तरितजन्यः १ तत्प्रागभावाधिकरण-
ज्योतिः-चिन्मात्रम् १सर्वार्थप्रकाशकम्।ज्येष्ठांशः-उत्तमभागः।
ज्यौतिषं-ग्रहसंस्था(सूर्यादिगत्या)दिप्रतिपादकं शास्त्रम् २सूर्या-
दिज्योतिर्द्वारा कर्मानुष्ठानकालनिर्णयेष्टानिष्टफलप्रदर्शकम्
झटिति-सत्वरम् १त्वरितम्।झणझणं-झङ्कारः ☞ झ
झर्झरः-झिल्लिकः। झल्लः-लकुटयोद्धा। झषः-तापः १मत्स्यः।
टङ्कः-दारणः।टङ्कः-रजतमुद्रा।टट्टरी-वाद्ययन्त्रम् ☞ ट
टङ्कारः-विस्मयध्वनिः १अव्यक्तानुकरणम् २धनुर्गुणाकर्षणशब्दः
टिप्पनी-निःशेषपदव्याख्यारूपा १मूलटीकान्यतरार्थबोधक्षमत्वं
टीका-विवरणग्रन्थः १मूलार्थप्रकाशकवृत्तिः २विषमपदव्याख्या
डमरुः-चमत्कारः। डवित्थः-काष्ठमयमृगः। ☞ ड

डित्थः-काष्ठमयहस्ती १निपुणमनुष्यः२ श्यामरूपो युवा विद्वा-
न्सुन्दरः प्रियदर्शनः, सर्वशास्त्रार्थवेत्ता च डित्थ इत्यभिधीयते
तक्षणः-वर्धकिः १द्विचत्वारिंशदङ्गुलः ☞ त
तटस्थः-वादिप्रतिवादिभावानापन्नः १तद्भिन्नत्वे सति तद्बोधकः
तटस्थलक्षणत्वं-लक्ष्यरूपाद्बहिःस्थितत्वम् १लक्ष्यापायाप्रयोज-
कापायकत्वम् २कादाचित्कत्वे सति व्यावर्तकत्वम्,यथा देव-
दत्तस्य तिलकादिकम् । स्वरूपलक्षणेतिव्याप्तिवारणाय सत्य-
न्तम्,लक्ष्यावृत्तितादृशधर्मेऽतिव्याप्तिवारणाय व्यावर्तकेति ।
तत्पुरुषसमासः-उत्तरपदार्थप्रधानः समासः १ समासप्रयुक्तल-
क्षणाशून्योत्तरनामपदकत्वे सति लुप्तद्वितीयादिविभक्तिपूर्व-
कनामपदकसमासः। पञ्चफलीत्यादिवारणाय सत्यन्तम्,नी-
लोत्पलादिवारणाय लुप्तेत्यादि २तत्पुरुषपरिभाषाविषयत्वं
तत्त्वं-यथार्थम् १तादृशविषयनिष्ठविषयत्वम् । तत्परः-संलग्नः।
तत्त्वज्ञानं-यथार्थज्ञानम्※१आत्मसंबन्धिज्ञानम् २जीवब्रह्मणो-
रभेदनिश्चयः ३ इदं सर्वं द्वैतजातमद्वितीये चिदानन्दात्मनि
मायया कल्पितत्वान्मृषैव आत्मैवैकः परमार्थसत्यः सच्चि-
तत्त्वविद्-दार्शनिकः । [दानन्दाद्वयोऽहमस्मीति ज्ञानं
तत्त्वम्पदार्थशोधनं-वस्तुस्थितिः १यद्यद्वयवृत्तं तत्तदनात्मा यद-
तथाहि-उक्तार्थदृढीकरणम् । [न्वयि तदात्मेति निश्चयः
तदर्थः-तदुपकारकः १उपकार्योपकारकभावः। तदर्हः-तस्यार्हः।
तद्भिन्नत्वं-तत्प्रतियोगिकभेदवत्त्वम् । तदासक्तः-तत्परायणः।
तद्रूपः-तन्मयः।तद्रूपता-सादृश्यम्। [सूक्ष्मवस्तुग्रहणयोग्यता
तनुमानसाज्ञानभूमिका-निदिध्यासनाभ्यासेन मनस एकाग्रतय
तनुव्यसनं-तनुपोषणे साभिनिवेशप्रवृत्तिः १ शरीरपुष्ट्याद्यर्थं।
तन्तुकीटः-तन्तूत्पादकः कीटः [रसायनभक्षणादीच्छाहेतुर्व्यसनं

तन्त्रं-दृढप्रमाणम् १इतराधीनम् २स्वराष्ट्रचिन्ता*३विस्तारा-
भावः ४ उभयार्थैकप्रयोग इति मी० ५ एकवारं कृतं कर्म
नानाप्रधानानामङ्गभूतम् ६अवयवार्थनिरपेक्षत्वे सति समु-
दायार्थोपस्थापकम् ७सकृदुच्चारितत्वे सत्यनेकार्थबोधकत्वम्
तन्द्रा-प्रमीला १शिथिलता।तन्द्रालुः-निद्रालुः। तन्द्री-विश्रान्तः।
तपः-कामानशनम् १ समनस्केन्द्रियाणामैकाग्र्यम् २क्षुत्पिपा-
साशीतोष्णादिद्वन्द्वसहनम् ३शास्त्रीयमार्गेण कायेन्द्रियशोष-
णम् ४ अन्तर्मुखानि यदि खानि तपसा ततः किं ! नान्तर्मु-
खानि यदि खानि तपस्ततः किम्, अन्तर्बहिर्यदि हरिश्च
तपसा ततः किं !, नान्तर्बहिर्यदि हरिश्च तपस्ततः किम् ।
तपस्या-तपश्चरणम्। तपस्वी-तापः १तपोनिष्ठः २पारिकाङ्क्षी।
तमः-तेजोऽभावः १स्वरूपाप्रकाशकः २ स्पर्शरहितत्वे सति रू-
पवत् । आकाशादिवारणाय रूपवदिति, पृथिव्यादिवारणाय
तमोगुणत्वं-गुरुत्वे सत्यावरकत्वे सति मोहकत्वम् । [सत्यन्तं
तमोनुदः-प्रलयगताज्ञानध्वंसकर्ता । तरङ्गितः-जाततरङ्गः ।
तरः-नदीतरणवेतनम् ।तरी-आर्द्रता १काष्ठाम्बुवाहनी ३७४०
तर्कः-अनिष्ट(पादानम् १) प्रसंजकः २आत्मविचाराधीनोऽर्था-
वग्रहः ३व्याप्यारोपेण व्यापकारोपः,यथा यदि पर्वते वह्निर्न
स्यात्तर्हि धूमोपि न स्यात् ४यद्वा-प्रपञ्चः सत्यः स्यात्तर्ह्य-
द्वैतश्रुतिविरोधः स्यात् ५यदि परमात्मा जीवभिन्नः स्यात्तदा
घटादिवदनात्मत्वेनानित्य एव स्यादित्यादिः ६युक्त्यार्थनि-
र्णयः ७व्यभिचारादिशङ्कानिवर्तक इति ग्रं० ८ऊहापोहात्मिका
तर्कवितर्कः-शास्त्रसङ्घर्षः १वादविवादः । [विचारशक्तिः
तर्कुः-सूत्रवेष्टनम् १ सूत्रनिर्माणयन्त्रम् । [ष्टाभिर्भीजननं
तर्जनं-नासाग्रेऽङ्गुलिन्यासनयनभ्रामणदन्तदर्शनप्रभृतिमुखचे-

८ तमोवि विपुलानर्थान् तत्वमन्त्रसमन्वितान् । त्राणं च कुरुते यस्मात् तन्त्रमित्यभिधीयते

तर्जितः-निगृहीतः।तर्षः-अर्थकामतृष्णा।तस्करः-परवित्तापहारः
तात्पर्यं-वक्तुरिच्छा १ वाक्यार्थप्रतीतिजनकतयाभिप्रेतत्वम् ।
तात्पर्यानुपपत्तिः-मुख्यार्थप्रत्यायने सति तात्पर्यस्यानुपपन्नत्वं
तादर्थ्यं-तन्निमित्ता १तदिच्छाधीनेच्छाविषयव्यापाराश्रयत्वम् ।
तादात्म्यं-भेदसहिष्णुरभेदः १ भेदाभेदबुद्धिनियामकः संबन्ध-
विशेष इति सां० २ तत्सत्तातिरिक्तसत्ताकत्वाभावः ३ त-
द्भिन्नत्वे सति तद(भेदेन प्रतीयमानम्४)भिन्नसत्ताकत्वम् ।
तादृशं-तुल्यदर्शनम् । तानः-दीर्घस्वरः । तान्दूरं-द्वारबद्धतप्त-
तापः-प्रतिकूलवेदनीयः । तापनं-अपायदर्शनम् । [यन्त्रं
तापी-यमुना १आरट्टदेशवाहिनी नदी । [विपर्ययविशेषः
तामिस्रः-दुःखसाधने विद्यमानेपि किमपि दुःखं मे माभूदिति
तारतम्यं-न्यूनाधि (क्यम् १) कभावः । तालुः-जिह्वाश्रयः ।
तितिक्षा-परापराधसहनम् १अतिक्रमसहनम् * २ शीतोष्णा-
दिद्वन्द्वसहिष्णुता । [सूक्ष्मरूपतया प्रलीनं
तिरोहितः-अन्तर्हितः १आच्छादितम् २नामरूपविभागत्यागेन
तिरोभावः-व्यवहारायोग्यत्वम्।तिरोभूतः-अन्तर्हितः। [दकः
तीक्ष्णः-कुशाग्रः १ आत्मत्यागी २वेदनाकारी ३ शरीरेन्द्रियभे-
तीर्थं-पापत्राणम् १पवित्रस्थानम् २पुण्यक्षेत्रम् ३ अवतरणप्रदेशः
तीव्रतरवैराग्यं-पुनरावृत्तिसहितं ब्रह्मलोकादिपर्यन्तं मास्त्व-
ति स्थिरबुद्ध्या विषयजिहासा । [विषयजिहासा
तीव्रवैराग्यं-अस्मिञ्जन्मनि पुत्रदारादि मास्त्विति स्थिरबुद्ध्या
तुमुलं-रणसङ्कटम् । तुम्बी-अलाबूः । तुला-उन्मानसाधनम् ।
तुरी-कुविन्दस्य काष्ठादिनिर्मितस्तन्तुवयनसाधनविशेषः ।
तुरीयावस्था-ब्रह्मध्यानावस्थस्य पुनः पदार्थान्तरापरिस्फूर्तिः
तुलितः-सदृशीकृतः । तुल्यतर्कः-रूपकैरुपमाभिश्च अप्रत्यक्ष-

स्य वस्तुनः, तुल्यार्थत्वेन संस्पर्शस्तुल्यतर्कः प्रदर्शितः॥४८०१
तुल्यत्वं-अन्यूनानतिरिक्तव्यक्तिकत्वम् १स्वभिन्नजातिसमनिय-
तत्वं वा २एकाकारप्रतीतिजनकधर्मवत्त्वम् [साम्याभिधानं
तुल्ययोगोपमा-समानजातीयक्रियाकरणेन प्रस्तुताप्रस्तुतयोः
तुल्यबलविरोधः-अन्यत्रान्यत्र लब्धावकाशयोर्द्वयोः शास्त्रयो-
तुल्यवित्तिवेद्यः-एकज्ञानविषयः। [रेकत्र युगपत्प्राप्तिः
तुष्टिः-संतोषशक्त्यधिष्ठात्री १भोग्येष्वेतावताऽलमिति बुद्धिः२
तुष्टात्मा-संतुष्टचित्तः। [अधिगतार्थादन्यत्र तुच्छत्वबुद्धिः
तूणीरः-चलस्तूणः १ रथबाह्यो बाणकोशः। तूर्णं-शीघ्रगामी
तूलाविद्या-घटाद्य(उपाध्य)वच्छिन्नचैतन्याच्छादिकाऽविद्या।
तूवरकः-बहुभोजनः। तूष्णींयुद्धं-योगगूढोपजापैर्घातनम्। [त्वं
तृतीयात्वं-पच्यर्थधर्मिककरणत्वान्वयबोधानुकूलसुप्सजातीय-
तृप्तः-तृप्तिमान् १अपगतक्षुधः। [यविशेषसंपर्कजं सुखं
तृप्तिः-फलेच्छाविच्छेदः १भोजनजनिता क्षुधानिवृत्तिः२विष-
तृष्णा-पुनर्भावप्रार्थनेति जैनाः १इदं मे न क्षीयतामितीच्छा२
प्राप्यमाणेष्वप्यर्थेष्वतृप्तिरिति ग्रं० ३यावदीप्सितद्रव्यप्राप्तौ
तृषार्तः-तृष्णयाभिभूतः [सत्यामपि पुनस्ततोधिकद्रव्याकांक्षा
तेजः-कायकान्तिः १ अप्रतिहताज्ञा२ पराभिभवसामर्थ्यं वा ३
स्त्रीबालकादिभिर्मूढैरनभिभाव्यत्वम् ४ अधिक्षेपापमानादेः
प्रयुक्तस्य परेण यत्, प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम्५
उष्णस्पर्शवत्६ तेजस्त्वसामान्यवद्वा७चन्द्रचामीकरसमवेतत्वे
तेजितः-तीक्ष्णीकृतः। [सति ज्वलनसमवेतं सामान्यं
तेजस्वी-परप्रयुक्तापमानाद्यसहनशीलः। तेजोमयं-ज्योतिर्मयम्
तैक्ष्ण्यं-तीक्ष्णता विषादादिना बीभत्सकर्मकारित्वम्॥४०१०
तैजसजीवः-स्वप्ने व्यष्टिसूक्ष्मशरीराभिमानी जीवः१व्यष्टिसू-

क्ष्मकारणशरीरद्वयोपहितं चैतन्यम्। तैजसं-रजोगुणोत्पन्नम्।
तोटकं-संरम्भवचनम् १ द्वादशाक्षरपादच्छन्दः २ सप्ताष्टनव-
पञ्चाङ्गं दिव्यमानुषसंश्रयम्, तोटकं नाम तत्प्राहुः प्रत्यङ्कं
तोमरः-शर्वला १ हस्तक्षेप्यः सशल्यो दण्डः। [सविदूषकं
तोलः-पण्णवति रक्तिका। तोषः-अलम्बुद्धिः। तोषणः-हर्षणः।
त्यज्यमानः-दूरीक्रियमाणः। [र्यादानुसारेण चेतनरक्षणोद्योगः
त्यागः-दोषापाकरणम् १ स्वत्वध्वंसानुकूलव्यापारः २ शास्त्रम-
त्रसरेणुः-त्रयोऽणुवः १ द्व्यणुकत्रयात्मकरजः २ परमाणुषट्कसंव-
त्राटकं-अश्रुसंपातपर्यन्तं सूक्ष्मलक्ष्यनिरीक्षणम्। [द्वरेणुः
त्रस्तः-भीतः १ उद्विग्नः। त्रस्नुः-विह्वलः १ त्रासशीलः। [त्पादनं
त्रासनं-भयोत्पादनम् १ मदाद्यवस्थाभवैर्दुष्टचेष्टितैः साध्वसो-
त्राणं-अनिष्टनिवृत्त्यनुकूलो व्यापारः। त्रिगतं-स्फुटभाव्यर्थकथनं
त्रिपुटी-त्रिवृता १ त्रयाणां पुटानां ज्ञानप्रकाराणां समाहारः।
त्रिभद्रं-मैथुनम् १ स्त्रीप्रसङ्गः। त्रिविक्रमः-वामनावतारः।
त्रिवृत्करणं-प्रत्येकं भूतत्रयं त्रिस्त्रिर्विभज्य सर्वेषां तृतीयांशां-
स्त्रेधा विभज्य सर्वत्र मेलनम् १ त्रीणि भूतानि द्विधा विदार्य
प्रतिभूतमेकैकमर्द्धं द्विधा प्रस्फोट्य इतरभूतार्द्धद्वये योजनं
त्रुटिः-द्विनिमेषः १ क्षणद्वयात्मककालः * २ अवयवादिहीनता
त्रिष्टुप्-चतुश्चत्वारिंशदक्षरकच्छन्दः। त्र्यणुकं-संयुक्ताणुषट्कं
त्वगिन्द्रियं-स्पर्श(ग्राहकत्वं त्वक्यत्वम् १) ोपलब्धिसाधनमिन्द्रियं
त्वं-तत्कालीनसंबोध्यचैत्रत्वमैत्रत्वादिविशिष्टः। त्रोत्रं-अङ्कुशः।
त्वरितः-सवेगः १ विलम्बाभावः। त्वरितोदितं-शीघ्रोच्चारितम्
त्वष्टा-रूपनिर्माता। त्वादृक्षः-त्वत्सदृशः। त्सरुः-खड्गमुष्टिः।
थूत्कारः-निष्ठीवनत्यागानुकरणशब्दः ☞ द
दंशः-सूचीमुखः। दंष्ट्रा-परपीडाकरः। दंष्ट्री-दुर्जनः १ कच्छकालुः

नामाग्रेऽङ्गुलिन्यासनमनाभाषणदन्तदर्शनप्रभृतिभिर्मुखे

दक्षः-क्षिप्रकारी १ लौकिकवैदिककार्यकुशलः २ यत्नशीलः ।
दक्षिणत्वं-शरीरावयववृत्तिजातिविशेषः*१मेरुव्यवहितदेशा-
दग्धः-कृतदाहः१भस्मीकृतः । दघनं-घातनम्। [वच्छिन्नत्वं
दण्डः-दमनकः१दुष्टनिग्रहः२ग्रहणपूर्वकशासनम् ३घटिकामा-
दंडधरः-न्यायाधीशः१दुष्टनिग्रहकारः। [त्रकालः४हस्तचतुष्टयं
दण्डपालः-सैन्यसेनामुखादिनेता । [प्रहृत्य प्रवृत्तं युद्धं
दण्डशास्त्रं-दण्डविधायकं शास्त्रम् । दण्डादण्डि-दण्डैश्च दण्डैश्च
दत्तः-मातापितृभ्यां समर्पितः । [यद्दानं दत्तमित्यभिधीयते
दत्तकर्म-शरणागतसंत्राणं भूतानामप्यहिंसनम् , वहिर्वेदि च
दत्तानुकीर्तिः-स्वस्य वदान्यत्वप्रकाशनम् । दन्तः-चर्वणसाधनं
दन्तकाष्ठं-दन्तधावनार्थं काष्ठम् । दन्त्यः-दन्तमूलीयः ।
दन्दशूकः-हिंस्रः १ भृशन्दंशनशीलः २ परमर्मप्रहरणशीलः ।
दमः-मदत्यागः१दुष्टदमनम् * २ बाह्यवृत्तिनिवर्तनम् ३बाह्ये-
न्द्रियस्थैर्यम् ४ बाह्यकरणोपरतिः ५ब्रह्मज्ञानोपयोगिव्यापा-
दमितः-निरोधकः । [रातिरिक्तव्यापारमात्रनिरोध इति ग्रं०
दम्भः-आडम्बरः १ वञ्चकता२वञ्चनानुरूपवेषः३परविस्र-
म्भार्थं धर्माद्याचरणम् ४ लाभपूजाख्यात्यर्थं परेषामग्रे स्व-
जपध्यानादिप्रसङ्गं विना प्रकटीकरणमिति ग्रं० ५ वेषभा-
षाक्रियाचातुर्यादिभिः स्वमहत्त्वप्रकटनम् ६धर्मध्वजित्वम् ।
दम्भी-विश्वस्तवञ्चकः । दम्यः-दण्डनीयः । दम्पती-पतिपत्नी।
दया-परदुःखासहनम् १ दुःखिनं प्रत्यनुजिघृक्षा२परदुःखप्रहा-
णेच्छा ३ परे वा बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा, आत्मवद्व-
दयालुः-कृपालुः । [र्त्तितव्यं हि दयैषा परिकीर्तिता
दयापाशः-क्वचिज्जडभरतस्य मृगशावके इव जन्मान्तरसंपादकः
दयाहीनः-कठोरहृदयः । दरिद्रः-निष्किञ्चनः१लुब्धचित्तः ।

दरी-गह्वरः १ कन्दरा । दर्दुरः-मण्डूकः १ ग्रामजालम् ।
दर्पः-शौर्यादिमदः १ भर्त्सनादि(पु दृढबुद्धिः२)हेतुभूतो मानसो
विकारविशेषः ३ धनस्वजनविद्यानिमित्तश्चित्तस्योत्सेकः ।
दर्पकः-मदोत्पादकः । दर्पघातिनी-पुरुषसंभोगसुखहारिणी ।
दर्पणः-आत्मदर्शः१छायाग्रहः२रूपदर्शनसाधनम्।दर्पितः-मदा-
दर्यः-दयासाधनम् १ भयसा० २पाषाणसंश्लेषस्थानम्। [न्वितः
दर्वी-चटुका १ व्यञ्जनादिदारकः। दर्शकः-द्रष्टा १ दर्शयिता ।
दर्शः-अमायां क्रियमाणो यज्ञविशेषः । दशनं-दंष्ट्राव्यापारः ।
दर्शनं-विचारप्रयोजकज्ञानम् १तत्त्वज्ञानसाधनशास्त्रम्। [णेता
दशा-दौस्थ्यरूपावस्था । दाक्ष्यं-अनालस्यम् । दाण्डिकः-दण्डप्र-
दानं-आर्तेभ्यः पात्रेभ्यः यथेष्टार्थवितरणम् १स्वस्वत्वनिवृत्त्यनु-
कूलव्यापारः२गोहिरण्यादीनां स्वकीयानां मूल्यग्रहणं विना
शास्त्रोक्तवर्त्मना स्वस्वत्वपरित्यागपूर्वकं परस्वत्वापादनम्।
दान्तः-विषयचापलरहितः १तपःक्लेशादिसहनकर्ता२अन्तःक-
दायः-यौतकः१पितृपितृव्यादिधनम् । [रणतृष्णातो निवृत्तः
दारुणः-भयानकः१प्राणापहारकः। दार्ष्टान्तिकः-दृष्टान्तेन युक्तः
दासी-परिचारिका। दास्यं-कर्मकरत्वम् १तद्दासोस्मीत्यभिमा-
दाहः-अत्यन्तानलसंयोगजन्यनाशः। दाहकः-भस्मकर्ता। [नः
दिक्-ककुभ्:१अकालत्वे सत्यविशेषगुणा महती २ प्राच्यादि-
व्यवहारासाधारणहेतुः । आकाशादिवारणायासाधारणेति
दिगम्बरः-कौपीनमात्रमपि परिग्रहहीनः । दित्सुः-दातुमिच्छुः
दिदृक्षुः-द्रष्टुमिच्छुः।दिधक्षमाणः-दाहनेच्छुकः। दीप्तिः-भासनं
दिनं-भास्वरं१सूर्यकिरणावच्छिन्नकालः।दिवसः-पञ्चदशमुहूर्तः
दिष्टं-यथादेशं यथाकालं यथारूपं च वर्ण्यते, प्रत्यक्षं च परोक्षं
दिष्टिः-हर्षः१मङ्गलवृत्तान्तः। [च तद्दिष्टमिति कीर्तितं

दीक्षा-मौञ्ज्यादिलक्षणकर्तृनियमविशेषः१गुरुमुखात्स्वेष्टदेव-
मन्त्रग्रहणम् २दीयते ज्ञानसद्भावः क्षीयते पशुबन्धना, दानक्ष-
दीनः-दुःखितः१क्षीणदर्पः। [पणसंयुक्ता दीक्षा तेनेह कीर्तिता
दीनारः-सुवर्णभूषणम्। दीपकालङ्कारः-सकलवाक्योपका-
दीप्तः-दाहकः१प्रज्वलिताग्निः२पराभिभवसमर्थः। [रकः
दीर्घदर्शी-सर्वकालपरामर्शी१विलम्बकालभाविफलदर्शनशी-
दीर्घदृष्टिः-दूरदर्शिता। दीर्घनिद्रा-दीर्घकालीननिद्रा। [लः
दीर्घसूत्रता-चिरकारिता। [कार्यं मासेनापि न करोति
दीर्घसूत्री-क्रियामन्दः१चिरकाले कार्यसंपादकः२क्षणैकसाध्य-
दुःखं-पीडाकारकम्१ सर्वेषां प्रतिकूलतया वेदनीयम्२इतरद्वे-
षानधीनद्वेषविषयः। सर्पादावतिव्याप्तिवारणायेतरद्वेषान-
धीनेति३द्विष्टसाधनताविषयकजन्यज्ञानाजन्यद्वेषविषयगुणः।
दुकूलं-क्षौमाम्बरम्। दुरत्ययः-दुरभिभवः। दुरन्तभावः-वेला-
दुरवस्थः-दुर्दशाग्रस्तः। दुराक्रमणं-दुरूहस्थानम्। [तीतस्नेहः
दुराग्रहः-मूर्खता१विरुद्धविषयकोऽभिनिवेशः। [मिनी
दुराचारः-धर्मविप्लवः। दुराचारिणी-अपचरित्रा१परभर्तृगा-
दुरात्मा-दुष्टप्रयत्नकः१ पीड्यापीड्यसाधारणपीडोत्पादकः।
दुराधरः-दुष्प्रापः। दुराधारः-शास्त्राज्ञातोपि मनसिधर्तुमश-
दुरावर्तः-दुःखेनापि सिद्धान्तं ग्राहयितुमशक्यः। [क्यः
दुर्गतः-दरिद्रः। दुर्गमः-कर्तुमशक्यः। दुर्गा-नववर्षा कन्या।
दुर्गपालः-गिरिजलवनादिदुर्गसंततरक्षकजननिर्वाहकः ३४०२
दुर्ग्रहः-दुर्वासनाप्रचयः। दुर्घटः-असंभवः। दुर्जयः-जेतुमशक्यः।
दुर्ज्ञेयः-बोधागम्यः। दुर्दर्शः-दुर्घटदर्शनः। दुर्दान्तः-अशक्यशिक्षः।
दुर्जनः-खलपुरुषः। दुर्दिनं-मेघच्छन्नदिनं। दुर्द्रुमः-विषकण्टकवृक्षः
दुर्धर्षः-प्रसोढुमशक्यः। दुर्द्यूतं-कपटद्यूतम्। दुर्धी-अविद्यावृतज्ञानः

दुर्निमित्तं-अपशकुनम् । दुर्निवारः-अजयः । दुर्नीतं-दुश्चरणम् ।
दुर्नीतिः-कुत्सितपद्धतिः । [तदुपकारापकाराशक्तः
दुर्बलः-शिथिलः१विद्यादिबलहीनः २ स्वतोर्थसाधनासमर्थः३-
दुर्बादः-मानहानिः। दुर्बालः-खल्वाटः। दुर्बुद्धिः-दुष्टमेधस्कः।
दुर्भगः-मन्दभाग्यः १ निष्फलोद्योगः २ द्वन्द्वैरनभिभूयमानः ।
दुर्भरः-पोषयितुमशक्यः।दुर्भिक्षं-अवग्रहः१ईतिबाधा२भिक्षाया
दुर्मदः-मद(ोग्रः१)मत्तः२महामत्तः३उत्तरकार्यान्धः। [अभावः
दुर्मनाः-दुःखितचित्तः । दुर्मरः-दुःखेनापि मर्तुमशक्यः ।
दुर्मर्यादः-दुश्शीलः१दुष्टनैतिकः।दुर्मुखः-मुखरः१अप्रियंवदः।
दुर्लभः-दुष्प्रापः१ लब्धुमशक्यः। दुर्ललितः-दुश्चे(ष्टः१)ष्टितः
दुर्वचनं-अन्यैर्वक्तुमशक्यः । दुर्विज्ञेयः-शास्त्रतोपि ज्ञातुमशक्यः
दुर्विदग्धः-नागरकभावमवाप्तस्तद्भूमिकामवलम्बमानः ।
दुर्विनीतः-दुःशिक्षितः१कुटिलनीतिकः। दुर्विवेक्ता-दुष्टविवे-
दुर्वृत्तः-वेदविरुद्धवृत्तिविशिष्टः।दुर्व्रतः-अवज्ञाकारी। [ककर्ता
दुश्चरितं-गर्हिताचरणम्।दुश्शीलः-धर्मभ्रष्टः१दुराचाररतः।
दुष्करं-दुर्व्यापारः१कर्तुमशक्यम् । दुष्कुलीनं-नीचवंशोत्पन्नम्।
दुष्कृतं-दुराचरितम् । दुष्टः-द्वेषाद्याक्रान्तः१दुष्टतानियामकः
दुष्टात्मा-कुटिलस्वभावः। दुष्टिः-चरित्रभ्रंशः१भ्रष्टावस्था।
दुष्प्रापः-दुरापादनम् । दुष्प्रेक्ष्यः-दुर्निरीक्ष्यः। दुस्तर्कः-मिथ्या-
दुहिता-दूरे सति सा पितुः हिता पथ्यं भवतीति। [वादविवादः
दूतः-संदेशहरः । दूरः-विप्रकृष्टः । दूरदर्शनं-दूरस्थवस्तुग्रहणं
दूषकः-दोषोत्पादकः१सदोषत्वसंपादकः। दूषिका-चक्षुर्मलः।
दूरश्रवणं-दूरस्थशब्दग्रहणम् । [सरूपयुक्तिभिः खण्डनं
दूषणं-दोषजनकम् १ अपवित्रीकरणम् २ बाधकप्रमाणोपन्या-
दूषितः-प्राप्तदोषः१आक्षारितः २ अधःपतितः३चरित्रभ्रष्टः।

दृढः-अचलः १हृष्टपुष्टः २परिपक्वः ३अप्रशिथिलः। [श्रयः
दृढज्ञानं-असंदिग्धाविपर्यस्तो निश्चयः। दृढबुद्धिः-अभेद्यनि-
दृढभक्तिः-अभेद्यस्नेहः।दृढमुष्टिः-अशिथिलमुष्टिकः। [र्वाहकः
दृढवैरी-करुणाशून्यः।दृढव्रतः-अप्रच्युतसङ्कल्पः १अङ्गीकृतनि-
दृढसङ्कल्पः-फलोदयपर्यन्तकर्मकर्ता।दृतिः-भस्त्रा १चर्मपुटकः।
दृश्यं-द्रष्टुं योग्यम् १फलविषयत्वं दृश्यत्वम् २भानभास्यत्वम् ३
वृत्तिप्रतिफलितचिद्विषयत्वम् ४स्वसमसत्ताकज्ञानविषयत्वं
दृष्टकूटं-कूटप्रश्नः १ कूटार्थभाषितवाक्यम् २अन्यार्थत्वे सत्य-
न्यार्थबोधकत्वम् ३पर्वताग्रे रथो याति भूमौ तिष्ठति सारथिः,
भ्रमँश्च वायुवेगेन पदमेकं न गच्छति'कुलालचक्रम्'४पञ्चभर्त्री
न पाञ्चाली द्विजिह्वा न च सर्पिणी, श्यामास्या न च मार्जारी
दृष्टप्रत्ययः-संदेहरहितः। [यो जानाति स पण्डितः 'लेखनी'
दृष्टान्तः-दृष्टः अन्तोऽवसानं निर्णयो यस्मिन् १निश्चितसाध्य-
कः २लौकिकवैदिकानां यत्रार्थे प्रतिपत्तिसाम्यं स,यथा महा-
नसम् ३वादिप्रतिवादि(संमतोर्थः४निर्णीतोर्थः५)नोः साध्य-
साधनोभयप्रकारकतदभावद्वयप्रकारकान्यतरनिश्चयविषयः
दृष्टार्थापत्तिः-अनुपपद्यमानदृष्टार्थज्ञानात्तदुपपादकीभूतार्था-
न्तरकल्पनम्,यथा दिवाऽभोजिदेवदत्ते रात्रिभोजनमन्तरा-
नुपपद्यमानपीनत्वदर्शनात्तदुपपादकीभूतस्यार्थान्तरस्य(रा-
दृष्ट्वा-ज्ञात्वा। दृष्टिगोचरः-चक्षुर्विषयः। [त्रिभोजनस्य)कल्पनं
दृष्टिः-दर्शनम् १कृपाकटाक्षः २चक्षुर्द्वारा रूपोपलब्धिहेतुर्मनो-
वृत्तिः ३चलस्य चेतसो या स्यादुदासीनेषु वस्तुषु, अवारणीया
दृष्टिपथः-दृष्टिगोचरः। [वृत्तिः सा दृष्टिशब्देन कथ्यते
दृष्टिसृष्टिः-दृष्टिसम(नकालीनसृष्टिः १) समया विश्वसृष्टिः २दृष्टि-
रेव विश्वसृष्टिः ३त्रिविधसत्तावहिर्भूतत्वे सत्यसद्विलक्षणत्वं

देवगृहं-मन्दिरम् १ राजप्रासादः । देवचर्या-देवार्चनम् ।
देवतात्वं-मन्त्रकरणकहविःकर्मकत्यागभागित्वेनोद्देश्यत्वम् ।
देवताधिकरणन्यायः-देवतानां यज्ञादावधिकारित्वतदभावयो-
रन्यतरसाधको न्यायः १देवतानां विग्रहवत्त्वतदभावयोरन्य०
देवदत्तप्राणः-विजृम्भकरः प्राणः । देवपथः-आकाशमार्गः ।
देवब्राह्मणः-भिक्षाशीज्ञाननिरतः संतुष्टश्च जितेन्द्रियः,वेदशास्त्रा-
देवमणिः-कौस्तुभमणिः । [र्थतत्त्वज्ञो देवो विप्रः प्रकीर्तितः
देवयानः-देवरथः १सुराणां (यानम् १) गतिसाधनविमानम् ।
देवयानमार्गः-देवः परेशो यायतेऽनेन मार्गेण १अर्चिराद्यभिमा-
निदेवाधिष्ठितो मार्गः२हिरण्यगर्भब्रह्मोपासकानां ब्रह्मलोक-
प्राप्तिमार्गः३नागवीथ्युत्तरेयश्च सप्तर्षिभ्यश्च दक्षिणम्,उत्तरः
देववंशः-देवयानमार्गः । [सवितुःपन्था देवयानस्तु स स्मृतः
देवी-देवपत्नी १ कान्तिमती २ कृताभिषेका राजमहिषी ।
देशः-भूगोलभागविशेषः१ नगराद्याश्रयस्थानम् । [गित्वं
देशपरिच्छेदः-यत्किञ्चिद्देशावृत्तित्वम् १अत्यन्ताभावप्रतियो-
देशान्तरं-अन्यो देशः १ महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः,
देशिकः-उपदेशकः । [वाचा यत्र विभिद्यन्ते तद्देशान्तरमुच्यते
देहः-इन्द्रियाश्रयः१षण्णवत्यंगुलः२प्रतिक्षणमुपचीयमानावयवः
देहवासना-देहात्ममतिजन्यमिथ्यासंस्कारविशेषः१सदन्नपाना-
दिसेवनबलवीर्यादिसंपादनालङ्करणादिभिर्देहसौष्ठवसंपाद-
नाभिनिवेशहेतुः२देहानुभवजनितत्वे सति देहस्यैव पुनःपुनः
(पुष्ट्याद्यर्थम्) स्मरणहेतुरित्यादर्शे ३ संपादयितुमशक्य-
त्वात्क्लेशबहुत्वादप्रामाणिकत्वात्पुरुषार्थानुपयोगित्वात्पुन-
र्जन्महेतुत्वादिति निरन्तरचिन्तनं देहवासनानिवृत्त्युपायः ।
देहांतरप्राप्तिः-जन्मग्रहणं।देहात्मवादी-चार्वाकसिद्धांतानुयायी

दैनन्दिनप्रलयः-ब्रह्मणः सुषुप्तिः १ समष्टिलिङ्गशरीरलयः ।
दैन्यं-अधमेषु साह्ययाच्ञा । दैवं-देवताराधनम् १प्राक्कर्म २पौ-
दैवगतिः-अर्थादिना निवर्तयितुं न शक्यः । [र्वदेहिकं कर्म
दैवचिन्तकः-दैवमेव सर्वं कुर्यादिति मत्वा पुरुषव्यापारमकुर्वा-
दैवविवाहः-यज्ञे कन्यादानम् । दैवतन्त्रः-भाग्याधीनः। [णः
दोग्ध्री-पूरयित्री । दैष्टिकः-भाग्याधीनतावादी [र्थापकर्षकः
दोषः-कार्यविरोधी १भ्रमोत्पादकः २दुष्टताप्रयोजकः ३ मुख्या-
दोषग्राही-छिद्रान्वेषणः । दोषदर्शी-निर्दोषेष्वपि दोषद्रष्टा ।
दोहनं-विभागावच्छिन्नक्षरणानुकूलो व्यापारः । [क्षक्रीडा
द्युतिः-अधिक्षेपकृतं वाक्यम् १ईर्ष्याक्लेशोपशमनम् । द्यूतं-अ-
द्योतकः-क्रियाविशेषाक्षेपकः *१ तात्पर्यग्राहकः २संबन्धपरि-
च्छेदक इति ग्रं० २स्वसमभिव्याहृतपदनिष्ठशक्तिव्यञ्जकः ।
द्रवः-गुरुव्यतिक्रमः । द्रवत्वं-आद्यस्पन्दनासमवायिकारणम् ।
द्रव्यं-वित्तम् १द्रोः विकारः *२गुणक्रियावदिति मी० ३साक्षा-
त्संबन्धेनेन्द्रियग्राह्यम् ४सङ्कोचविकासावस्थाश्रय इति वे० ५
लिङ्गसङ्ख्याकारकान्वितमिति वै० ६भावकार्यसमवायिका-
रणम् ७ संयोगवद्वृत्तिसत्तावान्तरजातियोगीति लक्षणमाला-
याम् ८द्रव्यत्वावच्छिन्नत्वे सति गुणकर्मकाधेयतानिरूपिता-
धिकरणमिति नै० ९द्रव्यत्वधर्मेण व्यक्तीभूतो यदृच्छार्थः ।
द्रष्टव्यः-प्रदर्शनीयः।द्रष्टा-दृश्याश्रयभूतः।द्राक्षा-मृद्वीका। [हिनी
द्रोणः-शतद्वयाढकः १चतुश्चत्वारिंशत्प्रस्थः।द्रोणी-काष्ठाम्बुवा-
द्रोहः-अहितेच्छा १अनिष्टचिन्तनं वा २परेषु स्वच्छन्दवृत्तिवि-
रोधः ३दुःखजनकक्रियारूपापकारजनकश्चित्तवृत्तिविशेषः।
द्वन्द्वं-परस्परविरुद्धत्वस्वभावः । द्वन्द्वातीतः-सुखदुःखाद्यतीतः॥
द्वन्द्वसमासः-सर्वपदार्थप्रधानः समासः १परस्परान्वित(र्थका-

नेकपदघटितत्वम् २)समस्यमाननिखिलपदार्थबोधकसमासः
द्वारं-गृहनिर्गमस्थानं १अकारणस्य कारणघटकं २'व्यापार'ल०
द्विगुणः-द्विप्रकारः १ अधिकगुणः। [दिकरणत्वं
द्विगुत्वं-संज्ञाविषयान्यत्वे सति सङ्ख्यावाचकपूर्वपदकतुल्या-
द्विजः-जन्मसंस्काराभ्यां जातः। द्वितयं-द्वित्वसंख्यान्वितम्।
द्वितीयाविभक्तिः-तत्तद्धात्वर्थादौ कर्मत्वादिबोधिका विभ-
क्तिः १तिबन्तपचधातूपस्थाप्यपाकधर्मिककर्मत्वानुभवानुकू-
द्वितीया-पत्नी १अमादित्रिकान्यतमः। [लसुप्सजातीयत्वं
द्विष्टः-अरुचिकरः १अशुभचिन्तकः। द्विहृदया-गर्भवती स्त्री।
द्विष्ठत्वं-उभयनिरूपितवृत्तित्वम्।द्वीपः-जलपरिवेष्टितभूखण्डः
द्वीपी-क्षुद्रव्याघ्रः १चित्रव्याघ्रः [द्विष्टसाधनताज्ञानजन्यगुणः
द्वेषः-वृथानिन्दा १परानिष्टाभिलाषः २लोकानामुद्वेगाचरणम् ३-
द्वेष्यः-अपकारमपेक्ष्यापकर्ता। द्वैतत्वं-जीवेश्वरादिबहुविधभेद-
द्वैतवनं-क्षुत्पिपासाशोकमोहादिद्वन्द्वरहितं वनम्। [वत्त्वं
द्वैतवादः-जीवेश्वरादिभेदनिर्णायकः कथाविशेषः १द्वैतभावोहि
दुःखाय सुखायाद्वैतभावना, भारायान्नं पृथग्भूतं भुक्तमन्नं
द्वैतवादी-द्वैतं वदतीति। द्वैती-दैतवादी। [सुखावहं
द्वैताद्वैतं-कार्यात्मना द्वैतं कारणात्मनाऽद्वैतम्। द्वैषः-वैरिता।
द्वैधीभावः-बलवत्तररिपुद्वयमध्ये काकाक्षिगोलकन्यायेनालक्षि-
द्व्यणुकं-परमाणुद्वयारब्धकार्यद्रव्यम् ☞ ध [तावस्थितिः
धनं-संपत्तिः। धनपिशाची-अर्थलिप्सा।धनहरः-उत्तराधिकारी
धनञ्जयोपप्राणः-सर्वदेहव्याप्यामरणावस्थावस्थः प्राणः।
धनपाशः-एतावद्वित्तं कथं त्यजेयमितिचिन्तयतो धनिनः सन्मा-
धनमदः-धनमत्तता। धनलुब्धः-अर्थलोलुपः। [र्गगतिप्रतिबन्धः
धनुः-चापः १चतुर्हस्तः। धनुष्करः-धनुर्धारी। धन्यः-श्लाघ्यः।

धनुर्वेदः-धनुःप्रयोगसंहारज्ञापको वेदः।धन्यवादः-प्रशंसनम् १कृ-
धन्वी-धनुस्सज्जितः १ गृहीतचापः । [तज्ञताद्योतकशब्दः
धमकः-कर्मकारः।धमनी-स्थूलतरनाडी।धरा-योनिः१गर्भाशयः
धर्मः-अन्याश्रितत्वे सति स्वतन्त्रताशून्यः* १विहितकर्मजन्यः२
दम्भं विना यः क्रियते सः३अलौकिकश्रेयःसाधनत्वेन विहि-
तक्रिया४वेदप्रतिपाद्यः प्रयोजनवदर्थः। प्रयोजनेऽतिव्याप्ति-
वारणाय प्रयोजनवदिति, भोजनादावतिव्याप्तिवारणाय
वेदप्रतिपाद्य इति,श्येनादावतिव्याप्तिवारणायार्थ इति ५
कार्यनियोगापूर्वपर्यायकैः शब्दैरुच्यमानो धात्वर्थसाध्यस्व-
र्गादिफलसाधनपुरुषगुण इति प्राभाकराः६यागजन्यस्वर्ग-
जनकवृत्तिगुणत्वव्याप्यजातिमानिति तार्किकाः७क्रियासा-
ध्यत्वे सति श्रेयस्कर इति लौकिकाः८ धरति लोकान् ९ध्रि-
यतेनेनेति १०सत्याज्जायते, दयया दानेन च वर्धते, क्षमायां
धर्मजिज्ञासा-धर्मस्य ज्ञातुमिच्छा। [तिष्ठति,क्रोधान्नश्यति
धर्मज्ञः-दुर्वृत्तरहिष्णुः। धर्मध्वजः-दम्भी १परमधर्मप्रकाशकः।
धर्मपत्नी-सहधर्मचारिणी। धर्मपालः-वर्णाश्रमधर्मपालकः।
धर्मपुरं-धर्मसाधनं पुरम्। धर्मपुरुषार्थः-प्राणिसंरक्षणहेतुभूतप्र-
धर्मवर्गः-सजातिसङ्घः १ धर्मघटितो वर्गः। [वृत्तिविशेषः
धर्मशाला-बहुजनविश्रामस्थानम् १अन्नजलादिवितरणार्थकुटिः
धर्मशास्त्रं-धर्मप्रतिपादकं शास्त्रम् १वेदार्थस्मरणपूर्वकं रचितं
धर्मात्मा-विहितधर्माचरणशीलः। धर्षितः-कृतधर्षणः [शास्त्रं
धर्माध्यक्षः-दायभागादिविषये विवादं कुर्वतां विवादपदविशो-
धाता-पोषकः। [धनपूर्वकं यथाधर्मशास्त्रं विवादशमनकर्ता
धर्माभासः-श्रुतिस्मृतिभिन्नागमप्रतिपाद्यः। [भेदनिरूपकः
धर्मारामः-धर्मक्रीडनकः। धर्मी-न्यायी १प्रतियोगिभिन्नत्वे सति

धातुः-निःसृतरसः १वाद्यवादनविधिः २बहूनर्थान्दधातीति ३क्रिया(निरूपितशक्तिविशिष्टः४)वाचित्वे सति गणपठितः। सर्वनामाव्ययादीनामपि गणपठितत्वेन धातुत्वापत्तिस्तद्वारणाय सत्यन्तम्, हिरुगाद्यव्ययानां क्रियावाचित्वेन धातुत्वापत्तिस्त-
धातुवादः-धातुतत्त्वम् १खनिजविद्या। [द्वारणाय गणपठितेति
धातुवादी-रसायनी। धात्वर्थः-फलानुकूलव्यापारः। [न्माता
धात्री-पाययित्री १पोषणकर्त्री २गर्भधारिणी। धारकः-तुलो-
धारणा-न्यायपथस्थितिः १सारासारावधारणपूर्वकं प्रत्युक्तिसमयस्मरणयोग्यतापादनम् २मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाचक्रदेशानामन्यतरस्मिन्प्रत्यगात्मनि वा चि-
धारयिष्णुः-अविस्मरणशीलः। धारिणी-पोषिणी। [त्तस्थापनं
धारावाहिकज्ञानं-घटोघट इत्याकारकः सततप्रत्ययः ३५००
धारासारः-वर्षाप्रसारः।धावकः-निर्णेजकः१चेलप्रक्षालकः[कारी
धार्मिकः-न्यायप्रियः१धर्मानुष्ठानपरः।धार्मिकाधमः-स्वार्थकर्म-
धार्मिकमध्यमः-स्वपरसाधारणकर्मकारी। धार्मिकोत्तमः-शर-
धिषणा-वक्तृता। धिष्ठितं-किञ्चिदवस्थितम्। [णागतसंरक्षकः
धीरः-अप्रार्थनशीलः। धुरं-भारम्। धुरन्धरः-कार्यभारसहः।
धूमः-ज्वालामाली। धूर्वहः-धुरन्धरः१भारवाहकः। [लितः
धूर्तता-वञ्चनाचातुर्येण स्वमनीषितसंपादनम्। धृतः-तुलातो-
धृतिः-विकारहेतावविकारित्वम् १क्षोभकारणे प्राप्तेप्यव्याकुलत्वम् २अवसन्नानां देहेन्द्रियाणामवष्टम्भहेतुः प्रयत्नः ३इष्टवियोगानिष्टप्राप्त्योः प्रचलितचित्तस्य यथापूर्वमवस्थानम्।
धृष्टः-कुकर्मी १ अविनीतः २ दुष्कर्मसाधनहेतुकलज्जाहीनः।
धैर्यं-कालोचितव्यवहरणम् १व्याकुलत्वे सति प्रतिज्ञापालकत्वम् २विघ्ने सत्यपि चित्तावैक्लव्यमिति ग्रं० ३शोकादिजनि-

तोपप्लवनिवारणकारणीभूतवृत्तिः।धौतं-क्षालितम् १ मार्जितं
ध्मातः-संधुक्षितः। ध्मापितः-भस्मीभूतः। [यप्रवाहकर्ता
ध्याता-ध्यानाश्रयः १ विजातीयप्रत्ययानन्तरितसजातीयप्रत्य-
ध्यानं-ध्येयाकारप्रत्ययप्रवाहम् १आत्मप्रत्ययैकतानसंततानुवृ-
त्तिः२अन्तरान्तरा वृत्त्यन्तरवती प्रत्ययैकतानता ३ अखण्ड-
दण्डायमानसच्चित्सुखाद्वयब्रह्मैकाकारान्तःकरणवृत्तिरिति
ग्रं०४वस्तुतत्त्वमनपेक्ष्यारोपितविषयतयापि चित्तवृत्तिप्रवाहः
ध्यानस्थः-निरुद्धबाह्यवृत्तिः। ध्येयत्वं-ध्यानविषयत्वम्।
ध्रुवं-अविचाल्यम् १प्रकृतिधात्वर्थव्यापाराश्रयत्वे सति तज्जन्य-
विभागाश्रयः२प्रागभावाप्रतियोगित्वे सतिध्वंसाप्रतियोगित्वं
ध्वजः-केतुदण्डः। ध्वंसः-जन्याभावः। ध्वस्तः-अधःपतितः।
ध्वनिः-नादः १ध्वन(नम् २)यतीति ३ व्यञ्जनात्मा व्यापारः।
नकुटं-नासिका। नक्तमुखा-संध्या। ☞ न
नखः-कररुहः १ अङ्गुल्यग्रस्थकण्टकः। नखाघातः-नखक्षतः।
नखानखि-नखैश्च नखैश्च प्रहृत्य प्रवृत्तं युद्धम्। नगः-अचलः
नगरं-प्राकारपरिखान्वितं श्रेणीधर्मसंयुतं संस्थानम् १पण्यक्रि-
यादिनिपुणैश्चातुर्वर्ण्यजनैर्युतम्,अनेकजातिसंबद्धं नैकशिल्पिसमा-
नगरस्थः-ग्रामवासी [कुलम्।सर्वदेवतसंबद्धं नगरं त्वभिधीयते
नगराध्यक्षः-रात्रौ नगरशोधननगरद्वारप्राकारादिरक्षणसंवि-
नटः-वेषभेदकारी १नवरसाभिनयकर्ता। [धानादिकर्ता
नग्नः-मुक्ताम्बरः १वस्त्रोपकरणहीनः। नग्निका-अनुत्थितकुचा
नदी-जलप्रवाहः १अष्टसहस्रधनु(ष्प्रवहणशीला २)रन्यूनव्याप्त-
नदीपालः-तीर्थरक्षकद्वारेणादेयम्।ननन्दा-भर्तृभगिनी। [तोया
ननु-संभ्रमः १संबोधनम्* २ वाक्यारम्भः ३ प्रत्युक्तावाक्षेपः।
नपुंसकं-विक्रमहीनम् १ सत्त्वादिगुणानां साम्यावस्था।

नपुंसकलिङ्गं-क्लीवत्वेन परिभाषितम् १इदमितिव्यवहारविषयः
नभः-वायुमण्डलम्। नभश्चरः-आकाशगामी।नभाकः-अन्धकारः
नमः-स्वापकर्षबोधकव्यापारः १स्वस्वत्वध्वंसानुकूलव्यापारः।
नमस्कारः-मत्तस्त्वमुत्कृष्टः त्वत्तोऽहमपकृष्ट इत्याकारकज्ञा-
नजनककरतलशिरःसंयोगानुकूलो व्यापारः। [व्यापारः
नमस्कारमङ्गलं-स्वनिष्ठापकर्षविषयकबोधानुकूलः स्वीय-
नम्रः-नतः १विनया(वन)न्वितः। नयजः-कालोचितविचारज्ञः।
नयः-न्याय्यः १ प्रमाणपरिगृहीतार्थैकदेशे वस्त्वध्यवसायः।
नरकः-देवरात्रिप्रभेदः १पापिलोकपापभोगस्थानम् २नास्त्यस्मि-
न्रमणं रतिकरं स्थानमल्पमप्यस्तीति। [सारेण नृत्यकर्ता
नर्तकः-सर्ववेशी १तालरेचकः २भावाभिनयकर्ता ३गीतवाद्यानु-
नर्म-पुरस्ताद्वक्तव्यम्। नर्मद्युतिः-क्रीडाविलोभनार्थं हास्यम्।
नवबुद्धिः-सदसद्व्यवहाराप्रविष्टबुद्धिः। नव्यः-नूतनः १स्तुत्यं
नश्वरः-नाशकः १क्षणभङ्गुरः २ध्वंसयोग्यः।नष्टः-विध्वस्तः।
नष्टचेताः-कर्तव्यबुद्धिरहितः। नष्टकण्टकः-नष्टशत्रुः। [भयं
नष्टप्रायः-विनाशोन्मुखः।नष्टारम्भः-परिभग्नक्रमः।नष्टशङ्कं-नि-
नाकः-सुखप्राचुर्यमयस्थानम्। नागरः-पुरवासी। [लिप्राणं
नागवीथी-स्वर्गमार्गाभिमानिनीदेवता।नागोदरिका-कराङ्गु-
नागपदः-रतिबंधः।नागप्राणः-उद्गारकरः।नागबला-कङ्कतिका
नाटकं-देवादीनां पूर्ववृत्तानुचरितम् १ अङ्कसंध्यामुखादिमत्त्वे
सति गद्यपद्यसंस्कृतप्राकृतपैशाचमागधभाषादिमयग्रंथविशेषः
नाट्यं-अवस्थानन्दनम् १ अवस्था या तु लोकस्य सुखदुःखसमुद्भवा,
नारङ्गः-लम्पटः। [तस्यास्त्वभिनयः प्राज्ञैर्नाट्यमित्यभिधीयते
नाडिका-चत्वारिंशत्कला। नाडी-वीणा १ धमनी २कायशिरा।
नाथः-रक्षकः १नायकः। नाडीचक्रं-नाभिस्थनाडीनिस्सरणचक्रं

नादः-संवृते गलविवरेयत्कंठनिनादनकरणंसः।नादी-शब्दकारी
नानार्थकत्वं-नानार्थविषयकबोधजनकत्वम्। [ष्पाद्यः
नान्तरीयकः-तत्सत्तानियतसत्ताकः १ अन्यनिष्पादकयत्ननि-
नाभिः-मध्यभागः१चक्रमध्येउन्नतप्रदेशः२द्वादशनृपचक्रमध्यः।
नाम-संभावना १ देवदत्ताद्यभिधानम् २ विभक्तिहीनशब्दः३
लिङ्गसङ्ख्यान्वय्यर्थप्रतिपादकमिति ग्रं०४शब्देनोच्चारित-
नेह येन द्रव्यं प्रतीयते, तदक्षरीवधौ युक्तं नामेत्याहुर्मनीषिणः।
नामधेयः-कर्मप्रापकः१अन्यव्यावर्तकः। नारः-बालकः१जनस-
नाममात्रत्वं-स्ववीर्यहीनत्वे सतिसंज्ञामात्रधारित्वम्। [मूहः
नायकः-प्रधानपुरुषः१एकद्विसहस्रपदातिनेता।नारी-पुरुषभार्या
नारायणः-सर्वाश्रयः१कारणार्णवशायी२सर्वब्रह्माण्डान्तर्यामी
नाराशंसनं-सकृद्भक्षिताप्यायितासादितचमसम्। [पुरुषः
नालिका-यत्तु वाच्यं प्रपञ्चेन वदेद्वा हास्यहेतुना, प्रहेलिकेव
नाशः-परिध्वस्तिः। [गूढार्था सा ज्ञेया नालिका बुधैः
नाशकः-उपद्रवकारी। नाशनं-परासनम् १स्थानान्तरकरणम्।
नास्तिकः-वेद(विद्विष्टः१)निन्दकः२परलोकाद्यभावप्रतिपादकः
निकटस्थः-समीपवर्ती। निकषग्रावा-स्वर्णादिपरीक्षणशिला।
निकारः-परस्य तिरस्क्रिया। निकुञ्जं-लतादिपिहितस्थानम्।
निगमः-अध्वनिपर्यायकथनेन वेदार्थबोधकः १ उदाहरणरूपं
निगरणं-भक्षणम्। निगूढः-चक्षुराद्यगोचरः। [वेदवाक्यं
निगमनं-सहेतुकं पक्षस्य साध्यवत्तया पुनर्वचनम् १हेत्वपदेशा-
त्प्रतिज्ञायाः पुनर्वचनम्,यथा तस्मात् (धूमात्) तथा (वह्नि-
मान्)इति२प्रतिकूलप्रमाणाभावसूचकं प्रतिज्ञोपसंहारवाक्यं
निग्रहः-पराजयः१भर्त्सनम्२अनुग्रहाभावः३पराहङ्कारनिरा-
करणम् ४ देशान्तरसंचारविरोधिव्यापारानुकूलव्यापारः।

निग्रहस्थानं-पराजयहेतुः १कथकाशक्तिसूचकम् ३ वादिप्रतिवादिनोरसामर्थ्यबोधकम् ३उद्देश्यानुगुणसम्यग्ज्ञानाभावलिङ्गं
निघण्टुः-पर्यायनाम्नामेकत्रार्थकथनायसंग्रहः १वैदिकद्रव्यदेव-
निचोलः-प्रच्छदपटः । [तात्मकपदार्थपर्यायशब्दात्मकः
निजानन्दः-उदासीनकाले भासमान आनन्दः।नितंबः-कटितटः
नित्यत्वं-कृताकृतप्रसङ्गित्वमिति वै० १ अविच्छिन्नपरम्परा-
कत्वम् २ सर्वकालवृत्तित्वमिति वे० ३ त्रैकालिकनिषेधप्र-
तियोगित्वम् ४ध्वंसाप्रतियोगिवृत्तित्वविशिष्टसत्तायोगित्वं
नित्यकर्म-प्रत्यहं कर्म १अवश्यापेक्षितफलसाधनं कर्म २करणे
चित्तशुद्ध्यतिरिक्तफलाननुबन्धित्वे सत्यकरणे प्रत्यवाया-
नुबन्धित्वम्, यथा ब्राह्मणस्य संध्यागायत्र्यादि ३ प्रत्यवाय-
जनकीभूताभावप्रतियोगित्वम् , यथा एकादश्यामुपोषण-
मिति ४ अहरहर्जायमानं कर्म,यथा नित्यं कुमाराः क्रीडन्ति
नित्यः-जन्ममृत्युशून्यः । [५फलकामनानधीनकर्तृकत्वं
नित्यप्रलयः-प्राणिनां सुषुप्तिः १ नित्यः प्रात्यहिकः प्रलयः ।
नित्यसमा-धर्मस्य नित्यत्वानित्यत्वविकल्पाद्धर्मिणो नित्यत्व-
नित्यसमासः-अस्वपदविग्रहः।निदानं-आदिकारणम्। [साधनं
निदर्शनं-प्रस्तुतार्थप्रवृत्तस्य तत्सदृशाप्रस्तुतार्थान्तरज्ञापनम् ।
निदिध्यासनं-जीवब्रह्मैक्यावधारणम् १अपरोक्षनिश्चयत्वसं-
पादक(ो व्यापारः २)स्तर्कः ३श्रुतार्थस्य नैरंतर्येण दीर्घकाल-
मनुसंधानम् ४विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्यय-
निदिग्धः-उपचितः । निदेशः-शासनम् । [प्रवाहीकरणं
निद्रा-अभावप्रत्ययालम्बना वृत्तिः *१ प्रबुद्धप्रत्यवमर्शहेतुः ।
निद्रालुः-निद्राशीलः । निधनं-अनुपलम्भः । निधातृकः-भा-
निधिः-शङ्खपद्मादिसङ्ख्याकवित्तकोशः । [ण्डागारिका

निन्दा-दोषाविष्करणम् १विरोधिभिः पुरुषैः स्वस्मिन्नापादिता दोषोक्तिः२आस्येन परस्य विद्यमानाविद्यमानदोषसङ्कीर्तनं
निन्दास्तुतिः-व्याजस्तुतिः। [वनया स्फुटं तद्विषयेऽप्रवर्तकः
निन्दापाशः-ब्रह्मज्ञानेन क्षुल्लकेन किं स्यान्न किमपीत्यादिभा-
निन्दार्थवादः-अनिष्ट(फलवादः १)बोधनद्वारा(निषेधवाक्यै-कवाक्यतया निवर्तकं वाक्यम् २) विध्यर्थप्रवर्तकं वचनम् ।
निन्दितं-कलङ्कितम् १ निन्दायुक्तम् २ शास्त्रलोकयोर्गर्हितम्।
निपातः-
निपातनं } अधोदेशसंयोगानुकूलव्यापारः * १सिद्धप्रक्रियस्य निर्देशः२अन्यादृशप्रयोगे प्राप्तेऽन्यादृशप्रयोगकरणं
निपीडितः-कृतनिष्पीडनः। निपुणः-पटुः१निखिलकार्यकुशलः
निबन्धः-प्रबन्धः १ वाक्यरचना २ एकग्रन्थोपनिबन्धनम् ।
निमन्त्रणं-नियोगकरणम् १आवश्यके श्राद्धभोजनादौ प्रवर्तनं
निमित्तकारणं-स्वातिरिक्तकार्यजनकम् १कार्योत्पत्तिमात्रका-रणम्,यथा घटादेः कुलालादि२कार्यानुकूलव्यापारवत्कार-णम् ३कार्यस्थित्यनियामकत्वे सति कार्यजनिनियामकत्वम्।
निमित्तधर्मः-धार्मिकविधिः। [उपादानकारणवारणाय सत्यन्तं
निमेषः-द्विलवः १ पक्ष्मस्पन्दनकालः। नियतः-प्रयत्नशीलः।
नियताहार्यं-स्वविरोधिधर्मधर्मितावच्छेदककस्वप्रकारकज्ञानम्
नियतिः-स्थिरता १नियमनहेतुः २ कार्यकारणभावादिनियमः।
नियमः-अनुमित्यनुकूलसंबन्धः१न्यूनाधिकावृत्तिः२अविनाभा-वेन सहावस्थानमिति ग्रं० ३निश्चयानुकूलप्रतिबन्धः ४ जन्म-हेतुकाम्यधर्मान्निवर्त्य मोक्षहेतौ निष्कामधर्मे नियमयति प्रेर-यतीति५शौचा(द्यन्यतमः६)दिसंपादनम् ७कायवाक्साध्यत्वे सति योगाङ्गविशेषः८आगन्तुकसाधनकर्मरूपो व्रतः। [ननं
नियमनं-उपस्थितयोर्द्वयोरेकतरमात्रार्थविषयकशाब्दबोधज-

नियमविधिः-अन्यनिवृत्तिफलकसिद्धविषयकविधिः१पक्षे प्राप्तस्याप्राप्तांशपूरको विधिः, यथा यागाङ्गत्वेन प्राप्तानां व्रीहीणां नखविदलनमुसलावहननयोर्द्वयोः पक्षयोः कदाचिन्नखविदलनस्य प्राप्तौ सत्यां मुसलावहननमप्राप्तं स्यात्तस्य पूरको व्रीहीनवहन्यादित्यवघातविधिः२नानासाधनसाध्यक्रियायामेकसाधनप्राप्तावप्राप्तस्यापरसाधनस्य प्रापको विधिः
नियमितः-प्रतिज्ञाबद्धः। नियामकः-शासकः १ पथप्रदर्शकः।
नियुतं-दशलक्षकम्।नियुद्धं-मल्लयुद्धम् १बाहुयुद्धम्२निगृह्यम्।
नियोगः-संलग्नता १ प्रवृत्त्यनुकूलो व्यापारः२'एवं कुरु' इत्याकारकादेशः ३ प्रवर्तकज्ञानोपधायकतानिर्वाहकव्यापारः।
नियोगविधिः-पक्षप्राप्तानुवादको विधिः।नियोग्यं-नियोक्तुमर्हं
नियोज्यः-प्रवर्तकज्ञानोपधायकः १ नियोगजन्यवृत्तिमत्त्वम्।
निरङ्कुशं-दुर्निग्रहः।निरङ्गः-उपायशून्यः।निरजी-निष्कलङ्कः।
निरत्ययः-सुरक्षितः१दोषशून्यः२निःस्वार्थी। निरनुक्रोशः-निष्ठुरहृदयः। निरनुरोधः-अकृपालुः। [भियोगः
निरनुयोज्यानुयोगनिग्रहस्थानं-अनिग्रहस्थाने निग्रहस्थाना-
निरपराधः-कलङ्करहितः।निरपायः-अमोघः। निरर्थः-निष्प्रयोजनः
निरपेक्षत्वं-इतरप्रामाण्यानधीनप्रामाण्यकत्वम्। [प्रयोगः
निरर्थकः-प्रकृतानुपयोगी १समुदायार्थशून्यः २ अवाचकशब्द-
निरर्थिकः-पुरुषार्थचतुष्टयशून्यः। निरवग्रहः-निष्प्रतिबन्धः।
निरसनं-थूत्करणम्। निरस्तः-निसारितः। निराकरणं-दो-
निराकाङ्क्षं-शाब्दबोधोपयोग्यपेक्षाशून्यम्। [षापाकरणं
निराकारः-कपटवेशी १प्राकृताकारशून्यः२अमूर्तिमत्परमात्मा
निरामयः-निष्कलङ्कः १ द्वैतदर्शनहीनः २ जरामरणवर्जितः।
निराशः-फलाभिसन्धिरहितः १ प्राप्तव्यविषयाशाशून्यः।

निरुक्तं-पदानामवयवार्थनिर्वचनप्रतिपादको ग्रन्थः १वैदिकप-
दानां पर्यायव्युत्पत्त्यादिप्रतिपादकं शास्त्रम्*२शब्दस्य स-
र्वावयवार्थानुगमेन प्रसिद्धार्थादर्थान्तरे वृत्तिः,यथा सोमश-
ब्दस्य पार्वतीसहितमहेश्वरे शक्तिरिति विवरणे३संशयच्छे-
निरुच्छ्वासः-उच्छ्वासावकाशरहितः। [द्यमिति सां०
निरुजः-नीरोगः१अङ्गभङ्गरहितः। निरुत्साहः-भग्नमनोरथः।
निरुत्सुकः-आत्मदर्शनेनैव सर्वकामावाप्तेरन्यत्रास्थाशून्यः।
निरुद्धभूमिका-निरुद्धाखिलवृत्तिका। निरुपद्रवः-विघ्नशून्यः।
निरुपाधिकभेदत्वं-उपाधिसत्ताव्याप्यसत्ताकत्वात्यन्ताभाव-
निरुपाधिकभ्रमः-अधिष्ठानज्ञाननिवर्त्यो भ्रमः। [वत्त्वं
निरुपाधिकाध्यासत्वं-उपाधिनिरूपणानधीननिरूपणत्वम्।
निरूढः-पशुयागविशेषः१शक्तितुल्यलक्षणयार्थबोधकः शब्दः।
निरूढलक्षणा-अनादितात्पर्यविषयीभूतार्थनिष्ठा लक्षणा।
निरूपः-आकारशून्यः। [नानुकूलशब्दप्रयोगः
निरूपणं-निदर्शनम्१लक्षणप्रमाणस्वरूपाभिधानम्२तत्त्वज्ञा-
निरूपकः-यत्किञ्चिन्निष्ठनिरूप्यतानिरूपितनिरूपकतावान्।
निरूपणीयनिष्ठसङ्गतिः-अनन्तराभिधानप्रयोजकजिज्ञासाज-
नकज्ञानविषयस्मरणानुकूलसंबन्धः। [तनिरूप्यतावत्त्वं
निरूपितं-कृतनिरूपणम्१यत्किञ्चिन्निष्ठनिरूपकतानिरूपि-
निरोधः-गत्यादिप्रतिरोधः*१इन्द्रियाणां विषयेभ्यो निग्रहणं
निर्ऋणः-निर्मुक्तऋणः। निर्ऋतिः-विपत्तिः१नैर्ऋताधिपतिः।
निर्गुणः-विद्यादिहीनः१उत्तमगुणशून्यः२गुणवदवृत्तिधर्मवान्३
सत्त्वादिगुणप्रवृत्तिशून्यः४प्राकृतगुण(शून्यः५)पारतान्त्र्य-
राहित्यम्६स्वसमानसत्ताकधर्मवद्यद्यत्तद्भिन्नत्वे सति तुच्छ-
निर्घातः-स्फूर्जथुः१वज्रशब्दः। निर्घृणः-निष्ठुरः। [भिन्नत्वं

निर्णयः-अनुभूतार्थकथनम्* १संदेहनिराकरणफलकं ज्ञानम् २ विरोधपरिहारकोऽधिकरणाङ्गविशेषः ३सिद्धान्तसिद्धविचार्यवाक्यतात्पर्यावधारणमिति ग्रं० ४ तत्त्वे विप्रतिपन्नानां वाक्यानामितरेतरम्, निरोधपरिहारोऽत्र निर्णयस्तत्त्वदर्शनम्।
निर्झरः-गिरिच्युताल्पप्रवाहः।निर्णेजनं-मलापकर्षः। [शकर्ता
निर्दंटः-परापवादरक्तः। निर्दरः-विदीर्णपाषाणः। निर्देष्टा-निर्दे-
निर्देशः-शब्दप्रयोगः १अव्यवधानपूर्वककथनम् २ विस्तारपूर्व०
निर्द्देश्यमानत्वं-षष्ठीप्रकृतिजन्यप्राथमिकोपस्थितिविषयत्वम्
निर्द्वन्द्वः-शीतोष्णमानापमानक्षुत्पिपासादिहीनः। [सारितः
निर्धनः-निजोदरपूरणेऽप्यसमर्थः।निर्धारः-निश्चयः।निर्घुनः-निः-
निर्बलः-शिथिलः १असहायः २साधनसंपत्तिशून्यः। [रोपणं
निर्बीजा-ज्ञानाग्निभर्जितबीजशक्तिः।निर्बन्धः-दुराग्रहः १दोषा-
निर्भयः-भयशून्यः १हतसाध्यसः २ कथं यास्यामीति शङ्काशून्यः
निर्भर्त्सनं-कुवाच्यम् १शङ्काजननम्।निर्मन्थ्यं-प्रोक्षणसाधनजलं
निर्मानः-निरहङ्कारः। निर्मुक्तः-सङ्गरहितः। निर्मूलं-निष्का-
निर्यातो-तृणाद्यपनयेन शोधकः। निर्यूहा-पटशाला। [रणं
निर्लज्जः-मुक्तलज्जः। [भावोत्तराणां च भवेन्निर्वहणं तु तत्
निर्वहणः-समाप्तिः सम्यगर्थानां प्रस्तुतानां महौजसाम्, नाना-
निर्वाहकः-उत्पत्त्यनुकूलम् १तदन्यत्वे सति तन्निर्वाहकनिर्वाह्यं
निर्वाहकैक्यसङ्गतिः-स्वकारणजन्यम् १एकप्रयोजकप्रयोज्यत्वं
निर्विकल्पकं-परमार्थभूतशुद्धवस्तुप्रकाशकम् २ संसर्गानवगाहि-
ज्ञानम्, यथा सोयं देवदत्तः ४विशेष्यविशेषणतासंबन्धरहितं
निर्विकल्पसमाधिः-ज्ञातृज्ञानज्ञेयविकल्पानवभासपुरःसरमा-
निर्विकारः-जन्मवृद्धिनाशशून्यः। [त्मनि चित्तसमाधानं
निर्विचेष्टः-इष्टयत्नहीनः।निर्विवादः-सर्वसंमतः।निर्व्यञ्जनः-नि-

ष्कपटः।निवृत्तः-सुखविश्रान्तः।निर्वैरः-दोषाभावः१शान्तिप्रियः
निर्व्यूढः-वहिर्निष्काशितः। निर्व्यूहः-शिरस्त्राणम्।निर्हेतुः-कार-
निलकं-ललाटभूषणम्। निवर्तनं-त्रिरज्जुकम्। [णशून्यः
निवृत्तिः-प्रवृत्त्युपाधिविनाशकयत्नः१प्रवृत्तिप्रागभावरूपमौ-
दासीन्यम्। [भूतसंवादं स निवृत्त्यङ्कुरो भवेत्
निवृत्त्यङ्कुरः-यत्रान्येन प्रयुक्तं तु करोत्यन्यश्च कश्चन,पूर्वानु-
निवेदनं-संमानपूर्वकज्ञापनम्१कर्तव्यस्यावधारितस्य कथनम्
निशाचरः-निशायामधिकं चरणशीलः। निशानं-तीक्ष्णीकरणं
निश्चयः-संशयविरोधिज्ञानम्१तदभावाप्रकारकत्वे सति तत्प्र-
कारकत्वम्। [श्रवणस्पर्शनादिविषयकेन्द्रियचेष्टारहितः
निश्चेष्टः-हस्तपादप्रक्षेपणादावशक्तः१ किञ्चित्पदार्थदर्शन-
निश्चलः-अचलः १ अपरिवर्तनीयः। निश्चायकः-निर्णायकः।
निःश्रेयसं-जन्ममरणप्रवन्धोच्छेदः। [यथा गोहत्यादि
निषिद्धः-निषेधविषयीभूतः। निषिद्धकर्म-प्रत्यवायजनककर्म,
निषेधः-वर्जनम् १ प्रसक्तप्रतिषेधः २ पुरुषनिवर्तकं वाक्यम्,
यथा न सुरां पिवेत् ३अनिष्टसाधनताबोधकवेदादिवाक्यम्।
निषेधकाकुः-विधिपरोच्चारणान्यथाकरणेन निषेधव्यञ्जिका।
निष्कं-पदकम्१कंठाभरणम्२अष्टोत्तरशतरक्तिका। [रिच्छेदः
निष्कपटः-छलशून्यः१सरलहृदयः।निष्कर्षः-सारांशः१इयत्ताप-
निष्कामत्वं-भोगेच्छाशून्यत्वं१विषयकामनासामान्याभाववत्त्वं
निष्कामकर्म-कामनारहितं कर्म१ कर्तृत्वाभिमानफलेच्छाऽभा-
वत्त्वे सत्यन्तर्यामीश्वरचरणैकसमर्पितत्वं निष्कामकर्मत्वं
निष्कुः-साष्टाङ्गुलहस्तमितः। निष्ठीवनं-निष्ठेवः१थूत्कारः।
निष्णातः-पारङ्गतः। निष्ठुरः-अप्रियवाक्१प्रस्फुटसन्दर्भः।
निष्परिग्रहः-कन्थाकौपीनाध्यात्मपुस्तकाद्यतिरिक्तद्रव्यानङ्गी-

कारः । निष्पङ्कः-पापसंसर्गरहितः । निष्पन्नः-परिपूर्णः । निष्प्रतीपं-पाखण्डमार्गवर्जितम् । निष्फलं-लक्ष्यसंबन्धरहितम् निःसुखः-पथि पादुकासुखमप्युपेक्ष्य शर्कराकण्टादिदुःखसहिष्णुः निःसङ्गः-विषयासक्तिशून्यः । निःस्पन्दः-स्पन्दनव्यापारशून्यः। निःस्नेहः-भेद्यप्रीतिः । निस्संदेहः-छिन्नसंशयः । [योगित्वं निःस्वरूपत्वं-अप्रतिपन्नोपाधिकत्वे सति स्वरूपेण निषेधप्रतिनिहितः-स्वाभिप्रायव्यञ्जकचेष्टाशून्यः। नीचं-असत्कुलोत्पन्नं नीतिः-पथप्रदर्शनम् १न्यायबोधकवाक्यम् १राजविद्यानियन्तृनीतिशास्त्रं-संधिविग्रहादिप्रतिपादकं शास्त्रम् । [शास्त्रं नीरन्ध्रः-निरवकाशः। [विषाणाभ्यां स नीलो वृष उच्यते नीलवृषः-लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः,श्वेतः खुरनूनं-अवश्यम् १निश्चितम् २उत्प्रेक्षाद्योतनम्।नूपुरं-पादाङ्गदम्। नृत्यं-सङ्गीतशास्त्रानुकूलहावभावपूर्वकहस्तादिव्यापारः १पदार्थाभिनयपूर्वकत्वे भूचरणसंयोगत्वे वा सति सविलासतालानृपः-चतुर्योजनपर्यन्ताधिकारवान् । [नुसार्यङ्गविक्षेपः नेता-अग्रगन्ता १व्यवस्थापकः । नेत्रं-संचालनम् १वाद्ययन्त्रम् । नेदिष्ठः-निकटतमः १अत्यन्तसमीपस्थः।नेदीयः-सन्निहिततरम्। नेपथ्यं-सूत्रधारकुटम्बगृहं १जवनिकान्तर्भूमिर्वेषपरिग्रहस्थानं नेमिः-चक्र(धारः १)परिधिः २वलयाकारोऽवयवः।नेमः-अवधिः। नेयः-सेनाचालनम् १क्लिष्टकल्पनावान् । नैकविद्यः-बहुविद्यः। नैकृतिकः-नीचः १स्नेहं प्रदर्श्यवञ्चकः । नैधनं-निधनसाधनम्। नैमित्तिककर्म-कुतश्चिन्निमित्तात्कृतं कर्म,यथा पुत्रेष्ट्यादि १ अनुष्ठाने फलविशेषजनकत्वे सत्यननुष्ठाने प्रत्यवायाजनकम्। नैमित्तिकप्रलयः-सर्वकार्यद्रव्यध्वंसः १कार्यद्रव्यानधिकरणकार्याधिकरणकालः *२ कार्यब्रह्मणो दिवसावसाननिमित्तक-

स्त्रैलोक्यमात्रप्रलयः ३एकस्मिन्मन्वादावपगतेऽपराधिपत्या-
नैर्ऋतकोणं-दक्षिणपश्चिमयोरन्तराला दिक्। [न्तरालकालः
नैयायिकः-न्यायवेत्ता १मानवेत्ता २षोडशपदार्थानुसारिन्यायज्ञः
नैवेद्यं-देवोतोद्देशेन त्यक्तद्रव्यम्। नैराश्यं-आशापाशविराहित्यं
नैष्ठिकं-सिद्धान्तरूपम्। [न संन्यासो नैष्ठिकस्य विधीयते
नैष्ठिकब्रह्मचारी-यावज्जीवं गृहीतब्रह्मचर्यव्रतः १ न विवाहो
नैष्ठुर्यं-वास्तवपरदोषख्यापित्वम्। नैसर्गिकः-स्वाभाविकः।
नोदनसंयोगः-स्पर्शवद्द्रव्यसंयोगः १ क्रियादिकारणीभूतः संयोगः
नोदना-प्रेरणा १क्रियां प्रति प्रवर्तकं वचः २क्रियासु प्रवर्तकं वचनं
न्यायः-अनुमानम् १श्रुत्यर्थनिर्णायकसूत्रसमुदायः* २ प्रमाणानु-
ग्राहकस्तर्कः ३प्रमाणैरर्थपरीक्षणमिति ग्रं० ४लोकशास्त्रप्रसि-
द्धदृष्टान्तः ५उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायः ६अनु-
मितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं
न्यायवृत्तिः-न्याय्याचारः। [नुगमरूपेण प्रकाशको ग्रन्थः
न्यायशास्त्रं-परार्थानुमानप्रधानं शास्त्रम् १पदार्थानां सर्वेषाम-
न्यायसूत्रं-वेदार्थाविरोधितर्कोपायिकवैदिकतत्त्वसंरक्षणोपयो-
न्याय्या-न्यायानुसारिणी। [गिप्रमाणादिप्रतिपादकं सूत्रं
न्यासः-समर्पणम् १स्थाप्यद्रव्यम् २ राजचोरादिकभयाद्दायादानां
च वञ्चनात्। स्थाप्यतेऽन्यगृहे द्रव्यं न्यासः स परिकीर्तितः॥
न्यूननिग्रहस्थानं-यत्किञ्चिदवयवशून्यावयवाभिधानम् ३९२४
न्यूनवृत्तित्वं-तत्समानाधिकरणभेदप्रतियोगितावच्छेदकत्वम्।
पक्वः-दृढः १अनुभवी २कृतपाकः ३विनाशोन्मुखः ☞ प
पक्षः-अप्रत्यक्षसाध्यधर्मः १ अनुमित्युद्देश्यः २ संदिग्धसाध्यवा-
न्वा ३ साध्यधर्मविशिष्टधर्मी ४ सिषाधयिषितधर्मानुयोगी ५
वादिप्रतिवादिभ्यां दर्शितविप्रतिपत्तौ कोटिः ६ शुक्लकृष्णप्र-

तिपदादिपञ्चदश्यन्तपञ्चदशतिथ्यात्मककाल इति मौहूर्तिकाः
पक्षकः-सहवर्ती।पक्षता-संदिग्धसाध्यधर्मत्वम् १अनुमित्साविषयत्वं
पक्षधरः-पक्षी १पक्षस्थापकः। [रहविशिष्टसिद्धयभावः
पक्षपातः-न्यायविरुद्धपक्षावलम्बनम् १पक्षेऽन्याय्यसाहाय्ये पा-
पक्षपोषणः-कलहवृद्धिः।पक्षी-पक्षपाती। [तः अभिनिवेशः
पङ्क्तिः-ग्रन्थार्थबोधकशब्दः १सजातीयपदार्थानां(क्रमेण सन्नि-
पङ्क्तिदूषकः-जातिबहिष्कृतपुरुषः। [वेशः २)स्थितिः
पङ्गुः-कुण्ठितगतिः १भिक्षार्थमटनं यस्य विण्मूत्रकरणाय च,
पंगुलः-एकजङ्घः। [योजनान्न परं याति सर्वथा पङ्गुरेव सः
पञ्चीकरणं-स्वस्वेतरभूतचतुष्टयभागविशेषेण मिश्रीकरणम् १
भूतानि प्रत्येकं पञ्चधा विभज्य सद्भूतांशे पञ्चसमुदायक-
रणम् २ पञ्चानां भूतानामेकैकं द्विधा विभज्य स्वार्द्धभागं
पञ्जरं-आखेटः। [विहायार्धभागं चतुर्धा विभज्येतरेषु योजनं
पञ्चमीत्वं-पतधात्वर्थतावच्छेदकरूपावच्छिन्नधर्मिकविभा-
पटः-वेष्टनवस्त्रम्। [गवोधानुकूलसुप्सजातीयत्वं
पटत्वं-स्वाश्रयपटभिन्नाधिकरणवृत्तिर्जातिः।पटु-क्रियाकुशलः
पट्टणं-जलनिर्गमप्रदेशम् १ जलस्थलपथयोरन्यतरयुक्तम्।
पट्टिशः-काष्ठफलकम् १लोहदण्डः तीक्ष्णधारः क्षुरोपस आयुधः
पणः-षोडशमाषकः १अशीतिकपर्दिका। पणितव्यं-विक्रेतव्यम्
पंडितः-विशेषज्ञः १शास्त्रवेत्ता * २पराभिप्रायज्ञः ३सदसत्कार्यवि-
पण्यं-व्यवहार्यम्। [वेकी ४विचारपूर्वं सिद्धान्तप्रतिष्ठापनसमर्थः
पण्डितिमा-विद्वत्ता १ बुद्धिमानी। पतङ्गः-मधुमक्षिका।
पतनं-अधःसंयोगानुकूलक्रिया १ गुरुत्वासमवायिकारणकर्म।
पताका-ध्वजाञ्चलः १ दण्डोर्ध्ववद्धमंशुकम् २ यद्वृतं हि परार्थं
स्यात्प्रधानस्योपकारकम्, प्रधानवच्च कल्पते पताका सामि-

धीयते ।　　[आगन्तुकेन भावेन पताकास्थानकं तु तत्
पताकास्थानं-यत्रान्यस्मिंश्चिन्त्यमाने तल्लिङ्गोऽन्यः प्रयुज्यते,
पतिः-पालकः १पाति रक्षतीति २निरतिशयदृक्क्रियाशक्तिमान्
पतितः-स्खलितः १नीतिभ्रष्टः २नरकगमनसूचककर्मविशेषकारकः
पतिव्रता-सच्चरित्रा १परपुरुषं दृष्ट्वाधोऽवलोकनवती स्त्री २
आर्तार्ते मुदिता हृष्टे प्रोषिते मलिना कृशा, मृते म्रियेत या पत्यौ
पत्तनं-राजधानी १महापणिकनगरम्। [सा स्त्री ज्ञेया पतिव्रता
पत्तिः-एको रथो गजस्त्वेको नराः पञ्च पदातयः, त्रयश्च तुर-
पत्नी-भार्या १पतिकृतयज्ञवती [गास्तज्ज्ञैः पत्तिरित्यभिधीयते
पत्रं-लेखनाधारः १पात्यते स्थानात्स्थानान्तरं समाचारोऽनेन
पदं-चतुर्थभागः १ वृत्तिमदिति ग्रं० २ विभक्त्यन्तशब्दः ३सुप्ति-
ङन्तम् ४ वर्णसमूहः ५अर्थवद्वर्णो वा ६ वाक्यैकदेशः ७ प्रत्येकं
संभूय वा वाक्यांशबोधको वर्णः *८शाब्दप्रतीत्यजन्यशाब्द-
प्रतीतिजनकं वर्णात्मकम् । शाब्दप्रतीतिजन्यशाब्दप्रतीति-
जनकं वाक्यं प्रथमविशेषणेन व्यावर्त्यते, द्वितीयेन प्रत्यक्षा-
नुमानादावतिव्याप्तिर्व्युदस्यते, वर्णात्मकत्वविशेषणेनादृ-
ष्टेश्वरादि ९अवस्थात्रयाधिष्ठानम् १० परमपुरुषार्थवस्तु ।
पदकं-परिस्थितिः।पदभ्रष्टः-पदच्युतिः।पदस्थानं-पदचिह्नम्।
पदार्थः-शब्दार्थः १पद(बोध्योऽर्थः २प्रतिपाद्योर्थः ३शक्तिगम्यः ४)
पदनिष्ठवृत्तिविषयः *५द्रव्याद्यन्यतमः ६ज्ञेयत्वमभिधेयत्व-
मस्तित्वं पदार्थसामान्यलक्षणम्।　　[रिस्फूर्त्यवस्था
पदार्थाभावनी-असंसक्तिभूमिकाभ्यासपाटवाच्चिरं प्रपञ्चाप-
पदैकवाक्यत्वं-स्वार्थबोधेऽसमाप्तानां पदानामेकवाक्यत्वम् १
निरूप्यनिरूपकभावापन्नविषयताप्रयोजकपदघटितत्वमिति

१शब्दजनिता या प्रतीतिस्तयाऽजन्यत्वे सति शाब्दप्रतीतिजनकं यत्तत्।

वै० २पदस्य वाक्येन सहैकवाक्यतयैकार्थबोधकत्वम् ३पदरू-
पार्थवादवाक्यस्य विधिवाक्येन सह यदेकवाक्यत्वम् ४१००
पद्धतिः-मार्गः१यज्ञादिक्रियाकलापेतिकर्तव्यताबोधकानां समु-
च्चयप्रतिपादको ग्रन्थः । [मूहः३पादचिह्नचिह्नितं
पद्यं-पादनिबद्धम् १ छन्दोबद्धवाक्यम् २ पादलक्षणसहितपदस-
पन्थाः-रथशकटपद्गतागतमार्गः।पद्वः-मर्त्यलोकः।पपुः-पालकः।
पयश्चयः-जलाशयः । पयस्विनी-वामकर्णस्था नाडी। [भावी
परः-दूरः१उच्चतरः२पारयतीति ३स्वातिरिक्तः४ उत्तरकाल-
परकायप्रवेशसिद्धिः-देहे त्यक्तेन्द्रियैः सह परशरीरानुप्रवेशः।
परकृत्यर्थवादः-एककर्तृकोपाख्यानम् १अन्यकर्तृकस्य व्याहतस्य
विधेर्वादः२परेण महता पुरुषेणेदं कर्म कृतमिति प्रतिपादोऽ
र्थवादः३पुरुषविशेषनिष्ठमिथोविरुद्धकथनम्,यथा यद्विश्वे
परगामी-परसरः। [देवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वं
परतन्त्रः-अदृष्टाधीनः१इतरसत्ताधीनसत्ताकः२उत्कृष्टशास्त्रं
परतउत्पत्तिकत्वं-ज्ञानमात्रजनकसामग्र्यतिरिक्तकारणप्रयो-
ज्यत्वम् १आगन्तुकभावकारण(पेक्षज्ञानसामग्रीजन्यत्वम् २)
परदारी-व्यभिचारी। [सहकृतज्ञानप्रयोजकप्रयोज्यत्वं
परतोग्राह्यत्वं-स्वाश्रयग्राहकातिरिक्तसामग्रीग्राह्यत्वम् १ज्ञान-
परचक्रं-शत्रुसैन्यम्। [मात्रग्राहकसामग्रीभिन्नसामग्रीग्राह्यत्वं
परतःप्रमाणत्वं-आम्नायरूपमूलप्रमाणसापेक्षप्रमाणत्वम् ।
परत्वं-सीमापरिच्छिन्नत्वम् १परव्यवहारासाधारणकारणम्।
परदेशः-स्वाधिष्ठितदेशाद्भिन्नदेशः।परभेदी-इतरच्छेदकारकः।
परप्रकाशत्वं-वेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं।परपुष्टा-वेश्या
परममहत्त्वं-अपकर्षानाश्रयपरिमाणवत्त्वम्। [आत्मा यस्य
परमहंसः-ज्ञाननिष्ठापूर्वकशिखासूत्ररहितः१परमः श्रेष्ठः हंस

परमाणुः-परमः सर्वचरमकः अणुः १मूर्तत्वे सति निरवयवः२ मनोभिन्नत्वे सति परमाणुत्वपरिमाणवान् ३ जालसूर्यमरीचिस्थं यत्सूक्ष्मं दृश्यते रजः, तस्य षष्ठतमो भागः परमाणुः स
परमात्मा-मायायां प्रधानभूतसत्त्वोपाधिकचैतन्यम् [उच्यते
परम्परा-उत्तरोत्तरम् १अविच्छिन्नधारा। [घटितः संबन्धः
परम्परासंबन्धः-स्व(साक्षात्)संबन्धिनः संबन्धः२संबन्धान्तर-
परम्परासाधनं-परम्परया साधनम् १साधनान्तरघटितं साधनं
परलोकः-शरीरान्तरसंबन्धः१स्थूलशरीराभिमानपरित्यागः२
परवशः-परा(श्रितः१)धीनः। [पारलौकिकस्थितिस्थानं
परवञ्चनं-परस्य व्याजेन वशीकरणम्। परवाणिः-न्यायकर्ता।
परवादः-किंवदन्ती।परवादी-वादविवादकारकः। [त)यवैतृष्ण्यं
परवैराग्यं-ब्रह्मज्ञानसाधारणविष(येषु त्रिगुणत्वादिदोषदर्शना-
परसामान्यं-अनुगतबुद्धिव्यवहारहेतुभूतसत्ता १अधिकदेशवृत्तित्व
परा-उत्कृष्टा। पराक्रमः-पराभिभवसामर्थ्यम् १परबलनिराकरणं
पराक्रमी-विक्रमशाली।पराक्रान्तः-बलिष्ठः। पराजयः-कृत्य-
पराजितः-वशीभूतः। [साध्यत्वधीप्रयुक्तप्रवृत्त्यभावः
पराभवः-अन्तर्धानम्।पराभूतः-अपमानितः। [यको विचारः
परामर्शः-व्याप्तिविशिष्टपक्षधर्मताज्ञानम् १गुरुवाक्यतात्पर्यनिर्णा-
पराङ्मुखं-बहिर्मुखं।परायणः-पराकाष्ठा।परायत्तः-परमुखापेक्षी
परार्थानुमानं-न्यायप्रयोज्यानुमानम् १परव्यामोहनिवर्तनक्षमं
परार्थानुमितिः-स्वयं व्याप्याद्व्यापकं प्रतीत्य परप्रतिपत्त्यर्थं प्रयुक्ता (त्पञ्चा)त्त्र्यवयववाक्यात्परस्य व्यापकप्रत्ययः।
परार्द्धं-सङ्ख्या (ऽशेषः१) पर्यवसानम् २ स्थानात्स्थानं दशगुणमेकैकं गुण्यते द्विजाः, ततो ह्यष्टादशे भागे परार्द्धमभिधीयते।
परावाक्-मूलाधारचक्रस्थवाग्व्यभिव्यङ्ग्योतिसूक्ष्मात्माऽस्म-

दादेरप्रत्यक्षः शब्दः । परिक्रमणं-अभिनयविशेषः ।
परावृत्तखड्गविद्या-युद्धोपयोगचातुरीविशेषेण पराङ्मुखगमनं
परिकरः-पर्यङ्कः१ समुत्पन्नार्थबाहुल्यम् । परिक्षेपः-चालकः ।
परिक्षेपगद।युद्धं-बहुषु समन्तात्परिभ्रमणेन शत्रूणां क्षेपः ।
परिखा-परोपान्तखाता । [हत्वेपि परोपनीतं बाह्योपकरणं
परिग्रहः-शरीरनिर्वाहाधिकार्थार्जनम् १ देहधारणार्थकमस्पृ-
परिघः-परिवेषः१परितोहन्तीति२सर्वतः कण्टकिततोलोहदण्डः
परिचयः-तत्तेदन्तोल्लेखिनी बुद्धिः१ज्ञातस्य पौनःपुन्येन ज्ञानं
परिचायकत्वं-तदघटकत्वे सत्यर्थविशेषज्ञापकत्वम्।।४१६२।।
परिच्छिन्नं-सीमाबद्धम् १ विभाजितम् २भेदप्रतियोगित्वं परि-
च्छिन्नत्वम् ३प्रतियोगिसमानसत्ताकात्यन्ताभावप्रतियोगित्वं
परिचारिका-शुश्रूषाकर्त्री । परिच्छेदः-विशेषरूपेणेयत्ताकरणं
परिणामः-प्रकृतेरन्यथाभावः१पूर्वरूपापाये रूपान्तरापत्तिः२
पूर्वरूपपरित्यागे सति नानाकारप्रतिभास इति ग्रं० ३ उपा-
दानसमसत्ताकत्वे सत्यन्यथाभावः । विवर्तवारणाय सत्य-
न्तम्,घटस्य तन्तुपरिणामत्ववारणाय विशेष्यदलम्४१७४
परिणामदर्शी-दूरदर्शी । परिणामदृष्टिः-विमृश्यकारिता ।
परिणाषणं-धिक्कृत्यभाषणम् । परित्राणं-हस्तवारणम् ।
परितापः-वृथादुःखचिन्तनम् १स्वजनवैकल्यनिमित्तो दाहः ।
परिदानं-द्रव्यान्तरग्रहणेन द्रव्यान्तरदानं।परिदेवनं-शोकान्वितं
परिदेशः-द्विरज्जुकः । परिधानं-परिहितवस्त्रम् । [गमनं
परिधावनमल्लविद्या-एकस्य तिष्ठतः समन्तादन्यस्य गमना-
परिन्यासः-निष्पत्तिन्यासः१संशुद्धार्थभाषणम् । [नकारकः
परिभावनं-अनादरः१आश्चर्यार्थनिवेदनम् । परिभावी-अपमा-
परिभाषा-कृत्रिमसंज्ञा १ स्वशास्त्रसङ्केतः२आधुनिकसं० ३शास्त्र-

कृतासाधारणसं०४साक्षाच्छास्त्रतात्पर्यग्राहकम् [जनकं सूत्रं
परिभाषासूत्रं-लक्ष्यधार्मिकसाधुत्वप्रकारकबोधोपयोगिबोध-
परिमाणं-मानव्यवहारासाधारणकारणम् । दण्डादिवारणाय
मानेति,कालादिवारणायासाधारणेति,शब्दत्ववारणाय का-
परिमितः-कृतपरिमाणः। परिमेयं-परिच्छिन्नम्। [रणमिति
परिवर्त्तः-वर्णान्तरकल्पना । परिवर्तनं-इतस्ततो भ्रमणम् ।
परिवादः-समक्षे परदूषणविधानम् । परिवाहः-जलोच्छ्वासनम्
परिवृत्तिः-वस्तुस्थितिविपर्यासवचनम्।परिवेदनं-साक्षरशब्दः
परिशिष्टं-क्रोडपत्रं १अवशिष्ट(ांशप्रतिपादको)र्थबोधकोग्रंथः
परिशेषः-प्रसक्तप्रतिषेधे सत्यन्यत्राप्रसङ्गाच्छिष्यमाणे संप्रत्ययः
परिशेषानुमानं-विशेषाभावसहकृतसामान्यहेतुकानुमानम् ।
परिसङ्ख्याविधिः-उभयप्राप्तावितरव्यावृत्तिबोधको विधिः,
यथा यागाङ्गत्वेन पशुरशनाग्रहणे कर्तव्ये यागाङ्गत्वविशे-
षादश्वगर्दभयोर्द्वयोरशनाग्रहणशङ्कायामश्वमभिधानीमादत्ते
इति गर्दभरशनाग्रहणव्यावृत्तिविधिः। यथा वा पञ्च पञ्च
नखा(खड्गकूर्मशशशल्लकीगोधादयः)भक्ष्या इति,न कलञ्जं
भक्षयेदित्यादिनिषेधवाक्येतिव्याप्तिवारणायोभयप्राप्तावि-
परिसर्पः-प्रथमं दृष्टस्य पश्चान्न दृष्टस्यानुसरणम्। [ति
परिहारः-करमोक्षः १ दोषा(पनयः२)द्युद्धरणम् ३ अज्ञानाभा-
वसंपादकव्यापारः ४ दौस्स्थ्यपरिहारेण स्वास्थ्यसिद्ध्यर्थं
परिहासः-केलिः१चतुरनर्मोक्तिः। [दीयमानं द्रव्यं
परीक्षकः-तर्केण प्रमाणैरर्थं परीक्षिता १प्रमाणेन परीक्ष्य व्यवह-
र्ता*२शास्त्रसंस्कृतमतिः३प्राप्तशास्त्रजन्यधीप्रकर्षः [धारणं
परीक्षा-दुष्टादुष्टतावलोकनम् १तर्कप्रमाणादिना वस्तुतत्त्वाव-
परीक्षाफलं-भूतपूर्वाध्ययनादिक्रियासाफल्यम्। परीतात्मा-वि-

परीतबुद्धिः । परीप्सुः-प्राप्तुमिच्छुः । परीवादः-भर्त्सना ।
परुषता-श्रुतिकटुता।परुषोक्तिकः-निष्ठुरवक्ता [मोदकादिभोजनं
परेच्छाप्रारब्धं-परेच्छापूर्वकं भुज्यमानम्, यथा प्रियानुरागेण
परोक्षत्वं-द्व्यहवृत्तत्वम् १कुड्यकटाद्यन्तरितत्वम्* २ परोक्ष-
ज्ञानविशिष्टत्वम् ३साक्षात्कृतमित्येतादृशविषयताशालिज्ञा-
नाविषयत्वम् । [पयचित्तादात्म्यानापन्नं प्रमाणचैतन्यं
परोक्षज्ञानं-अनुमानादिजन्यं ज्ञानम् १परोक्षार्थविषयकज्ञानं२वि
परोपकारः-परहितसंपादनम् । पर्णकुटी-पत्रप्रचुरशाला ।
पर्दः-अपानवायुः।पर्परीकः-जलाशयः। पर्यटनं-इतस्ततो भ्रमणं
पर्यनुयुक्तः-जिज्ञासितः। [गृहीत' इत्यनुद्भावनं
पर्यनुयोज्योपेक्षणनिग्रहस्थानं-निग्रहस्थाने प्राप्तस्यापि'त्वं नि-
पर्यन्तत्वं-तदवधिकविप्रकर्षशून्यत्वे सति तत्सन्निकृष्टत्वम् ।
पर्यवसानं-तात्पर्यवृत्त्या बोधनम्। पर्यवस्थानं-विरोधः१खण्डनं
पर्यवसितं-पूर्वापरालोचनेनावधारितोर्थः। [न्नसंबन्धत्वं
पर्याप्तित्वं-अनित्यत्वे सति व्याप्यवृत्तित्वे च सति स्वरूपभि-
पर्यायः-समानार्थबोधकः शब्दः१नानाशब्दैकार्थबोधकः, यथा
घटः कलश इत्यादिः२तत्समानार्थकपदान्तरेण तदर्थकथनम्
पर्युपासनं-क्रुद्धस्यानुनयः।पर्युषितं-मूर्खम् १व्यर्थम् २गतवत्सरशेषं
पलं-षोडशमाषः१दशधरणिकम् २घटिकायाः षष्टितमो भागः।
पललं-तिलपिष्टम् । पलाण्डुः-म्लेच्छकन्दः । पल्पूलनं-शोधनद्रव्यं
पलितं-कर्दमम् १केश(पाकः२)विकारः । पलिक्निः-बालगर्भिणी ।
पवनमदः-प्रयाणभरितस्य परदेशेच्छाहेतुर्मदः।पल्ली-क्षुद्रग्रामः
पवित्रं-शुद्धिहेतुः १ पापहीनम् २ पापविनिर्गमनकारणं वा ।
पशुः-मूर्खः१प्रकृतिद्रव्यं२पशुत्वसंबन्धी ३लोमवल्लाङ्गूलवत्त्वं
पशुब्राह्मणः-भक्ष्याभक्ष्यं समं यस्य वाच्यावाच्यं प्रियाप्रियम्,करो

त्यगस्यागमनं कृतघ्नो ब्राह्मणः पशुः।पशुपतिः-जीवानामीश्वरः।
पशुमारं-विधृत्य हस्तौ पादौ च युगपत्पृथगेव वा, यथा स्फलन-
पशुयागः-पशोर्यागः१पशुबलिः। [मुत्फाल्य पशुमारं तदुच्यते
पश्चात्तापः-मोहादवधीरितस्यार्थस्य पश्चात्परितापः ।।४२००
पश्चिमत्वं-अस्ताचलसन्निहितदेशावच्छिन्नत्वम्। [शब्दः
पश्यन्ती-नाभिचक्रस्थवाग्वभिव्यङ्ग्यो योगिप्रत्यक्षगोचरः
पाकः-विजातीयतेजःसंयोगः १ विक्लित्त्यनुकूलव्यापारो वा।
पाखण्डः-परवञ्चनार्थं(उच्छृङ्खलप्रवृत्तिः१)तपोजपाद्यभिनयः२
पालनाच्च त्रयीधर्मः पशब्देनेह कथ्यते,तं खण्डयन्तिये मूढा
पाखण्डास्तेन ते स्मृताः। [कारी३वेदविरुद्धार्थप्रतिपादकः
पाखण्डी-कपटवेशधारी१वेदाचारपरित्यागी२वेदादेशान्यथा-
पाचकः-विक्लित्त्यनुकूलव्यापाराश्रयः। पाटवं-क्रियायोग्यता
पाठः-कण्ठताल्वाद्यभिघातः१शास्त्रादेः पौनःपुन्येनोच्चारणम्।
पाठकः-अध्ययनमध्यापनं वा कर्ता। पाठनं-अध्यापनम्।
पाठव्यसनं-शास्त्रतात्पर्यग्रहणेन समग्रावस्थापाठासक्तिः।
पाणिः-मणिबन्धावध्यङ्गुलिपर्यन्तः १ आदानक्रियासाधनम्।
पाण्डित्यं-विज्ञता १ प्राज्ञत्वम्२सभाकम्पादिदोषराहित्यम्।
पातालं-अधोभुवनम्। पातुकः-पतनशीलः। [नादियोग्यं
पात्रं-आधेयधृतवस्तु१स्वयजमानयो रक्षकम्२श्राद्धभोजनदा-
पात्रवर्गः-नर्तकसमुदायः। [नत्वे सति विरतिमत्पदं
पादः-चतुर्थांशः१श्लोकादिचतुर्थभाग इति ग्रं०२ पुनरावर्तमा-
पादकृतपापं-सतां पादप्रहरणादिकम्। पादमूलं-चरणाधोभागः
पादविक्षेपः-पादविहरणम्। पादविकः-यात्रिकः१पथिधावकः।
पादसेवनभक्तिः-कालदेशाद्युचितपरिचर्या। [च्चारणं
पादावृत्तिः-पादस्य वाक्यान्तर्गतस्यावृत्तिर्वाक्यान्तरे पुनरु-

पादुका-पादकोशः १ पादरक्षिका २ चर्मादिनिर्मितपादाच्छादनं
पादेन्द्रियं-गमनक्रियासाधनमिन्द्रियम् । [व्यापारः
पानं-पानभाजनम् १ द्रवद्रव्यस्य गलविलाधःसंयोगानुकूलो
पापं-अपराधः १ दुरदृष्टं २ निषिद्धक्रियाजन्यम् ३ वेदैकप्रतिपाद्योऽ
पापकर्म-पापजनकं कर्म १ दुःखदुःखान्तरकरं कर्म । [नर्थः
पापमय्यमं-आम्रपनसादिशरीरापादकम् । पापी-पापपूरितः।
पापसामान्यं-लोकेज्यगोगजाश्वत्थतुलस्यादिशरीरप्रापकम् ।
पापहरः-दुर्वासनाहरः । पापाचारः-कुचेष्टः १ निर्निमित्तं हिंसकः
पापात्मा-पापकर्मकर्ता १ पापपरायणः । पापाशयः-दुष्टहृदयः ।
पापोत्कृष्टं-परतापकगुच्छगुल्मवृश्चिकादिशरीरप्रापकम्। [त्वं
पामरत्वं-शास्त्रसंस्कारशून्यत्वे सत्यैहिकविषयपरमार्थदृष्टिम-
पायुः-मलद्वारम् १ विसर्गक्रियासाधनम् । पारः-उत्तरोऽवधिः ।
पारक्यं-परलोकहितसाधनं कर्म । पारणं-व्रतान्तभोजनम् ।
पारमार्थिकः-स्वाभाविकः १ कालत्रयावाध्यः २ सत्यस्थितः ।
पारदृश्वा-अभिज्ञः १ दूरदर्शी। [न्तपाठाधिकारेण प्रवृत्तं
पारायणं-साकल्यवचनम् १ भागवतादीनामा(वृत्त्या पाठः २)द्य-
पारावारं-ससीमम् । पारार्थ्यं-परोद्देशेन प्रवृत्तकृतिव्याप्यत्वम्।
पारितं-निस्तीर्णम् । [सूचनालापं स भवेत्पारिपार्श्वकः
पारिपार्श्वकः-सूत्रधारस्य पार्श्वे कः प्रवदन्कुरुतेऽर्थनाम् ,काव्यार्थ-
पारिभाषिकः-शास्त्रकारसङ्केतविशेषेण तत्तदर्थबोधकः शब्दः।
पारिभाषिकीसंज्ञा-उभयवृत्तिधर्मावच्छिन्नसङ्केतवती संज्ञा ।
पारुष्यं-निष्ठुरभाषणम् १ प्रत्यक्षरूक्षवदनशीलत्वमिति ग्रं०
पार्थिवः-पृथ्वीसंबन्धिपदार्थः। पार्श्ववर्ती-समीपी १ परिचारकः।
पार्विकः-सहचरः १ पक्षपाती जनः । पालनः-जीवनरक्षाकारी ।
पार्श्वं-कक्षाधोभागः १ रथचक्रप्रदेशस्थमश्वम् । पार्ष्णिः-गुल्फा-

धोभागः१पादस्य पश्चाद्भागः । पार्ष्णिग्रहः-पृष्ठरक्षकः । पावकमदः-कामरसभरितस्य वनितासंभोगेच्छया तदनुकूल- पाशः-समीपस्थगले प्रक्षेप्यसाधनम् । [व्यापारहेतुर्मदः पाशकः-द्यूतक्रीडासाधनं। पाशुपतः-महादेवमन्त्रोपासकः१पशु- पाषण्डी-वेदविरुद्धाचरणकारी । [पतितत्त्वे व्यवस्थितः पाषाणहृदयः-नृशंसहृदयः।पिङ्गलानाडी-दक्षिणनासिकास्था नाडी पिच्छः-कुट्टनम् । पिञ्जरं-देहास्थिवृन्दम् । पिठकः-संक्लेशकः। पिण्डः-सचूर्णितः१गृहैकदेशः।पिंडी-ज्ञाननिरूपणार्थकोपन्यासः पिता-जनयिता १ उत्पादकः २ दोषाच्छत्रुभ्यो वा रक्षाकर्ता । पितृत्वं-सपिंडीकरणोत्तरश्राद्धजन्यफलभागित्वम्। [तनशीलः पितृयज्ञः-पित्रुद्देशेन यज्ञः।पितृवंशः-पितृयानमार्गः।पिपातिषुः-प- पिपासुः-पातुमिच्छुः।पिशुनः-अन्तर्द्रोहिकः।पीठगः-स्वासनस्थः पीडनं-दुःखोत्पादनम् १शत्रुकृतगाढप्रहारः । पीडा-उत्क्लेशः । पीडितः-संजातपीडा। पीडिनी-पीडनकर्त्री। पीतः-पायितपेयः पुँल्लिङ्गः-पुंल्लिङ्गत्वेन परिभाषितः१अयमितिव्यवहारविषयः पुंयोगः-पुरुषमैथुनं।[गामिनी ४पुरुषदर्शनमात्रेण परिप्लुतेन्द्रियः पुंश्चली-धर्षिता१निशाचरी२पुम्भिः कृता मैत्री३पुरुषमात्राभि- पुण्यं-अभ्युदयहेतुः१विहितानुष्ठानजन्यम्२वेदैकप्रतिपाद्योर्थः। पुण्यकर्म-पवित्रं कर्म१पुण्यजनकक्रिया२इष्टेष्टान्तरकरं कर्म पुण्यमध्यमं-इन्द्रादिशरीरप्रापकम् । पुण्यक्षेत्रं-तीर्थस्थानम् । पुण्योत्कृष्टं-हिरण्यगर्भशरीरप्रापकम् । पुत्रैषणा-पुत्राभिमानः। पुण्यसामान्यं-यक्षरक्षआदिशरीरापादकम्।पुण्यस्थानं-तीर्थस्थानं पुत्रः-पुन्नाम्नो नरकाद्यस्मात् त्रायते पितरं सुतः, तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा १ कोऽर्थः पुत्रेण जातेन यो पुत्रियः-सन्तानोचितः । [न विद्वान्न धार्मिकः

पुद्गलः-सुंदराकारः १द्व्यणुकादिपदार्थविशेष इति बौद्धाः२द्रव्ये-
न्द्रियनियाताकार इतिजैनाः३प्रतिक्षणमुपचीयापचीयमानःप-
पुनः-द्वितीयवारम्।पुनरुक्तिः-एकार्थबोधकानेकपदोक्तिः।[दार्थः
पुनरुक्तनिग्रहस्थानं-अनुवादं विना कथितस्य पुनः कथनम् ।
पुरं-राजाश्रयः १ गृहोपरिगृहस्थानम् २ बहुग्रामीणव्यवहार-
पुरः-पुरादेशम् १अग्रगमनम् । पुरःसरः-पुरोगामी । [स्थानं
पुरश्चरणं-मन्त्रफलसिद्ध्यर्थं(नियतसंख्याको जपः १)उपोद्घात-
त्वेन पूर्वसेवनम् [तिपादकः२ऐतिह्यसमाचरिततया कीर्तनं
पुराकल्पार्थवादः-बहुकर्तृकत्वाख्यानम् १ परप्रवक्तृकार्थादिप्र-
पुराणं-पुरातनम् १ पुरा(भवम् २)नवम् ३ वेदाख्यानोपनिबन्ध-
नम्४सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च वंशानुचरितश्चैव
पुरातनं-पुरावृत्तप्रतिपादकमितिहासः। [पुराणं पञ्चलक्षणं
पुरुषः-कार्यकर्ता १पञ्चारत्निः२परिपूर्णः३ पूर्ष्वष्टसु(कर्मेन्द्रि-
यपञ्चकज्ञानेन्द्रियपञ्चकमनआदिचतुष्टयप्राणादिपञ्चकभूत-
पञ्चककामकर्माविद्याख्यासु)वसतीति ४ पुरुषार्थसंप(ादन-
योग्यः५)न्नः मनुष्यः ६ अजन्यत्वे सत्यजनकत्वं पुरुषत्वम् ।
पुरुषप्रयत्नः-स्वचिदवच्छिन्नप्रयत्नः।पुरोडाशः-पिष्टादिविकारः
पुरुषार्थः-पुरु(षैरर्थ्यः१ प एवार्थः२ षेण साध्योर्थः३)षाभिला-
षविषयः ४ त्रिविधदुःखात्यन्तनिवृत्तिरिति सां० ५ सुखा-
पुलिन्दः-निष्ठ्यात्किरातीजातः । [वाप्तिर्दुःखपरिहारः
पुरोयानं-स्वसैन्यस्याग्रे गमनम् । पुलकितं-संजातपुलकम् ।
पुरोहितः-पुरोग्रे धीयते सर्वकार्येषु प्रमाणत्वेन निवेश्यत इति
पुल्कसः-क्षत्रियायां शूद्रादुत्पन्नः १ चाण्डालाद्ब्राह्मणीजातः ।
पुष्करमाली-स्वर्णमालाधारी । पुष्कलं-चतुष्षष्टिमुष्टिकम् ।
पुष्टः-प्रवृद्धः१परिपूर्णशरीरसामर्थ्यविशिष्टः।पुष्टिः-बलिष्ठता

पुष्टिकरः-बलवर्धकः।पुष्पं-विशेषवचनम्।पुष्यपथः-स्त्रिया गुप्ता-
पुष्परसः-कुसुमनिर्यासो रसः।पुष्पशकटी-आकाशवाणी। [ङ्गं
पुष्पास्तरणं-पुष्पादिभिः शय्यारचनम्। पुष्पासारः-पुष्पवृष्टिः
पुस्तकं-लिप्याधारः १तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबन्धनात्,
मूर्खहस्ते न दातव्यं वदेदेवं च पुस्तकम्। [तद्वाचनं
पुस्तकवाचनं-अतिशीघ्रमविद्यमानानपि वर्णान् योजयित्वा
पूजनं-संमाननम् १मानप्रदर्शनम्। [नातिशायितृत्वं
पूजा-धनाद्यर्पणम् १देवतोद्देशेन द्रव्यत्यागः २पादप्रक्षालनार्च-
पूरकप्राणायामः-इडया षोडशमात्राभिः प्राणवायोः पानम्।
पूर्णः-कृत्स्नः १परिपूर्तिः। [लानि तु चत्वारिपूर्णपात्रं प्रचक्षते
पूर्णपात्रं-अष्टमुष्टिर्भवेत्किञ्चित्किञ्चिदष्टौ तु पुष्कलम्, पुष्क-
पूर्णमासयज्ञः-पूर्णिमायां क्रियमाणो यज्ञः।पूर्णकामं-आत्मकामं
पूर्णज्ञानी-परिनिष्ठितः।पूर्वकोटिः-पूर्वपक्षः।[पूर्तमित्यभिधीयते
पूर्तकर्म-वापीकूपतडागानि देवतायतनानि च,अन्नप्रदानमारामाः
पूर्वत्वं-क्रियाजन्यसंयोगप्रतियोगित्वम्। पूर्वकालीनः-प्रागभा-
पूर्वदिक्-उदयाचलसन्निहितदेशावच्छिन्नत्वम्। [वकालवृत्तिः
पूर्वपक्षः-सिद्धान्तनिरसनीयः प्रथमोपपादनीयः पक्षः १सिद्धा-
न्तविरुद्धतर्कोपन्यासेन सिद्धान्तविरुद्धसंशयैककोटिव्यवस्था-
पनम् २प्रकृतार्थविरोधितर्कोपन्यासरूपाधिकरणाङ्गविशेषः
पूर्वमीमांसा-पूर्वकाण्डविषयकसंशयनिवारको विचारः।
पूर्वरङ्गः-पूर्वं रज्यते जनोऽस्मिन्निति १ नाट्यवस्तुनः उपक्षेपकः
पूर्वरागः-नायकनायिकयोर्मेलनात्पूर्वजातानुरागः १श्रवणाद्दर्शना
द्वापि मिथः संरूढरागयोः,दशाविशेषो यो प्राप्तौ पूर्वरागः स उच्यते
पूर्वरूपं-रोगोत्पत्तिलक्षणं।पूर्ववाक्यं-बीजोद्घाटनम्।पूर्वार्धः-पूर्व-
पूर्ववदनुमानं-पूर्वगृहीतव्यक्तिसामान्यविषयमनुमानम्। [भागः

पूर्ववृत्तिः-कार्यप्रागभावाधिकरणक्षणवृत्तिः। पूर्वस्थितिः-पूर्वावि-
पूषानाडी-दक्षिणकर्णस्था नाडी।पृक्तः-संयुक्तः १मिश्रितः।[स्था
पृच्छा-उत्तरप्रयोजकः शब्दः १जिज्ञासाविषयकज्ञानानुकूलव्या-
पारः२यत्रान्वेषणमर्थानां वाक्यैरभ्यर्थनापरैः, जिज्ञासुः पृच्छति
पृच्छकः-जिज्ञासाकारी। [परं सा पृच्छा त्वभिधीयते
पृतना-सैन्यदलम् २४३ रथाः २४३ गजाः७२९अश्वाः१३१५
पृथक्त्वं-पृथग्व्यवहारासाधारणकारणम्। [पदातयः
पृथगर्थः-त्रिवर्गफलापेक्षया विपरीतफलम्।पृष्टः-कृतप्रश्नः।
पृथग्गुणः-त्रिवर्गसाधनापेक्षया विपरीतसाधनः।पृथक्-एकाकी
पृथिवी-पृथुत्वगुणयुक्ता १ गन्धसहचरितचतुर्दशगुणवती।
पृथुश्रीः-समृद्धिशाली।पेठुः-पठितवन्तः।पेयः-रुचिकरः। [नकारी
पेशी-मांसपिण्डम्।पेषणी-पेषणशिला।पेस्वरः-नाशकारी१गम-
पैशाचविवाहः-प्रमत्तेषु कन्यावन्धुषु चौर्येण कन्याग्रहणम्।
पैशून्यं-परोक्षे परदूषणवचनम्१परस्मै परोक्षे परदोषप्रकाशनं
पैष्टीसुरा-तण्डुलपिष्टसाध्योऽन्नविकारः। पैशल्यं-कोमलता।
पौतवं-तुलामानपरिच्छेदः। पोटा-पुरुषलक्षणान्विता स्त्री।
पौनःपुन्यं-प्रकृतधात्वर्थजातीयक्रियोत्तरतादृशक्रियान्तर्यम्।
पौरुषं-पराक्रमः१पुरुषप्रयत्नः२देहजसामर्थ्यम्।पौत्रः-पुत्रापत्यं
पौरुषेयः-पुरुषहितः*१ नूतनानुपूर्वीरचना २ प्रमाणान्तरेणा-
र्थमुपलभ्यविनिर्मितः३ पूर्वानुपूर्व्यनपेक्षपुंविशेषबुद्ध्यधीना-
नुपूर्वीमान्४ सजातीयोच्चारणानपेक्षोच्चारणविषयत्वम्।
प्रकटं-प्रत्यक्षम्१प्रादुर्भूतः। [हीनां तां प्रकरीमिति निर्दिशेत्
प्रकरी-फलं प्रकल्प्यते यस्याः परार्थं केवलं बुधैः,अनुबन्धवि-
प्रकरणं-उभयाकाङ्क्षा। उभयपदं शाब्दबोधकारणीभूता-
काङ्क्षाव्यावृत्त्यर्थम् १ अङ्गवाक्यसापेक्षं प्रधानवाक्यम् २

सङ्गतिप्रदर्शनप्रयोजिकाकाङ्क्षा* ३ एकार्थप्रतिपादकग्रन्थांशः ४ शास्त्रसिद्धान्तप्रतिपादको ग्रन्थः ५ शास्त्रैकदेशसंबद्धं शास्त्रकार्यान्तरे स्थितम्। [न्तरोद्भावनं
प्रकरणसमा-वादिप्रयुक्तसाधनस्य साध्याभावसाधकसाधना-
प्रकारः-सादृश्यम् १ गुणक्रियादिधर्मः २ सामान्यस्य भेदकोवि-
प्रकाशं-सर्वश्राव्यम् [शेषः ३ भासमानवैशिष्ट्यप्रतियोगित्वं
प्रकाशकः-स्पष्टकर्ता १ आविष्कारकः २ प्रकाशविरोधिनिरासकः
प्रकाशनं-स्वाभिप्रायाविष्करणम्। प्रकीर्णः-शिथिलावयवः।
प्रकाशमानत्वं-स्वसत्तायां स्वसत्ताप्रकारकसंशयाद्यगोचरत्वम्
प्रकृतः-प्रकरणप्राप्तः १ प्रतिज्ञाविषयः। प्रकृतिस्थः-अज्ञानवशः
प्रकृतिः-प्राचीनकर्मसंस्काराधीनस्वभावः* १ सत्त्वरजस्तमोगुणानां साम्यावस्थेति वे० २ संपूर्णाङ्गसंयुक्तो विधिः ३ प्राथमिकविधिप्रतिपादितसमग्रेतिकर्तव्यताकत्वमिति मी० ४ कार्याकारेण विक्रियमाणमिति नै० ५ तत्त्वान्तरारम्भकम् ६ साक्षात्परम्परयाखिलविकारोपादानं वा ७ अजन्यत्वे सति जनकत्वमिति सां० ८ अर्थावबोधहेतुः प्रत्ययविधानावधिभूतः शब्दविशेषः ९ प्रत्ययनिष्ठविधेयतानिरूपितोद्देश्यताश्रयत्वमिति वै० १० एकविंशत्यक्षरपादच्छन्दः। [तत्वं
प्रकृतिभावः-निर्विकारस्वरूपेणावस्थानम् १ संधिकार्यारहि-
प्रकृत्यर्थः-प्रकृतिवृत्त्युपस्थाप्यः १ प्रकृतिप्रयोज्यशाब्दबोधविषयः २ प्रकृतिजन्यप्रतीतिविशेष्यतया प्रतीयमानोऽर्थः।
प्रक्रिया-निरूपणम् १ प्रकर्षेण क्रियासाधनम् २ शब्दप्रयोगसाध-
प्रक्षेपगदायुद्धं-दूरस्थे शत्रौ त्यागः। [नावस्थेति ग्रं०
प्रख्यातं-इतिहासनिबन्धनम्। प्रगमनं-उत्तरोत्तरं वाक्यम्। [मः
प्रगल्भः-प्रवीणमतिः १ असभाकम्पवक्ता २ कार्याकार्यविधारणक्ष-

प्रकृतिविकृतित्वं-तत्त्वान्तरोपादानत्वे सति तत्त्वान्तरोपादेयत्वम्।

प्रग्रहः-गलहस्तकः १दृढबन्धनम्।प्रचण्डः-दुर्धर्षः १प्रतापी २क्रो-
प्रचयः-राशिकरणम् । प्रचारः-भ्रमणकारी । [धमूर्छितः
प्रच्छा-ज्ञानेच्छानुकूलव्यापारः।प्रजनं-पुत्रोत्पादनम् १स्त्रीगव्या-
प्रजा-संततिः १वैश्यशुद्रान्त्यजः। [दिषु पुङ्गवादेः संयोजनं
प्रजात्यानन्दः-संतानार्थं संभोगः।प्रजापतिव्रतं-ऋतौभार्यागमनं
प्रजानिषेकः-गर्भस्थापनम् । प्रज्ञाचक्षुः-अन्धः १ बुद्धिनेत्रः ।
प्रज्ञा-तत्त्वदर्शनम् १गृहीतविशेषकरी २ग्रन्थार्थग्रहणसामर्थ्यम्।
प्रज्ञामान्द्यज्ञानप्रतिबन्धः-श्रुतार्थग्रहणधारणापटुत्वम्। [वः
प्रडीनं-अभितोगमनम्।प्रणादः-गर्जनम् १ गुणानुरक्तलोकप्रभ-
प्रणामः-वन्दनम् १स्वापकर्षबोधककरशिरःसंयोगादिव्यापारः।
प्रणाली-जलनिर्गमपथः । प्रणिधानं-कर्मणां फलत्यागः १मनसो
प्रतापः-यथापेक्षं शत्रौ विक्रमणम्। [विषयान्तरसंचारवारणं
प्रतिकर्म-अङ्गकर्म १विद्यमानगुणान्तराधानम्।प्रतिकल्पः-प्रत्यु-
प्रतिकारः-कृतस्यापकारस्य तुल्यरूपापकारकरणम्। [पकारः
प्रतिकूलः-अननुकूलः १द्वेषविषयः २विरुद्धपक्षावलम्बी। [पता
प्रतिग्रहः-अदृष्टार्थत्यक्तद्रव्यस्वीकारः। प्रतिच्छाया-प्रतिरू-
प्रतिघातः-बाधा १ मारणम् २बलवत्तरवेगप्रयुक्तद्रव्यसंयोगः।
प्रतिज्ञान्तरनिग्रहस्थानं-परदत्तदोषोद्धारेच्छया पूर्वमनुक्तेन
विशेषणेन विशिष्टतया प्रतिज्ञातार्थस्य कथनम् ॥ ४५१८॥
प्रतिज्ञा-अभ्युपगमवाक्यम् , यथा इदं करिष्यामीत्याकारक-
वाक्यम् १कर्तव्यत्वप्रकारकज्ञानानुकूलव्यापारः ३ उत्तरकाले
स्वकर्तव्यत्वेन निर्देशः। [ध्यविशिष्टपक्षबोधजनकवचनं
प्रतिज्ञावयवः-पक्षे साध्यनिर्देशः,यथा पर्वतो वह्निमानिति १सा-
प्रतिज्ञाविरोधनिग्रहस्थानं-स्वाभिहितसाध्यप्रतिद्वन्द्विहेतुकथनं
प्रतिज्ञासंन्यासनिग्रहस्थानं-स्वाभिहितार्थे परेण दूषिते तदपलाप

प्रतिज्ञाहानिः-स्वकृतोक्तपरित्यागः। [स्वीकारः
प्रतिज्ञाहानिनिग्रहस्थानं-प्रतिज्ञातार्थं (परित्यागः१) विरुद्धार्थं-
प्रतिज्ञेयः-प्रतिज्ञातव्यः । प्रतितन्त्रं-स्वमतविरुद्धशास्त्रम् ।
प्रतितन्त्रसिद्धान्तः-वादिप्रतिवाद्येकतरमात्राभ्युपगतः सिद्धान्तः
प्रतिदानं-विनिमयः१द्रव्यान्तरग्रहणपूर्वकं दानम् ॥४५३०॥
प्रतिदृष्टान्तसमा-अन्येन दृष्टान्तेन साध्याभावस्य साधनम्।
प्रतिपत्तिः-उपलब्धिः१प्रतिविधानम्२तत्तत्कालोचिता स्फूर्तिः।
प्रतिपत्तिकर्मत्वं-उपयोक्ष्यमाणसंस्कारभिन्नसंस्कारकर्मत्वम् ।
प्रतिपादनं-प्रतिपत्त्यनुकूलशब्दप्रयोगः१प्रतिपाद्यं मुखतः प्रति-
ज्ञाय पश्चात्तत्सिद्धिहेतुप्रदर्शनम्। प्रतिपाद्यं प्रतिज्ञाय हेतु-
वर्णनमित्युक्त उपोद्घातेपि प्रसङ्गस्तदर्थं मुखत इति,अवय-
वविपर्यासेनाप्राप्तकालतां व्यावर्तयति पश्चादिति,असंबद्ध-
प्रतिपाद्यं-प्रतिपादनयोग्यम्। [हेतुव्यावृत्यर्थं तत्सिद्धिरिति
प्रतिप्रसवः-निवृत्तस्यार्थस्य पुनः प्राप्तिः१प्रतिषि(द्धस्य प्रति-
षेधे पुनः संभावना २) द्धैकदेशस्य पुनर्विधानमिति ग्रं० ।
प्रतिबन्दी-आपत्तिः१तुल्ययुक्तिः१नोद्यंपरिहारसाम्यमिति ग्रं०
२प्रकृतैककल्पे प्रवृत्तंपुरुषमुद्दिश्याप्रकृतकल्पान्तरापादनम्
प्रतिबन्दितर्कः-समानविरोधितर्कः, यथा शब्दो यदि नित्यो न
स्यात्तदा श्रावणो न स्यादिति मीमांसकेनोक्ते नैयायिक आह
शब्दो यद्यनित्यो न स्यात्तदा कृतिसाध्यो न स्यादिति४५५४
प्रतिबन्द्युत्तरं-अनिष्टान्तरप्रसंजकमुत्तरम्।प्रतिभयः-भयकारी
प्रतिबन्धकत्वं-कार्यानुकूल(व्यापारोपष्टम्भकत्वम्१)किञ्चिद्ध-
र्मविघटकत्वम्,यथाग्नौ दाहरूपकार्यानुकूलस्य कस्यचिद्ध-
र्मस्य शक्त्याख्यस्य विघटको मणिमन्त्रौषधादिः२सामग्रीका-

---

१ यदि पुरुषत्वादयं चौरस्तदा एवं त्वमपि चोरः स्या इत्यापादनम्।

लीनकार्यानुत्पादप्रयोजकत्वम् ३ पुष्कलकारणे सति कार्यो-
त्पादविरोधित्वम्।सामग्र्यभावं व्यावर्तयितुं पुष्कलेति४-
प्रतिभटः-संमुखयुद्धकर्ता। [कारणीभूताभावप्रतियोगित्वं
प्रतिबलः-प्रतिद्वन्द्वः१समानवीर्यः २ परबलाभिभवसमर्थं बलम्
प्रतिबिम्बं-छायाविशेषः१तदधीनत्वे सति तत्सदृशम् २ उपा-
ध्यन्तर्गतत्वे सत्यौपाधिकपरिच्छेदशून्यत्वे सति बहिःस्थित-
स्वरूपकत्वम् । बिम्बवारणायाद्यम्, घटाकाशादिवारणाय
द्वितीयम्, दर्पणाद्यन्तर्गततदवयववारणाय तृतीयमिति
न्यायरत्नावल्याम् ३ उपाधिनिमित्तस्वप्रतियोगिकव्याप्य-
वृत्तिभेदकत्वे सत्युपाधिपरिच्छिन्नत्वम् । [तिभासः
प्रतिभा-स्फूर्तिः१ नवनवोन्मेषशालिनी बुद्धिः । प्रतिभानं-प्र-
प्रतिभाप्रमाणं-अनियतदेशकालमाकस्मिकं सदसत्सूचकं ज्ञानं
प्रतिमा-प्रतिकृतिः। प्रतिमाला-सर्ववस्तुप्रतिकृतिनिर्माणम् ।
प्रतिमुखं-बीजस्योद्घाटनं यत्र दृष्टनष्टमिव क्वचित्, मुखाहि-
प्रतियोगः-विरुद्धसंबन्धः। [तस्य सर्वत्र तद्वै प्रतिमुखं स्मृतं
प्रतियोगी-सहायकः१स्वाश्रयसंयुक्तः२यस्याभावः स तस्य३-
प्रतिरवः-प्रतिध्वनिः। [धर्मिभिन्नत्वे सति भेदनिरूपकत्वं
प्रतिरुद्धः-प्रतिरोधकर्मा । प्रतिरूपं-अवरूपम्१प्रतिच्छाया ।
प्रतिलोमः-अव्यवस्थितक्रमः।प्रतिवस्तु-समानान्तरः[र्थसादृश्यं-
प्रतिवस्तूपमा-भिन्नशब्दबोध्यैकधर्मगम्यं प्रस्तुताप्रस्तुतं वाक्या-
प्रतिवादः-वादिप्रयुक्तन्यायवाक्यविरुद्धन्यायवाक्यप्रयोगः ।
प्रतिवादी-वादिप्रयुक्तन्यायवाक्यविरुद्धन्यायवाक्यप्रयोगकर्ता
प्रतिश्रुतं-स्वीकृतम् १प्रतिध्वनिः।प्रतिवासी-गृहासन्नवासी ।
प्रतिषेधः-मा कार्षीः१दूषणाभिधानम्२ईप्सितार्थप्रतिघातः३-
प्रतिषेधकः-निषेधकर्ता। [कर्तृत्वाभावानुकूलव्यापारः

प्रतिसंधानं-अनुचिन्तनम् १ नष्टद्रव्यस्योपलब्धिव्यापारः ।
प्रतिसर्गः-प्रलयः १ ब्रह्मणः सृष्ट्यनन्तरं दक्षादीनां सृष्टिः ।
प्रतिहारः-द्वारपालः १ मायाकारी । प्रतिहारी-द्वाररक्षिका ।
प्रतीकः-प्रतिरूपः १अन्यत्रान्यदृष्ट्यालम्बनम् २आश्रयान्तरप्र-
त्ययस्याश्रयान्तरे प्रक्षेपः ३तद्भिन्नत्वे सति तद्बोधकत्वं प्रतीकत्वं
प्रतीकारः-प्रत्युपकारः। [दित्यादीनां ब्रह्मदृष्ट्योपासनं
प्रतीकोपासनं-अन्यवस्तुनोन्यरूपेणोपासनम् १ब्रह्मप्रतीकानामा-
प्रतीक्षा-निर्ज्ञातप्राप्त्यर्थप्रतीक्षणम् ।प्रतीतः-श्लाघितः १विश्व-
प्रतीपः-दुराग्रही १प्रसङ्गप्रतिकूलः । [सितः २प्रहृष्टचित्तः
प्रत्यक्षं-दृष्टिगोचरम् १प्रतिगतमक्षम् २ज्ञानाकारकज्ञानम् ३नि-
र्दोषार्थेन्द्रियसन्निकर्षोत्पन्नं ज्ञानम् । सन्निकर्षध्वंसवारणाय
ज्ञानमिति,अनुमित्यादिवारणायेन्द्रियार्थसन्निकर्षेति ४अबा-
धितापरोक्षार्थविषयकज्ञानम् ५व्याप्त्याद्यजन्यत्वे सति स्वका-
प्रतोदः-तीक्ष्णकीलाग्रो दण्डः। [लावच्छिन्नार्थबोधत्वं प्रत्यक्षत्वं
प्रत्यक्षप्रमा-अनुपलब्ध्यर्थापत्तिशब्दानुमानोपमानजप्रमिति-
व्यतिरिक्तत्वे सति प्रमितिः। अनुमादावतिव्याप्तिवारणा-
यानुपलब्धीत्यादिविशेषणम्,घटादिवारणाय प्रमितिरिति १
अनधिगताबाधितवर्तमानयोग्यविषयचैतन्याभिन्नं प्रमाण-
चैतन्यम् । अधिगतार्थविषयकयथार्थस्मृतावतिप्रसङ्गवार-
णार्थमनधिगतेति विषयविशेषणम्, भ्रमज्ञानेऽतिव्याप्तिवा-
रणायाबाधितेति, धर्माधर्मयोः प्रत्यक्षवारणाय योग्येति ।
प्रत्यक्षप्रमाणं-प्रत्यक्षप्रमाकरणम् । प्रमाकरणत्वमनुमानादाव-
तिव्याप्तिवारणाय प्रत्यक्षेति, भ्रमप्रत्यक्षकरणेतिप्रसङ्गवार-
णाय प्रमापदम् १सम्यगपरोक्षानुभवसाधनमिति जैनाः २वैशि-
प्रत्यनन्तरः-प्रतिनिधिः। [ष्ट्यानवगाहिज्ञानमिति नास्तिकाः

प्रत्यक्षबाधः-तत्त्वमस्यादिवाक्योत्थात्मसाक्षात्कारेणाज्ञानत-
त्कार्यनिवृत्तिः। [विषयचैतन्याभिन्नप्रमाणचैतन्यविषयः
प्रत्यक्षविषयः-इन्द्रियजन्यज्ञानविषयः १योग्यत्वे सति वर्तमान-
प्रत्यभिज्ञा-तत्तेदन्तावगाहिज्ञानं १संस्कारसहकृतेन्द्रियजन्यं ज्ञा-
नम्,यथा स एवायं देवदत्तः२एकस्य कालद्वयसंबन्धग्राहिज्ञानं
प्रत्ययः-प्रकृत्यर्थान्वितस्वार्थप्रत्यायकः १प्रकृतिमवधीकृत्य वि-
धीयमानः स्वार्थबोधकः शब्दविशेषः२धातुप्रातिपदिकान्यतर-
प्रत्ययार्थं-विश्वासजननार्थं [निष्ठोद्देश्यतानिरूपितविधेयताश्रयः
प्रत्ययैकतानः-सजातीयप्रत्ययप्रवाहः। प्रत्ययितः-यथार्थवक्ता
प्रत्यवायः-आगामिदुःखजनकदोषः १विध्युल्लङ्घनजन्यं पापम्।
प्रत्यासत्तिः-इन्द्रियसंबद्धविशेष्यकं सामान्यविषयकं ज्ञानम् ।
प्रत्यासन्नः-संबद्धः१अतिनिकटस्थः२ तद्विषयकप्रतीत्यव्यवहि-
तप्राक्कालिकप्रतिपत्तिविषयः । [ख्येनावस्थानं
प्रत्याहारः-इन्द्रियाणां स्वस्वविषय(भ्यः प्रत्याहरणम् १)त्रैमु-
प्रत्युत-वैपरीत्यभावः।प्रत्युत्पन्नमतित्वं-प्रत्युत्पन्नेर्थे मतिवैदग्ध्यं
प्रत्युत्तरं-उत्तरं प्रति उत्तरम् १प्रतिपक्ष्युच्चरितनिराकरणसम-
प्रथमः-पूर्वोच्चारणविषयः१स्वापेक्षापूर्वरहितः। [र्थवाक्यं
प्रथमात्वं-स्वादित्रिकान्यतमत्वम्। प्रथमाश्रमः-ब्रह्मचर्याश्रमः।
प्रथमाविभक्तित्वं-सङ्केतविशेषसंबन्धेन प्रथमापदवत्त्वम् ।
प्रदक्षिणं-दक्षिणावर्त्तेन देवमुद्दिश्य भ्रमणम्।प्रदीप्तः-प्रज्वलितः
प्रद्युम्नः-कन्दर्पः१प्रकृष्टद्रव्यप्रदः।प्रद्रवः-पलायनम्।प्रद्वेषः-घृणा
प्रधानं-प्रमुखः १ अग्रगण्यः २ सत्त्वरजस्तमोगुणसाम्यावस्था ।
प्रध्वंसाभावः-सादिरनंतोऽभावः। ब्रह्मनिरासार्थं सादीति,घटा-
दिव्यावृत्त्यर्थमनन्तेति, मोक्षवारणायाभावपदम् १ प्रतियो-
गिसत्तोत्तरकालिकोऽभावः २ उत्पन्नस्य कार्यस्य कारणेऽभा-

वः,यथा मुद्गरादिप्रहरणानन्तरं कपालादौ घटाद्यभावः ।
प्रपञ्चः-अस्तीर्णः१बाहुल्यम् *२ वैपरीत्यम् ३दृश्यत्वं जडत्वं परिच्छिन्नत्वं चिद्भिन्नत्वं वा प्रपञ्चसामान्यलक्षणम् ।
प्रपञ्चमार्गः-पापानां संसारप्राप्तिमार्गो जनिमृत्यात्मकः ।
प्रफुल्लः-विकस्वरः । प्रपन्नः-शरणागतः । प्रपा-पानीयशाला ।
प्रबन्धः-योजना१वाक्यसंदर्भः२सङ्घटितनानावाक्यसमुदायः।
प्रबलः-सुदृढः१दुर्निवारः।प्रभवः-प्रथमप्रकाशः।प्रभाकरः-दीप्ति-
प्रभुः-समर्थः१निर्वाहकः२सर्वनियन्ता।प्रभृति-तदारभ्य [करः
प्रमत्तः-उन्मत्तः१असावधानः२ विषयान्तरासक्त्याऽनवहितः।
प्रमा-शुद्धबोधः १ सम्यग्ज्ञानमिति जैनाः २ अविसंवादिज्ञानमिति बौद्धाः ३ अव्यभिचार्यनुभव,इति भाट्टाः ४ प्रमाणजन्यं ज्ञानमिति नै० ५ अनधिगततत्त्वबोधः पौरुषेयो व्यवहारहेतुरिति सां० ६संशयविपर्ययविकल्पस्मृतिरूपचित्तवृत्तिभिन्ना या चित्तवृत्तिः सेति योगिनः ७ अनधिगत (र्थग्राहित्वमिति मी० ८बाधितविषयकज्ञानम् ९) विषयकाबाधितज्ञानम् १० तस्मिंस्तद्बुद्धिरिति ग्रं० ११बोधेद्धा वृत्तिर्वृत्तीद्धबोधो वा ।
प्रमाणं-विवादनिर्णयसाधनम् १कर्तव्यनिश्चयकम् २ प्रमाकरणम् । छिदादिकरणकुठारादावतिव्याप्तिवारणाय मा पदम्, भ्रमज्ञानकरणदुष्टचक्षुरादावतिव्याप्तिवारणाय प्रपदम् , प्रमाप्रमाणमित्युक्तेऽसंभवः स्यादतः करणमित्युक्तम् ३ व्यापारवत्तासंबन्धेन प्रमितिविभाजकोपाध्यवच्छिन्नासाधारणकारणम् । चाक्षुषादिप्रमित्यसाधारणकारणे विषयेन्द्रियसंबन्धादौ व्यापारेऽतिव्याप्तिवारणाय व्यापारवत्तासंबन्धेनेति, अन्यप्रमाणस्यान्यप्रमाणत्वापत्तिवारणाय वि-

१ बोधेनेद्धा प्रकाशिता वृत्तिः । २ वृत्तौ प्रतिबिम्बितं चैतन्यम् ।

भाजकोपाध्यवच्छिन्नेति, चाक्षुषादावपि व्यापारवत्तासंबन्धेन मनसः कारणत्वात्तत्रातिव्याप्तिवारणायासाधारणेति४ करणवाह्यभावबोध इति सां०५असंदिग्धाविपरीतानधिगतविषयकबोधरूपप्रमाकरणम्। संशयविपर्ययस्मृतिकरणेष्वतिप्रसङ्गवारणायोपात्तं बोधरूपप्रमांशे क्रमशो विशेषणत्रयमिति योगिनः६अगृहीतग्राहिज्ञानकरणमिति मी०७ अज्ञातार्थज्ञापकम्८दोषासहकृतज्ञानकरणमित्यद्वैतसिद्धौ९ संवादिप्रवृत्तिजननयोग्यज्ञानजनकमिति ब्रह्मविद्याभरणे १० प्रमाणमात्रसमवेतं प्रमेयार्थावभासनमिति शैवपरिभाषायाम्११सम्यगनुभवसाधनम्१२ स्वपरव्यवसायिज्ञानमिति जैनाः१३ साधनाश्रयाव्यतिरिक्तत्वे सति प्रमाव्याप्तत्वम्।

प्रमाणगतविपरीतभावना-श्रुतीनामहेयानुपादेयब्रह्मप्रतिपादकत्वे निष्फलत्वप्रसङ्गाच्छ्रुतयः कर्मपरा एवेति निश्चयात्मि-

प्रमाणगतसंशयः-वेदो ब्रह्मणि प्रमाणं न वा। [का चित्तवृत्तिः

प्रमाणगतासंभावना-प्रमाणगोचरसंभावनाविरहः१ब्रह्मणो घटादिवत्सिद्धत्वेन मानान्तरगम्यत्वाच्छ्रुतिस्तत्प्रतिपादिका कथं भवेत् ? फलाभावान्न भवेदेवेत्याकारिका चित्तवृत्तिः।

प्रमाणचैतन्यं-अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यम्। [स्त्रसिद्धः

प्रमाता-प्रमाश्रयः१प्रमाणैर्योऽर्थं प्रमिणोति सः।प्रमाणिकः-शा-

प्रमातृचैतन्यं-अन्तःकरण(।वच्छिन्नचैतन्यम्१) विशिष्टचैतन्यं

प्रमाणबाधितार्थकः-आत्माश्रयादिचतुष्कान्यप्रसङ्गत्वम् ।

प्रमादः-अविमृष्टकृत्यम्१प्रयत्नेन कर्तव्ये कार्ये विस्मृतिः२कर्तव्येऽकर्तव्यत्वधिया ततो निवृत्तिः३अकर्तव्ये कर्तव्यत्वधिया

प्रमाथी-प्रमथनशीलः।प्रमितः-प्रमाणितः। [तत्र प्रवृत्तिर्वा

प्रमादी-स्वकर्तव्यपालने विमुखः । प्रमुदितः-प्राप्तप्रमोदः ।

प्रमुष्टं-प्रक्षालितम्।प्रमेयः-प्रमा(तुं योग्यः १)णभूतार्थः२अवधार्यं
प्रमेयगतविपरीतभावना-योग्यं योग्येन संबद्ध्यते इति न्या-
यात्त्रिगुणात्मकप्रपञ्चोपादानं त्रिगुणात्मिका मायैव न ब्रह्मेति
प्रमेयगतसंशयः-ब्रह्माद्वयं सद्वयं वा। [निश्चयात्मिका चित्तवृत्तिः
प्रमेयगतासंभावना-प्रमेयगोचरसंभावनाविरहः १ ब्रह्मणस्स-
च्चिदानन्दरूपिणोऽनृतजडदुःखात्मकप्रपञ्चविलक्षणत्वेन
तत्कारणत्वं कथं भवेत्? न भवेदेवेत्याकारिका चित्तवृत्तिः
प्रमेयचैतन्यं- } विषयप्रकाशकं विषयाधिष्ठानभूतं चैतन्यम् १
विषयचैतन्यं } अज्ञातं घटाद्यवच्छिन्नं चैतन्यमिति ग्रं० ।
प्रमोदः-इष्टार्थप्राप्त्युपभोगजन्यो मानसहर्षः।प्रयतः-यतव्रतः
प्रयत्नः-प्रयासः१करोमीत्यनुभवविषयवृत्तिगुणत्वव्याप्यजाति-
प्रयागदेशः-गङ्गायमुनासङ्गमसमीपवर्त्यन्तर्वेदीदेशः। [मान्
प्रयोगः-अभिलापः १ शस्त्रादिमोचनम् *२शब्दादीनामुच्चा-
रणम् ३भूतप्रेताद्युच्चाटनसाधनमन्त्रोच्चारणाद्यनुष्ठानम् ।
प्रयोगविधिः-साङ्गे कर्मण्यनुष्ठापको विधिः १ प्रयोगप्राशुभा-
वबोधको विधिरिति ग्रं०२ अङ्गानां क्रमबोधको विधिः ।
प्रयोजकः-प्रेरकः१अनुष्ठापकः२साक्षात्परम्परया वा कारणम् ३
प्रेरणानुकूलव्यापाराश्रयः४ कार्यादौ भृत्यादीन्प्रयुनक्ति ।
प्रयोजनं-यमर्थमधिकृत्य पुरुषः प्रवर्तते १ प्रवृत्तिहेत्विच्छावि-
षयः।ज्ञानसुखत्वादिवारणार्थं प्रवृत्तिहेत्विति२बुद्धिविषय-
त्वे सति स्वसंबन्धितयेच्छाविषयः। [रम्परया वा जन्यः
प्रयोज्यः-प्रयोक्तुं शक्यः१प्रयोगजन्यप्रवृत्तिमान्वा२साक्षात्प-
प्ररोचना-संहतार्थप्रदर्शिनी१प्रस्तुतार्थप्रशंसनेन श्रोतॄणां प्रवृ-
प्ररोचनावृत्तिः-प्रसिद्धार्थप्रदर्शिनी । [त्त्युन्मुखीकरणं
प्रलयः-त्रैलोक्यनाशः१सकलभावकार्यविनाश इति ग्रं०२भूता-

दिलयाधारकालः । प्रलापः-व्यर्थालापः १ अनर्थकवाक्यम् ।
प्रलोभः-प्रयोजनार्थमर्थादिभिः प्रलोभनम् । प्रलीना-उडुगणा
प्रवचनं-वेदार्थज्ञानम् १प्रकृष्टवाक्यम् २अर्थानुसंधानपूर्वककथनं
प्रवर्तकं-संचालकम् १इष्टसाधनताविषयकं कृतिसाध्यताज्ञानं २
स्वविशेषणवत्ताप्रतिसंधानजन्यं कार्यताज्ञानमिति गुरवः ३
अन्याप्रेरितत्वे सति तादृशलिङुच्चारयितृत्वं प्रवर्तकत्वम् ।
प्रवर्तनं-प्रेरणा १पद्धतिः२कार्यारम्भः३संशयव्युदासे प्रवृत्तिः ।
प्रवर्तना-प्रवृत्त्यनुकूलो व्यापारः । [स्परकोपकथनं
प्रवादः-प्रकृष्टो वादः १ जनश्रुतिः २ परम्परागतवाक्यम् ३पर-
प्रवादकः-वाद्यकारी।प्रवारणं-इच्छापालनम् १ईप्सितप्रदानम्
प्रवाहः-घटनाचक्रम् । प्रवृत्तः-उद्यतः । प्रवासी-विदेशस्थः ।
प्रवृत्तिः-अविच्छिन्नोन्नतिः १शब्दानामर्थबोधनशक्तिः*२स्व-
स्वविषये इन्द्रियादीनां संचारः ३ रागजन्यो रागविषयको
प्रवृत्तिविज्ञानं-अयं घटोऽयं पट इत्याकारकप्रवाहः । [गुणः
प्रवेशकः-अन्तर्गमनिकः १परिजनकथानुबद्धः । प्रशमनं-सकल-
प्रव्रज्यावसितः-संन्यासच्युतः। प्रशस्तः-संस्तुतः । [ज्ञानभ्रंशः
प्रशंसा-श्लाघा १प्ररोचना २ गुणाविष्क(रणम् ३)रेण स्तुतिः।
प्रशस्तिः-शुभशंसनम् * १ देवद्विजादिकल्याणावधारणम् ।
प्रशान्तः-निर्जितचित्तः। [भिचारी स्यादित्यादितर्कः
प्रशिथिलमूलतर्कः-धूमो यदि वह्निजन्यः स्यात्तर्हि वह्निव्य-
प्रश्नः-जिज्ञासाविष्करणम् १ ज्ञानोद्देश्यकप्रवृत्त्यधीनशब्दः २
अविज्ञातार्थज्ञानार्थमिच्छाप्रयोज्यवाक्यम् ३ प्रतिवचनान-
प्रश्लेषः-द्व्यर्थवचनम् । [न्तरमाक्षेपोत्थानं
प्रश्वासः-कोष्ठ्यवायोर्बहिर्निःसारणम्। प्रष्टव्यः-प्रष्टुं योग्यः।
प्रसङ्ख्यानं-गणना १सत्यज्ञानम्*२शब्दयुक्तिप्रत्ययानामावृत्तिः

प्रसङ्गः-प्रकृष्टसङ्गः १गुरूपदेशकीर्तनम् * २ अप्रस्तुतार्थख्यापनम् ३लक्ष्ये लक्षणसंबन्धः ४स्मृतस्योपेक्षानर्हत्वम् ५अन्योद्देशेन प्रवृत्तौ तदन्यस्यापि सिद्धिः ६अन्यार्थकृतेनाङ्गेनान्यस्योपकारक इति मी० ७प्रक्रान्तप्रकृतपदार्थज्ञानपूर्वकापरपदार्थ-
प्रसङ्गसमा-हेतुपरम्पराप्रश्नः। [ज्ञानोपकारकत्वं
प्रसङ्गसङ्गतिः-उपस्थितविषयनिष्ठोपेक्षानर्हतावच्छेदकधर्म-
प्रसन्नचित्तः-प्रहृष्टमनस्कः। प्रसर्पणं-संचारभूमिः। [वत्त्वं
प्रसवः-गर्भमोचनम्। [तार्थदोषाभाववत्त्वे सति प्रकटार्थवत्त्वं
प्रसादः-भुक्तावशिष्टः १पर्युपासनम् २शुश्रूषाद्युपपन्नार्थः ३विहि-
प्रसारणं-शरीरसन्निकृष्टदेशसंयोगानुकूलो व्यापारः। [स्त्री
प्रसिद्धः-सुपरिचितः १अनेकज्ञानविषयः। प्रसूतिका-जातसंताना
प्रसिद्धिः-विख्यातिः १ सफलता * २ वाक्यैः सातिशयैर्युक्ता
प्रधानार्थप्रसाधकैः।लोकप्रसिद्धैर्बहुभिः प्रसिद्धिरिति कीर्तिता॥
प्रसुप्तः-प्रगाढनिद्रः। प्रसूतः-सञ्जातः। प्रस्कन्नः-जातिच्युतः।
प्रस्तावना-कथासङ्गतिः १ग्रन्थावतारणार्थव्याख्यानांशः २अ-
मुख्यार्थप्रतिपादकत्वे सति मुख्यार्थ(ोपोद्घातः ३)प्रवर्तिका।
प्रस्तुतः-प्रकरणप्राप्तः। प्रस्थानं-गमनम् १अभीष्टवस्तुचालनं
प्रस्थः-स्थिरः १ सार्धत्रयोदशपलम् २ पुरुषाहारपरिमितधान्यं
प्रस्रवणं-मूत्रोत्सर्गः १निर्झरमूलस्थानम् २द्रवहेतुकक्रियाविशेषः
प्रस्तरः-पाषाणः। प्रहरः-नाडिकषट्कम्। प्रहरकः-प्रहरी।
प्रहर्षः-मूढस्योद्बोधलब्धो हर्षः। प्रहस्तः-चपेटः १प्रसृतकरतलम्।
प्रहासः-अट्टहासः १श्लेषवाक्यम् २व्यङ्ग्योक्तिः।प्रहासी-विदूषकः
प्रहीणः-निर्वृत्तिकः। प्रहृष्टः-संजातरोमाञ्चादिगात्रविकारः।
प्रहेलिका-दुर्विज्ञानार्थप्रश्नः १ अपह्नुतवागर्थपरिज्ञानम् २
व्यक्तीकृत्यकमप्यर्थं स्वरूपार्थस्य गोपनात्, यत्र बाह्यान्तरावर्थौ

कथ्यन्ते ताः प्रहेलिकाः । प्रह्वाञ्जलिः-कृतनम्रत्वचिह्ना-
प्रह्वः-कृतप्रणामः। प्राकषिकः-परदारोपजीवी । [ञ्जलिः
प्राकाम्यं-सत्यसङ्कल्पत्वम् १येनैश्वर्येणाङ्गुल्यग्रादिना चन्द्रा-
प्राकारः-प्राचीरम् १दुर्गभित्तिः । [दीन्स्प्रष्टुं शक्नोति तत्
प्राकृतः-पामरः १स्वाभाविकः २पादविभूतिविलासविजृम्भितः
प्राकृतप्रलयः-कार्यब्रह्मविनाशनिमित्तकः सकलकार्यविनाशः।
प्रागभावः-प्रतियोगिसत्तापूर्वकालिकोऽभावः १अजन्यत्वे सति
विनाश्यभावः। घटादिवारणाय सत्यन्तम्,परमाणुवारणाय
विनाशीति २कार्यसमवायिकालान्यावृत्तित्वे सति कार्योत्प-
त्तिपूर्वकालीनाभावः। ध्वंसेऽतिव्याप्तिवारणाय कार्योत्पत्ति-
पूर्वकालीनेति ३ उत्पत्तेः प्राक्कारणे कार्याभावः, यथा मृदादौ
प्रागल्भ्यं-प्रयोगेष्वमूढता।प्राग्भारः-परमभागः। [घटाद्यभावः
प्राग्लोपः-उत्तरोत्तरेणैव पूर्वपूर्वकार्यसंभवे पूर्वेषामन्यथासिद्धिः
प्राग्वाहः-पूर्वाभिमुखप्रवाहः । प्राग्वंशः-यज्ञशालैकदेशः ।
प्राजापत्यविवाहः-सहोभौधर्मं चरतामितिबुद्ध्या कन्यादानम्।
प्राजापत्यव्रतं-त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम्,त्र्यहं
परं च नाश्नीयात्प्राजापत्योयमुच्यते। [प्राग्वदति ततः स्मृतः
प्राड्विवाकः-विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च,प्रियपूर्वं
प्राज्ञः-कुशाग्रबुद्धिः १ विचारकुशलः २ सहजबुद्धिसंपन्नः ।
प्राज्ञजीवः-सुषुप्त्यभिमानी जीवः १सुषुप्तौ विलीनेन्तःकरणेऽ-
ज्ञानमात्रसाक्षी २ व्यष्टिकारणशरीरमात्रोपहितं चैतन्यम् ।
प्राणः-मुखनासयोः श्वासः १शरीरान्तःसंचारी वायुः।महावाय्वा-
दावतिव्याप्तिवारणाय विशेषणदलम्,मनोरुधिरादिवारणाय
विशेष्यम्, धनञ्जयवारणाय संचारीति-२ मिलितसमस्ताप-
ञ्चीकृतपञ्चमहाभूतराजसांशकार्यत्वे सति क्रियाशक्तिप्रधानः

प्राणमयकोशः-कर्मेन्द्रियैः सहितः प्राणः।प्राणांतिकः-यावज्जीवनः
प्राणायामः-प्राणवृत्तिनिरोधः१निःश्वासोच्छ्वासयोर्गतिविच्छेद-
कारकव्यापारः२रेचकपूरककुम्भकलक्षणः प्राणनिग्रहोपायः
प्रातिपदिकः-प्रातिपदिकनिष्ठशक्तिविशिष्टविषयताश्रयः१धा
तुप्रत्ययप्रत्ययान्तभिन्नत्वे सत्यर्थवच्छब्दः२विभक्त्यर्थशून्यत्वे-
प्रातः-प्रभातम्१मुहूर्तत्रयकालः। [सति व्यवितमात्रार्थवत्त्वं
प्रातिभासिकः-ब्रह्मज्ञानं विना बाध्यमानः, यथा रज्जुसर्पः
शुक्तौरूप्यम् १ अध्यासकाले भासमानत्वे सत्यध्यासभिन्न-
कालेऽभासमानः २ आगन्तुकदोषसहकृताविद्याकार्यत्वम् ।
प्रादुर्भावः-प्रथमप्रकाशः१पूर्वरूपरसादिनाशपूर्वकं रूपरसाद्यंत-
प्रादेशः-द्वादशाङ्गुलः१तर्जन्यङ्गुष्टयोर्विस्तारः। [रोत्पत्तिः
प्राप्तकालः-तत्क्रियोचितकाललाभः। प्राप्तबुद्धिः-शिक्षितः।
प्राप्तिः-मुखार्थस्योपगमनम्।प्राप्यत्वं-संयोगादिफलशालित्वं
प्राप्त्याशा-पताकाव्यापिनी कथा। प्राबल्यं-स्वकार्यकारित्वं
प्रामाण्यं-तद्वति तत्प्रकारकत्वम् १ अबाधिताज्ञातार्थज्ञापकत्वं
प्रायश्चित्तं-पापक्षयमात्रसाधनं कर्म,यथा कृच्छ्रचान्द्रायणादि।
मात्रशब्दात्तुलापुरुषाश्वमेधादिव्यावृत्तिः १ कार्यविध्वंसज-
नकीभूतदुर्निमित्तदर्शनजनितपापशोधकम् २ प्रायो नाम तपः
प्रोक्तं चित्तं निश्चय उच्यते, तपो निश्चयसंयुक्तं प्रायश्चित्तंतदुच्यते
प्रारब्धकर्म-आरब्धविपाकः कर्माशयः१वर्तमानशरीरारम्भकं
कर्म २प्रारब्धकार्यं सुखदुःखादिरूपं युगकल्पादिपर्यन्तमनुभो
प्रारब्धः-कृतारम्भः। प्रारम्भः-आरम्भः। [क्तव्यं येन तत्-
प्रार्थना-नम्रता(जन)सूचकवाक्यम् २ अभ्यर्थनायुक्तं वचनमि-
ति ग्रं० ३ देहीति दैन्यभाषणम् *४ उत्कर्षप्रतिपादनेच्छा।
प्रार्थितः-इच्छितः। प्रासः-कुन्तास्त्रम्१हस्तक्षेप्यः क्षुद्रभल्लः।

प्रियः-सुखदायी १प्रेमास्पदम् *२ नेत्रप्रीतिकरः ३प्रीतिविषयी-
प्रियवृत्तिः-इष्टार्थदर्शनजन्या सुखाकारा वृत्तिः। [भूतः
प्रियोक्तिः-मैत्रीसूचकवक्तृता १ यत्प्रसन्नेन मनसापूज्यं पूजयितुं
वचः, हर्षप्रकाशनायोग्यं प्रियोक्तिः साभिधीयते। [त्तिः
प्रीतिः-इष्टे वस्तुनि मनसोभिनिवेशः १दयारसाद्रन्तिःकरणवृ-
प्रेक्षकः-दर्शनाभिलाषी। प्रेङ्खा-परिभ्रमणः। प्रेतः-निर्ह्रियमाणः
प्रेम-प्रीतिप्रदर्शनम् १ सर्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे,
प्रेमी-स्नेही। [यद्भावबन्धनं यूनोः स प्रेमा प्रकीर्तितः
प्रेमबन्धः-गाढानुरागः। [पधियास्ति तत्प्रेमवैचित्यमुच्यते
प्रेमवैचित्यं-प्रियस्य सन्निकर्षेपि प्रेमोत्कर्षस्वभावतः, या विश्ले-
प्रेयः-अतिशयप्रियम् *१ देवगुरुमित्रादिविषयः प्रीतिप्रकर्षः।
प्रेरकः-तदनुकूलप्रयत्नाधारः १ प्रवृत्त्यनुकूलव्यापारसाधकः।
प्रेरणं-प्रयोजकव्यापारः १स्वाभिलषितोपायाज्ञानादप्रवृत्तापकृ-
ष्टप्रयोज्यस्योपायविषयकप्रवृत्त्यनुकूलोव्यापार इति सारदर्पणे
प्रेषणं-संयोगनुकूलक्रियानुकूलव्यापारः। प्रेष्यः-परिचारकः।
प्रैषः-मर्दनम् १प्रमाणान्तरप्रमितेऽर्थे पुरुषनिष्ठा पुरुषप्रवर्तना।
प्रोतं-गुम्फितम्। प्रोत्साहनं-हर्षानुकूलव्यापारः १ कुतश्चित्का-
प्रौढिः-पूर्णवयस्कता। [रणान्निवर्तमानस्य प्रवर्तनं
प्रौढा-प्रवृद्धा १भरपूरा २पञ्चपञ्चाशद्वयस्का। [कथनं
प्रौढिवादः-स्ववुद्ध्युत्कर्ष(ख्यापनम् १)प्रदर्शनार्थमनभिमतार्थ-
प्रौढोक्तिः-साहसपूर्णकथनम् १उत्कर्षस्याहेतावुत्कर्षहेतुत्वकल्पनं
प्लवः-नदीतरणसाधनम्। प्लवकः-खड्गाग्रनर्तकः। प्लुष्टदलं-ग्री-
प्लीहा-हृदयवामभागस्थोगुल्माख्यो मांसविशेषः [ष्मदग्धपत्रं
फक्किका-तत्त्वनिर्णयार्थं पूर्वपक्षः ☞ फ
फलं-परिणामः १व्यापारजन्यम् २ससाधनसुखदुःखोपभोगः ३स्व-

कर्तव्यताप्रयोजकेच्छाविषयः४प्रकरणप्रतिपाद्यस्य श्रूयमाणं तज्ज्ञानात्तत्प्राप्तिप्रयोजनम्,यथा संपत्स्य इत्यद्वितीयज्ञानात्त-
फलदः-फलप्रदाता। फलनं-फलोत्पत्तिः। [त्संपत्तिरूपं फलं
फलचैतन्यं-विषयेऽभिव्यक्तं चैतन्यम् १ ज्ञातं घटाद्यवच्छिन्नं चैतन्यम् २अन्तःकरणवृत्त्यभिव्यक्तं चैतन्यम्। [वाक्यं
फलवाक्यं-उत्पन्नस्य कर्मणः फलाकाङ्क्षायां फलसंबन्धबोधकं
फलव्याप्तिः- } स्वाकारवृत्तिप्रतिबिम्बितचैतन्यविषयत्वम् १
फलव्याप्यत्वं } वृत्तिबिम्बितचिदभिव्यक्तचैतन्याश्रयत्वम्।
फलस्वाम्यं-कर्मजन्यफलभोक्तृत्वम्। फलित्वं-फलवत्त्वम्।
फलोपकार्यङ्गं-यागाङ्गद्रव्याद्यनुद्दिश्य केवलं विधीयमानं कर्म १ स्वव्यापारातिरिक्तव्यवधानराहित्येन प्रधानोपकारकम्, यथा प्रयाजादि अदृष्टरूपेण स्वव्यापारमात्रेण प्रधानयागस्य।
फलोपधायकत्वं-फलनिष्पादकत्वम् १ कार्याव्यवहितपूर्ववृत्तित्वसंबन्धेन फलविशिष्टत्वम्, यथा कुलालहस्तस्थदण्डे।
फालः-द्वैधीकरणसाधनम्। फुल्लं-पुलकितम् १ विकसितम्।
फेलं-भुक्त(ावशिष्टम् १)समुज्झितम्☞ ब
बकवृत्तिः-अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः,शठः शिल्पी
बडिशं-मत्स्यवेधनम्। [विनीतश्च बकवृत्तिरुदाहृतः
बदरीखण्डः-अमृतदरीखण्डः। बधः-प्राणवियोगफलकव्यापारः।
बधिरः-श्रुतिशक्तिशून्यः। बधूटी-अल्पवयस्का नारी॥५२१०॥
बन्धः-आत्मनोऽज्ञानतत्कार्यसंबन्धः १सत्यत्वेन ज्ञायमानो दृश्यसंबन्धः२ अणिमाद्यष्टैश्वर्याशासिद्धसङ्कल्पः ३ देवमनुष्याद्युपासनाकामसङ्कल्पो वा ४ यमाद्यष्टाङ्गयोगसङ्कल्पो वा ५ वर्णाश्रमधर्मकर्मसङ्कल्पो वा ६ यागव्रततपोदानविधिविधा-

१ घटादिविषयचैतन्यभिन्नमन्तःकरणवृत्तिप्रतिबिम्बितं चैतन्यम्।

नज्ञानसंभवः *७ केवलमोक्षापेक्षासङ्कल्पः ८ सङ्कल्पमात्र-
बन्दी-प्रतिज्ञेयः १ स्तुतिपाठकः । [संभवो वा
बद्धः-स्थिरीकृतः । [गत्यादिरोधहेतुसंयोगानुकूलव्यापारः
बन्धनं-स्थिरीकरणम् १वशीकरणसाधनम् २रज्ज्वादिकरणक-
बन्धुः-संबन्धेनोपकारकः १विच्छेदासह्यकः।बन्धकः-बन्धकारी
बलं-साधनसामग्री १ स्वेच्छाकरणशक्तिः २ विचित्रकार्यानुकू-
बलपतिः-सेनापतिः । [लशक्तिः३शरीरेन्द्रियदार्ढ्यं
बलवत्त्वं-कार्यसिद्धिप्राक्कालिकप्राप्तिकर्तृत्वम्। बला-बलवती
बलव्यसनं-सेवाविलयः । बलाग्रः-सेननायकः१समरसचिवः ।
बलाध्यक्षः-बलस्य चतुरङ्गस्याहारादिदानेन पालकः। [कारः
बलिः-पंचयज्ञपरायणैर्दत्तमुपहारात्मकमन्नादिकम्।बली-स्वग्वि-
बलीशः-काकइववञ्चकदृष्टिः। बलात्कारः-बलपूर्वककरणम्।
बहिरङ्गं-बह्वपेक्षम् १परनिमित्तकम् २बहिःप्रकृतेर्बाह्यमङ्गं यस्य
बहिर्मुखं-बहिः बाह्यविषये मुखं प्रवणता । बहुलः-प्रचुरः ।
बहुमानः-मदीयोयं भर्तेत्येवमभिमानः। बहुरूपं-नानारूपवत् ।
बहुव्रीहिसमासः-बहुव्रीहिप्रकरणपठितः समासः१अन्यपदार्थ-
प्रधानः समासः२संबन्धिलाक्षणिकत्वव्याप्योत्तरपदकसमासः
बहुश्रुतः-सकलसच्छास्त्रश्रवणसंपन्नः।बहुसूतिः-अनेकसंतानवती
बहूदकः-बहूनि उदकानि शौचाङ्गतया यस्य। [देशाटनपरः
बहूदकसंन्यासी-त्रिदण्डशिखाद्युपलक्षितः सप्तागारभिक्षाशीलो
बाधः-प्रतिरोधः१अर्थासङ्गतिः*२सविलासाविद्यानिवृत्तिः३
अपरोक्षमिथ्यात्वनिश्चयः४प्रतीतार्थं परित्यज्यान्यार्थकल्पन-
मित्यद्वैतदीपिकायाम्५यत्र यत्प्रतीयते तत्र तस्य त्रिषु कालेष्व-
त्यन्ताभावनिश्चयः६पूर्वप्रत्ययस्य व्यधिकरणप्रकारकत्वनि-
श्चयः७साध्याभाववत्पक्षः८ पक्षनिष्ठप्रमाविषयत्वप्रकाराभा-

वप्रतियोगिसाध्यकः।बाधकः-कार्यानुत्पादफलकव्यापाराश्रयः
बाधसामानाधिकरण्यं-अन्यतरस्य बाधेन सामानाधिकरण्यम्,
यथाऽऽभासवादिमतेऽन्तःकरणप्रतिबिम्बितस्य जीवस्य बा-
धेन ब्रह्मणा सामानाधिकरण्यम् (अभेदः) ,यथा वा जगतो
बाधेन सर्वं खल्विदं ब्रह्मेत्यादिश्रुत्युक्तं जगतो ब्रह्मणा सामा०
बालः-अज्ञानी १नन्दमतिः२अल्पवयस्कः३अव्युत्पन्नपुरुषः४शा-
स्त्रार्थज्ञानविवेकशून्यः५अधीतकाव्यकोशव्याकरणानधीतवे-
दान्तशास्त्रः। कणादादावतिव्याप्तिवारणायानधीतवेदान्ते-
ति,स्तनन्धयेऽतिप्रसक्तिवारणायाधीतकाव्येति। [नस्था
बालग्रही-बालकमारिका। बाला-षोडशवार्षिका १ नूतनयौव-
बाली-कर्णभूषणविशेषः। बाल्यं-दशहायनः १ दशवर्षान्तम्।
बाहुः-बाधते इति १कक्षावध्यङ्गुलिपर्यन्तः। बाह्यः-बहिर्भवः।
बाह्यदृश्यानुविद्धसमाधिः-बाह्यदृश्यमिश्रः(बाह्यानां सूर्यादीनां
द्रष्टा तेष्वनुस्यूतोऽहमिति)समाधिः। [शब्दव्यामिश्रः समाधिः
बाह्यशब्दानुविद्धसमाधिः-बाह्यसूर्यादिभ्योऽसङ्गोहमित्यादि-
बाह्यनिर्विकल्पसमाधिः-बाह्यदृश्यविषयकविकल्पविधुरः ।
बाह्यप्रत्यक्षप्रमा-स्मृतिभिन्नत्वे सत्यबाधितबाह्यार्थगोचरज्ञानं
बिन्दुः-रेतोंशः १ अल्पांशः२अनुस्वारः३प्रयोजनानां विच्छेदे
यदविच्छेदकारणम्,यावत्समाप्ति कार्यस्य स बिंदुरिति कथ्यते
बिभ्रत्कोपः-निमित्तं विनापि सदा कोपपरः। बिलं-भेदनम्।
बिम्बं-मण्डलम् १ दर्पणादौ भासमानप्रतिबिम्बहेतुः२उपाधि-
निमित्तस्वप्रतियोगिकव्याप्यवृत्तिभेदाश्रयत्वे सत्यौपाधिक-
परिच्छेदरहितत्वं बिम्बत्वम् ३उपाध्यनन्तर्गतत्वे सत्युपाध्य-
न्तर्गतरूपाभिन्नबहिःस्थितत्वम् । [दार्थस्फुरणहेतुः
बीजं-कारणम् १इष्टार्थसाधनम् २सामान्यमूलम् ३अभिनवप-

बीभत्सा-गर्हिता १भेत्तुमिच्छा २घृणोत्पादिका।बुक्कं-हृदयस्थ-
बुद्धः-प्रबुद्धतत्त्वः पुरुषः।बुभुत्सा-बोद्धुमिच्छा। [मांसपिण्डं
बुद्धिः-मनीषा १धीशक्तिः २निश्चयात्मिकान्तःकरणवृत्तिः*३-
बुभूषुः-स्वक्षेममिच्छुः। [जानामीत्यनुव्यवसायविषयगुणः
बुवणं-ज्ञानोद्देश्यकप्रवृत्त्यधीनशब्दः । बृसी-स्वल्पासनम् ।
बृहणत्वं-शरीरवृद्ध्यादिहेतुत्वम् । बोधकः-सूचकः १शिक्षकः २
बोधनं-ज्ञापनम् १कार्यप्रतिवचनेन प्रतिबोधनम् । [गमकः
बौद्धः-बुद्धागमज्ञः १बुद्धमतावलम्बी २बुद्धितत्त्वे व्यवस्थितः ।
ब्रह्म-निरवच्छिन्नचैतन्यम् १निखिलनामरूपात्मकप्रपञ्चाका-
रेण परिणममानमायाधिष्ठानमिति ग्रं० २बृहत्त्वं बृंहणत्वं वा
ब्रह्मकाण्डं-ज्ञानकांडं।ब्रह्मकुटी-ब्रह्माण्डं।ब्रह्मघ्नः-विप्रत्वनाशक.
ब्रह्मचर्यं-उपस्थसंयमः १ अष्टाङ्गमैथुनवर्जनम् २ कायेन मनसा
वाचा सर्वावस्थासु सर्वदा, सर्वत्र मैथुनत्यागं ब्रह्मचर्यं प्रचक्षते
ब्रह्मचर्यमहिमा-ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभो भवत्यपि,सुरत्वं
मानवो याति चान्ते याति पराङ्गतिम् १चिरायुषः सुसंस्थाना
दृढसंहनना नराः, तेजस्विनो महावीर्या भवेयुर्ब्रह्मचर्यतः ।
ब्रह्मघोषः-वेदध्वनिः।ब्रह्मचारी-वीर्यसंरक्षकः १स्त्रीसङ्गरहितः
२ स्वाध्यायनिष्ठः ३ ब्रह्मज्ञानप्राप्त्यर्थं गृहीतब्रह्मचर्यव्रतः।

---

१ स्त्रिया दर्शनं(= रागपूर्वकं स्त्र्यादिविषयकज्ञानम् १)स्पर्शनं(= रा-
गपूर्वकं क्रियाविशेषजन्यज्ञानम् २)केलिः(रागपूर्वकः परिहासादिव्य-
वहारः३) कीर्तनं (= स्त्र्यादेरनुरागपूर्वकं सौन्दर्यादिवर्णनम्४) गुह्य-
भाषणं(= रागपूर्वकं रहसि संभाषणम्५)सङ्कल्पः(= इयं मे स्यादिति६)
अध्यवसायः (अनयासहसभोगं करिष्यामीति निश्चयः) क्रियानिवृत्तिः
(= सुरतसिद्धिरनुभवविशेषो वा ८) चेत्यष्टौ मैथुनस्याङ्गानि ।

ब्रह्मज्ञानं-त्रिगुणावच्छिन्नातीततुरीयशुद्धचैतन्यविषयकज्ञानम्
ब्रह्मणस्तटस्थलक्षणं-सृष्टिस्थितिलयकारणत्वम् १ भूतोपादान-
त्वे सति कर्तृत्वम्। कुलालादावतिव्याप्तिपरिहाराय भूतेति,
मायायामतिव्याप्तिनिवृत्तये कर्त्रिति २ निखिलजग (दुपादा-
नगोचरापरोक्षज्ञानचिकीर्षाकृत्याश्रयत्वम् ३) दभिन्ननिमि-
त्तोपादानत्वम्। शुक्त्यवच्छिन्नचैतन्येऽतिव्याप्तिवारणाय
ब्रह्मदण्डः-ब्रह्मशापः। [निखिलेति, असंभववारणाय जगदिति
ब्रह्मदिवसः-चतुर्युगसहस्रपरिमितः कालः। ब्रह्मपुरं-ब्रह्मैव पुरं
ब्रह्मनिष्ठः-वेदार्थतत्त्वज्ञः* १ वेदान्तवेद्यब्रह्मात्मनावस्थितः २
करामलकवदखण्डैकरसानन्दब्रह्मसाक्षात्कारवान्वा॥५३९९।
ब्रह्ममीमांसा-उत्तरकाण्डविषयकसंशयनिवारको विचारः।
ब्रह्मयज्ञः-वेदपाठः १ नित्यमुपनिषदर्थचिन्तनम्। ब्रह्मरन्ध्रं-ता-
ब्रह्मलोकः-उपरितनलोकावधिभूतो लोकः। [लुदेशः
ब्रह्मवंशः-ब्रह्मासिमार्गः। [स्वस्वरूपनिर्णायकत्वं
ब्रह्मविद्यात्वं-ब्रह्मज्ञानत्वम् १ जगन्मिथ्यात्वबोधकत्वे सति
ब्रह्मश्रोत्रियः-वेदवेदाङ्गपारगः। ब्रह्मवादः-ब्रह्मनिर्णयः५४०९
ब्रह्मसत्रं-ब्रह्मनिर्णयरूपो यज्ञः। [गुणावच्छिन्नचैतन्यं
ब्रह्मा-सृष्टिकर्ता १ चतुर्वेदवेत्तृत्विक् २ सत्त्वोपसर्जनभूतरजो-
ब्रह्मांडं-भूम्यादिसप्तावरणवेष्टितं नारिकेलफलाभं भूगोलकम् १
स्वावरणभूतलोकालोकपर्वततद्बाह्यपृथिवीतद्बाह्यसमुद्रैःसहिता
ब्रह्मानन्दः-द्वैतभानाभावविशिष्टनिद्राऽभावकालीनब्रह्माभिमु-
खवृत्त्यभिव्यङ्ग्य आनन्दः। [देशं ब्रह्मावर्तं प्रचक्षते
ब्रह्मावर्तं-सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्, तं देवनिर्मितं
ब्रह्माश्रमः-संन्यासाश्रमः। ब्रह्मासनं-ब्राह्मणमध्ये ब्राह्मणयो-
ब्रह्मास्त्रं-ब्रह्मशिरोऽस्त्रम्। ब्रह्मिष्ठः-ब्रह्मविदग्रेसरः। [ग्यासनं

ब्राह्मणः-ब्रह्मिष्ठः १कृतपरब्रह्मसाक्षात्कारः २ब्राह्मण्यां ब्राह्मणादुत्पन्नः ३नैसर्गिकशमादिनवसाधनसंपन्नः ४तपःश्रुतं च योनिश्च ह्येतद्ब्राह्मणकारणम्, तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः ५ब्राह्मणेतरावृत्तित्वे सति सकलब्राह्मणव्यक्तिवृत्तित्वं
ब्राह्मणभागः-मन्त्रेतरवेदांशः १कर्मविधायकवाक्यम् २मन्त्रतात्पर्यार्थप्रकाशको वेदभाग इत्यृग्वेदभाष्ये ३वेदत्वे सति मन्त्रभिन्नत्वं ब्राह्मणभागत्वम् । कल्पसूत्रादिवारणाय सत्यन्तम्
ब्राह्मणविद्वत्संन्यासः-अपरोक्षात्मविद्विहितत्वे सति ससाधन-
ब्राह्मण्यं-विप्रसमूहः। [वैधाखिलकर्मत्यागपूर्वकसलिङ्गकत्वं
ब्राह्मविवाहः-यथाशक्तिधनालङ्कारसहितकन्यादानम्।।५३४६
ब्रुवणं-ज्ञानोद्देश्यकप्रवृत्त्यधीनशब्दः। ☞ भ
भक्तः-भक्तिमान् १ दैनन्दिनदेयान्नम् २स्वामिहितचिन्तकः ।
भक्तिः-प्रेमार्द्रबुद्धिः १मानप्रदर्शनम् २ आराध्य(त्वेन ज्ञानम् ३) विषयकरागित्वम् ४परलोकमतित्वेनोपास्यत्वबुद्धिः ५जडानृताहङ्कारादिरहिता ज्ञानसत्यानन्दाद्याकारा प्रत्यक्चेतोवृत्तिः
भक्षणं-निगरणम् १गलविलाधस्संयोगानुकूलव्यापारः।।५२५२
भक्ष्यं-भक्षितुं योग्यम् १दन्तैश्छित्वा ग्राह्यमपूपादि। [नुष्ठानं
भगवदर्पणं-फलसङ्गत्यागकर्तृत्वत्यागपूर्वकं भगवत्कैङ्कर्यतया-
भगवान्-दुर्ज्ञेयषडैश्वर्यसंपन्नः १ ऐश्वर्यादिगुणसामग्रीमान् ।
भग्नं-पराजितम् १ विदीर्णम् । भग्नव्रतः-परिभ्रष्टनियमः ।
भजनं-भगवदाराधनम् १वृत्त्यन्तरनिरोधपूर्वकब्रह्माकारमनो-
भङ्गुरः-वक्रप्रदेशः। भटः-योद्धा १अन्तःपुरचरः । [वृत्तिः
भट्टः-युद्धकुशलः १ चतुःशस्त्रज्ञः २ वेदाभिज्ञः ३ स्तुतिपाठः।
भट्टिनी-अकृताभिषेका राजवनिता।भण्डः-अश्लीलवाक्यभाषकः
भद्रः-मङ्गलकारी। भद्रपीठं-मङ्गलचिह्नचिह्नितपीठविशेषः।

भयं-भीतिः१परित्रासः*२परतोनिष्टसंभावना३ आगामिदुः-
खानुसंधानजन्यो मनस उद्वेग इति ग्रं० ४विषयविशेषदर्शन-
भयप्रदः-भयकारी। [श्रवणनिबन्धनञ्चेतसोऽनवस्थानं
भयपात्रः-ब्रह्मज्ञानाद्यतीवायाससाध्यं ममेत्यवं संचिन्त्योद्विग्न-
भरणं-पोषणम्। [मनसो ब्रह्मज्ञानादिसाधनेऽप्रवर्तकः
भर्जनं-भ्राष्ट्रतप्तवालुकाभिः परिपाकविशेषः।भर्ता-भरणकर्ता
भर्त्सनं-शापः १ हनिष्यति दहिष्यतीत्यादि वाचा भीजननम्।
भवं-उत्पन्नम् १वर्तमानम्। भविष्यः-प्रत्यासन्नः।भागः-एकदेशः।
भस्त्रा-चर्मकोशः१अग्निप्रज्वालकचर्मरचितो यन्त्रविशेषः। [कः
भाक्तः-परमुखापेक्षी।भागवतः-विष्णुभक्तः।भागिकः-भिन्नात्म-
भागत्यागलक्षणा-शक्यैकदेशपरित्यागेनैकदेशे वृत्तिः,यथा सोऽयं
देवदत्त इति वाक्यस्य तद्देशकालवैशिष्ट्यतद्देशकालवैशिष्ट्य-
रूपविरुद्धांशत्यागेन देवदत्तपिण्डमात्रे वृत्तिस्तद्वत्तत्त्वमसी-
त्यादिवाक्येपि सर्वज्ञत्वाल्पज्ञत्वादिविरुद्धांशपरित्यागेन चि-
न्मात्रयोरभेदः१शक्यतावच्छेदकपरित्यागेन व्यक्तिमात्रवो-
भागवतत्वं-भगवत्प्रतिपादकत्वम्। [धप्रयोजिका लक्षणा
भागी-अंशविशिष्टः।भाग्यं-शुभाशुभसूचकं कर्म। [सामग्री
भाण्डं-अलङ्कारः १ अश्वाभरणम् २ पाकसाधनम् ३ उपकरण-
भाण्डफेला-भूषणपेटी। भाण्डभारः-अश्वाद्युपकरणवाही।
भानुः-भासकः।भामः-क्रोधः१भगिनीपतिः।भामिनी-दीप्तिमती
भारकी-पोषणकर्त्री। [१स्वप्रारब्धविषयककोपवती स्त्री
भारः-विंशतितुलापरिमाणम् १ अष्टसहस्रतोलकपरिमाणं वा
भारतं-भरतवंश्यानधिकृत्य कृतो लक्षश्लोकात्मको ग्रन्थः।
भारतवर्षः-उत्तरेण समुद्रस्य हिमाद्रेश्चैव दक्षिणे,वर्षं तद्भा-
भारती-वागधिष्ठातृदेवी। [रतं नाम भारती यत्र संततिः

भार्याव्रतं-परस्त्रीवर्जनम् । भारयष्टिः-भारवहनदण्डम् ।
भावः-रसप्रापयिता १अन्तर्निगूढेच्छा २भावनादृशापन्ना वृत्तिः
* ३क्रियानिर्वर्त्यो योऽर्थः क्रियैव वा४क्रियायाः फलम्,य-
थौदनं पचति देवदत्तः ५ अपरिस्पन्दनसाधनसाध्यो धात्वर्थ
इति वै० ६ प्रतियोगिनिरूपणानपेक्षनिरूपणकः७समवायै-
कार्थसमवायान्यतरसंबन्धेन सत्तावानिति नै०८अभावत्वा
नाधारः९नञनुल्लिखितधीविषयकः । [विशेषः
भावना-पर्यालोचना १ भवितुर्भवनानुकूलो भावयितुर्व्यापार-
भावनासंस्कारः-जन्यज्ञानजन्यसंस्कारः १अनुभवजन्यः स्मृति-
हेतुः संस्कारः। आत्मादिवारणाय प्रथमदलम्, अनुभवध्वं-
भावार्थः-अस्तित्वम् १वस्तुनिर्देशः । [सवारणाय द्वितीयं
भावविकारः-पूर्वावस्थापरित्यागे सत्यवस्थान्तरापत्तिः ।
भावशुद्धिः-निष्कपटत्वम्। [क्रियाप्रागभावावच्छिन्नः कालः
भाविकालः-वर्तमानप्रागभावप्रतियोगिकः १ सूर्यपरिस्पन्दादि-
भाविप्रतिबन्धः-प्रारब्धकर्मशेषः।भाव्यत्वं-अवश्यम्भावित्वम्।
भाषकः-भाषणकर्ता । [नायिकानायकयोरन्योन्यसंलापः
भाषणं-निर्वहणाङ्गभेदः १यत्किञ्चिज्ज्ञानानुकूलशब्दप्रयोगः २
भाषा-प्रतिज्ञासूचकवाक्यम् १तत्तद्देशस्थजनवर्तननिर्वाहकवा-
भासः-गोष्ठकुक्कुटः। [क्यम् २मनोभावव्यञ्जको वर्णात्मकः शब्दः
भाष्यं-कथनीयम् १सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः,
स्वपदानि च वर्ण्यन्ते भाष्यविदो विदुः। सागरादिवर्णनस्य
भाष्यत्वव्यावृत्तये सूत्रार्थेति, पदवृत्तिव्यावृत्तये वाक्यैरिति,
वार्त्तिकस्य तत्त्वनिरासाय सूत्रानुसारीति, वृत्तेस्तत्त्वव्या-
भास्वरं-सर्वाविभासकभारूपः । [वृत्त्यर्थं स्वपदानीति
भिक्षा-ग्रासमात्रं(न्नम् १)भवेद्भिक्षा पुष्कलन्तु चतुर्गुणम्,पुष्क-

लानि च चत्वारि हन्तकारो विधीयते २अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनाम्,द्वात्रिंशत्तु गृहस्थस्य यथेष्टं ब्रह्मचारिणां
भिक्षुः-भिक्ष(ाकारकः१)णशीलः२भिक्षोपजीवी ३जितेन्द्रियता-युक्तो मुनिविशेषः ४ यतिश्च ब्रह्मचारी च विद्यार्थी गुरुपोषकः, अध्वगः क्षीणवृत्तिश्च षडेते भिक्षवः स्मृताः। [करणः
भिन्नः-इतरः१विदारितः२प्रस्फुटितः३भेदा(नुयोगित्वम्४)धि-
भिन्नक्रमः-स्वस्थानभिन्नस्थानकः । भिन्नदर्शी-पक्षपती ।
भिन्नमर्यादः-असंमानकारी।भिन्नसाधनं-विकीर्णसैन्यैकीकरणम्
भीः-आशङ्का। भीतः-उद्विग्नः। भीमघोषः-भयङ्करध्वनिकारः।
भीयः-संहर्ता१भयोत्पादकः। भीरुः-भयान्वितः१हरिणहृदयः२-
भुक्तः-गलाधःसंयोगानुकूलव्यापारः। [आत्मनाशशङ्काकुलः
भूतकालः-प्रारब्धपरिसमाप्तिक्रियाश्रयः१सूर्यपरिस्पन्दादिक्रि-याध्वंसावच्छिन्नः कालः२वर्तमानप्रतियोगित्वं भूतकालत्वम्
भूतं-नित्यसिद्धम्१तत्त्वानुसंधानम्२ वहिरिन्द्रियग्राह्यविशेष-गुणवत्त्वंभूतत्वम्। आत्मन्यतिव्याप्तिवारणाय वहिःपदम्, कालादावतिव्याप्तिवारणाय विशेषेति, द्रव्यत्ववारणाय गु-
भूतदर्शी-क्रान्तदर्शी१अतीतद्रष्टा।भूतपक्षः-कृष्णपक्षः। [णेति
भूतप्रतिबन्धः-पूर्वानुभूतविषयस्यावशेन पुनः पुनः स्मरणम्।
भूतयज्ञः-भूतेभ्यो वलिहरणम् । भूतरक्षणं-प्राणिपालनम् ।
भूतार्तः-प्रेताविष्टः। भूतिः-स्वोदरभरणम्। भूधरः-शेषनागः।
भूतार्थवादः-तत्काले तद्गुणज्ञापकः शब्दः, यथा 'जरायामप्ययं शूर' इति१प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधकोऽर्थ-वादः, यथेन्द्रो वृत्राय वज्रमुदयच्छदित्यादिः २ मानान्तर-परिप्राप्तार्थाभिधायित्वम्, यथाग्निर्हिमस्य भेषजमिति।
भूमिका-ग्रन्थाभासः १ वक्तव्यविषयकसूचना २ प्रयोजनसंपा-

दिका युक्तिरिति ग्रं० ३वेशान्तरपरिग्रहः४अन्यरूपैर्यदन्यस्य प्रवेश इति नाटकज्ञाः५हर्म्यादेरुत्तरोत्तरभूमिवच्चित्तज्ञानान्य-
भूयः-पुनःपुनःशीलनम्।भूरिः-प्रचुरः। [तरस्यावस्थाविशेषः
भूमिमदः-तमोगुणभरितस्य वस्त्रादीच्छाहेतुर्मदः ॥५४११॥
भूरादिलोकः-प्राणिनां कर्मज्ञानफलभोगस्थानविशेषः [ष्ट्रपक्कं
भूषितः-सञ्जीकृतः।भृतकाध्यापकः-वेतनभोगी शिक्षकः।भृष्टं-भ्रा-
भेदः-पृथक्करणम्१पृथग्भावः२अन्योन्याभावः३अनुयोगिताविशेषधर्मः४प्रोत्साहकरणम्५शत्रुपक्षपाताद्विश्लिष्यात्मीयपक्षे
भेदकः-मैत्रीनाशकः१विदारणानुकूलव्यापाराश्रयः [स्थापनं
भेदकरः-परस्परस्नेहकार्यविच्छेदकः। भेदवादी-द्वैततत्त्वे व्य-
भेदाभेदः-कार्यात्मना भेदः कारणात्मना चाभेदः। [वस्थितः
भेदाभावः-मानाभावादयुक्तेश्च न भिदेश्वरजीवयोः, जीवा-
भेरुण्डः-भयानकः। [नामचितां चैव नात्मनो न परस्परं
भोक्ता-भोगाश्रयः * १ सुखदुःखाकारवृत्त्युपहितं चैतन्यम्।
भोगः-रतिक्रीडा१विभवभेदः २ सुखदुःखान्यतरसाक्षात्कारः।
भोगवती-समुद्राधःपाताललोकवर्तिनी नागपुरी।भेरी-वृहद्ढक्का।
भोगानुवृत्तिः-अविच्छिन्नो भोगः। भोगतृष्णा-भोगलालसा।
भोगी-नानाविधखाद्यपेयचोष्यलेह्यकांतालिङ्गनादिरसास्वादकः
भोग्यं-सुखदुःखान्यतरसाक्षात्कारिज्ञानविषयः (=सुखादिः)।
भोजनं-कठिनद्रव्यस्य गलविलाधःसंयोजनम्।भोजकः-भोजनभो-
भोज्यं-भक्षणीयम्१जिह्वाव्यापारैकग्राह्यं पायसादि। [जयिता
भ्रमः-जलनिर्गमद्वारम्१ विपरीतनिर्णयः२अतस्मिंस्तद्ग्रहः ३
निष्फलप्रवृत्तिजनको बोधः ४ स द्विविधः यस्य यत्रा-
सद्भावस्तस्य तत्र सद्भावारोपः, यस्य वा यत्र सद्भावस्तस्य
भ्रमणं-चञ्चलता१पुनः पुनः पर्यटनम्। [तत्रासद्भावारोपः

भ्रंशः-भ्रंशनम् १वाच्यमर्थं परित्यज्य दिष्टादिभिरनेकधा,अन्य-
भ्रष्टः-धर्मच्युतः १विगर्हितः [स्मिन्नेव पतनादाशु भ्रंश उदाहृतः
भ्रष्टयोगः-ध्यानात्स्खलितमानसः । भ्राजिष्णुः-दीप्तिशीलः ।
भ्रान्तः-भ्रमणः १कर्तव्याकर्तव्यविमूढः २अतात्त्विकान्यथाभा-
भ्रान्तचित्तः-अनवस्थितचित्तः। [वेन वस्त्ववगाहनकर्ता
भ्रूः-नयनोर्ध्वरोमराजिः । भ्रेषः-हानिः। ☞ म
मकुटं-शिरोभूषणम्।मक्षिका-माचिका।मग्नं-लीनम् १ विपद्ग्रस्तं
मङ्कोलं-गृहलेपनचूर्णम् । मङ्कुरः-दर्पणः । मङ्क्षुः-शीघ्रता ।
मङ्गलं-अभीष्टार्थसिद्धिः १ विघ्नविनाशनानुकूलव्यापारवि-
शिष्टम् २समाप्तिप्रतिबन्धकीभूतदुरितविशेषविघातकत्वम्।
मङ्गलपाठकः-स्तुतिपाठकः । मङ्गुलः-सेनामण्डनभूतः शूरः।
मज्जा-अस्थिसारः १अस्थ्यन्तर्गतः श्वेतश्चिक्कणो धातुविशेषः
मञ्जीरं-नूपुरम् १ दधिमन्थनदण्डः । मटची-पाषाणवृष्टिः ।
मणिभूमिकाकर्म-मयनिर्मितपाण्डवसभावन्मणिबद्धभूमिक्रिया
मण्टपं-जनविश्रामस्थानं १अर्धगव्यूततृतीयान्तग्रामान्तररहितं
मण्डलं-समुदायः १ चक्राकारवेष्टनम् २कृत्रिमरेखारचितपदार्थः
मण्डलेश्वरः-चतुश्शतयोजनकदेशाधीश्वरः।मण्डूरं-लौहमलः।
मतं-अभिप्रेतज्ञानम् १निषेधवाचकशब्दः।मताक्षः-ज्ञातपाशकः
मतानुज्ञानिग्रहस्थानं-स्वपक्षदोषाभ्युगमात्परपक्षदोषप्रसङ्गः
मतिः-मननशीलता । मतिमत्त्वं-आगामिगोचरज्ञानवत्त्वम् ।
मत्तः-मदपूर्णः। मत्रिकः-गुप्तभाषकः । मत्सरी-परद्रोहकर्ता ।
मत्सरः-आत्मधिक्कारविशेषः १पराभिमतवारणेच्छा २परोत्क-
र्षासहनपूर्वकस्वोत्कर्षवाञ्छा ३ स्वसमानसंपत्तिदर्शनासहनं
मदः-आमोदः १हर्षातिरेकः २परानभिज्ञत्वेन मनोगर्वः ३ मत्स-
दृशः कोऽस्तीति हर्षबुद्धिः ४ विद्यादिनिमित्तात्स्वस्मिन्नाधि-

वयबुद्धिः।मधुरः-मिष्टरसः१चित्ताकर्षकः२मधुररसविशिष्टः।
मधुभाषी-मधुरभाषणशीलः।मधुवनं-मधुदैत्याधिष्ठितं वनम्।
मधुसूदनः-वेदापहारकदैत्यसंहारी।मध्यमा-दृष्टरजस्का नारी।
मध्यदेशः-गङ्गायमुनयोर्मध्ये यत्प्राग्विनशनादपि,प्रत्यगेव प्र-
यागाच्च मध्यदेशः प्रकीर्तितः। [रालवर्ती
मध्यमः-मन्दत्वशीघ्रत्वयोर्भिन्नव्यापारः१निकृष्टोत्तमयोरन्त-
मध्यमसाहसं-चत्वारिंशदधिकं पणपञ्चशतम्। [लात्मा शब्दः
मध्यमावाणी-हृच्चक्रस्थवाय्यभिव्यङ्ग्यः पश्यन्त्या अपि स्थू-
मध्यस्थः-निसृष्टः १ उभयपक्षाग्राही२स्वार्थरक्षापूर्वकपरार्थ-
साधकः३विवदमानयोः(उभयोपि पक्षपाती हितैषी वा ४)-
मनःस्थः-अन्तःकरणस्थितः। [सदसद्वाक्यविचारकः
मनः-मननात् १ निःस्पर्शाणुः२स्पर्शरहितत्वे सति क्रियावत्।
वाय्वादावतिव्याप्तिवारणाय सत्यन्तम्,आकाशादिवारणाय
क्रियावदिति ३ सुखादिसाक्षात्कारकारणत्वे सतीन्द्रियम्।
चक्षुरादिवारणाय सत्यन्तम्, आत्ममनःसंयोगादिवारणाये-
न्द्रियमिति४द्रव्यसमवायिकारणत्वरहिताणुसमवेतद्रव्यत्वा-
परजातिमदिति नै० ५ सर्वार्थग्रहणमिति जैनाः६सर्वेन्द्रिय-
प्रवर्तकान्तरिन्द्रियम्७सङ्कल्पविकल्पात्मकवृत्तिमदन्तःकर-
णम्८अपञ्चीकृतपञ्चभूतकार्यत्वे सति ज्ञानकर्मोभयकरणं
मननं-धारणम् १साधकबाधकप्रमाण(भ्यां श्रुतितात्पर्यनिर्ण-
यः२) ोपन्यासरूपयुक्तिभिः श्रुतिवाक्यार्थसमर्थनम् ३श्रुतार्थ
(स्य युक्तायुक्तत्वपर्यालोचनम्४)निश्चयानुकूलप्रमेयसंदेह-
निवर्तकयुक्त्यनुसंधानम्। [शस्तमनस्कः
मनस्वी-चित्ताकाङ्क्षी १ स्वेच्छाचारी २ विमानासहः *३प्र-
मनीषी-शास्त्रसंस्कृतमनीषावान्। मनुष्यः-मनोरपत्यम्।

महाप्रकरणं-फलभावनायाः प्रकरणम् १मुख्यभावनासंबन्धित्वं
महाप्रलयः-कल्पान्तः१ब्रह्मणो नाशावस्था२सर्वभावकार्यध्वं-
महाप्रसादः-देवनैवेद्यम्। [सः३जन्यभावानधिकरणकालः
महाप्रस्थानं-देहान्तः१परलोकगमनाय सङ्कल्पपूर्वकं प्रस्थानम्
महाप्राणः-विपुलबलः १ वर्णोच्चार्यमाणो बाह्यप्रयत्नः ।
महाबलः-उत्कृष्टसामर्थ्यम् । महाबाहुः-जानुपर्यन्तदीर्घबाहुः ।
महाबीजः-कारणस्यापि कारणम् [न्थः२महांतं भारं तनोतीति
महाभारतं-महद्भारतम् १ वेदव्यासनिर्मितलक्षश्लोकात्मकग्र-
महामात्रः-मन्त्रे कर्मणि भूपायां वित्ते माने परिच्छदे, मात्रा च
महती येषां महामात्रास्तु ते स्मृताः। [दादिरोगः
महामुनिः-अतिमननशीलः । महारोगः-महापातकजन्योन्मा-
महामोहः-विषयभोगेच्छा १ भोक्तव्यविषयेषु ममत्वारोपः २
विषयेष्वासक्तिविशेषहेतुरहम्ममाभिमानः ३ साधनरहित-
स्यापि सर्वसुखजातीयं मे भूयादिति विपर्ययविशेषः५६७३
महारथः-महायोद्धा१दशसहस्रधनुर्धरैरसाहाय्येन युद्धकर्ता ।
महावाक्यं-महद्वाक्यम् १परस्परसंबद्धार्थकं वाक्यसमुदायरूप-
मेकवाक्यमिति मी० २श्रोतृस्वरूपबोधकपदघटकं वाक्यं,
यथा दशमस्त्वमसि३जीवब्रह्मैक्यबोधकवाक्यम्,यथा तत्त्वम-
स्यादि [सति दृष्टान्ते प्रकारान्तरेण साध्योपसंहारशालित्वं
महाविद्यानुमानत्वं-पक्षे प्रकारान्तरेण साध्योपसंहारशालित्वे
महासत्त्वः-क्रोधशोकाद्यनभिभूतान्तःसत्त्वः। महाहंसः-दण्डादि-
महितत्वं-महाफलप्रदातृत्वम्।महिमा-विभुत्वप्राप्तिः। [हीनः
महेन्द्रः-नेता १उत्कलसमीपवर्ती देशः । महेश्वरः-मायावीतत्प-
महोत्सवः-प्रशस्तव्यवसायः। मांसपः-मांसभक्षकः। [दार्थः
माता-आदरणीया १मान्यते पूज्यते जनैरिति२ब्राह्मी माहेश्वरी

चैन्द्री वाराही वैष्णवी तथा,कौमरी चैवं चामुण्डा चर्चिके-
मागधः-वंशावलीपाठकः।मातुलः-मातुर्भ्राता। [त्यष्टमातरः
मात्रा-लेशः१इयत्ता२स्वरसूचिका रेखा*३एकद्वित्रिलक्षणा४
ह्रस्ववर्णोच्चारणकालः५स्वजानुमण्डलं पाणिना त्रिःपरा-
मानसः-मनःसङ्कल्पमात्रजन्यः। [मृश्यच्छोटिकावच्छिन्नः कालः
मानः-प्रतिष्ठा१चित्तसमुन्नतिः २ सर्वत्राप्रणतिभाव इति ग्रं०
३आत्मनि पूज्यतावुद्धिः४पुरुषान्तरेण संपादितः सत्कारः।
मानसजपः-जिह्वोष्ठादिव्यापाराहितं शब्दार्थयोश्चिन्तनम्।
मानसतापः-मनःस्थवाञ्छापूर्त्यभावजनितोभितापः१परकर्तृ-
मानसपापः-परहिंसादिचिन्तनम्। [कापकारादिनिबन्धनः
मानसवासना-काम्यमानत्वदशाजन्यः संस्कारः। [क्रोधादिः
मानसीकाव्यक्रिया-परमनःस्थितस्यार्थस्य श्लोकनम् ५५३०
मानी-गौरवान्वितः१ विद्यमानैरविद्यमानैर्वा गुणैरात्मश्लाघी
मानुषं-मानुषभावम् १सांप्रतिकं कर्म। मान्यः-पूज्यः१श्लाघ्यः।
माया-प्रवञ्चना१मन्त्रबलेनाविद्यमानवस्तुप्रकाशनम्२अद्भु-
तार्थप्रदर्शनरञ्जनपूर्वकं परवञ्चनेच्छा३हृदयेन्यथा कृत्वा ब-
हिरन्यथाव्यवहरणम्*४अघटितघटनासाधिका शक्तिः५दु-
र्घटघटनापटीयसी शक्तिरिति ग्रं०६विभिन्नाभिन्नभिन्नका-
र्यकरीति७रजस्तमोनभिभूतशुद्धसत्त्वप्रधाना८निरूपयितुम-
शक्यत्वे सति विस्पष्टं भासमाना। आत्मन्यतिव्याप्तिवारणाय
सत्यन्तम् ९ स्वाश्रयाव्यामोहकरत्वे सतीतरव्यमोहकारणम्
१० विचित्रकार्यकरणा अचिन्तितफलप्रदा, स्वप्नेन्द्रजालवल्लोके
मायोपधः-कपटपुरस्कारशीलः। [तेन माया प्रकीर्तिता
मार्कटं-विक्रयस्थानम्।मार्गः-तत्त्वार्थकीर्तनं। मार्जकः-भूमिसं-
मार्जनं-श्लक्ष्णीकरणम्।मार्दवं-निष्ठुरक्रियावर्जनम्। [स्कारकः

माला-कण्ठहारः१ग्रीवालङ्करणम् २ईप्सितार्थस्य सिद्ध्यर्थं क्रियन्ते यत्र सूरिभिः, प्रयोजनान्यनेकानि सा मालेत्यभिधीयते।
माषः-पञ्चगुञ्जा। मासः-त्रिंशदहोरात्रसमुदायः॥५६९२॥
माहिष्यः-वैश्यायां क्षत्रियादुत्पन्नः। माहाकुलः-महाकुलोद्भवः
मित्रं-स्नेहेनोपकारकम् १उपकारमनपेक्ष्योपकर्ता २ उपकारेण वशीकृतम् ३ सर्वविषयेष्वेककार्यकारित्वम् ४ संपत्काले च मित्राणिसंतिकोटिसहस्रशः, आपत्कालेतु यन्मित्रं तन्मित्रं [परिकीर्तितं
मित्रभावः-मैत्री। मित्रभेदः-मैत्रीभङ्गः।
मित्रघ्नः-मित्रघातकः।मित्रबलं-मित्रसंबन्धिबलम् [यासंबन्धः
मित्रयुः-लोकयात्राभिज्ञः। मिथः-अन्योन्यम्।मिथुनं-उपसर्गक्रि-
मिथ्यात्वं-निःस्वरूपत्वमिति बौद्धाः१वस्तुस्वरूपाद्विपरीतप्रतिभासत्वमिति जैनाः२कालासंबन्धित्वमिति नै०३ ज्ञानबाध्यत्वमिति विवरणे ४अध्यासविषयत्वम् ५ब्रह्माभिन्नत्वमिति परिमले ६ स्वतःसत्ताशून्यत्वम् ७ प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्। असद्व्यावर्तनाय प्रतिपन्नोपाधाविति विशेषणम्, प्रागभावादिप्रतियोगित्वमादायांशतः सिद्धसाधनवारणाय त्रैकालिकेति ८ज्ञानाघटितसामग्र्यनिवर्त्यत्वे सति ज्ञाननिवर्त्यत्वं। घटं नाशयामीति ज्ञानपूर्वकं मुद्गरपातादिना तन्नाशदर्शनात्तद्वारणाय सत्यन्तं, आत्मन्यतिव्याप्तिवारणाय ज्ञाननिवर्त्येति ९ असत्त्वाविशेषेपि कदाचित्प्रतीयमानत्वम्। गगनकमलादावतिव्याप्तिवारणाय कदाचिदिति मुक्तावल्याम् १० स्वानधिकरणानधिकरणात्यन्ताभावप्रतियोगित्वमिति तत्त्वविवेके ११ स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यन्ताभावप्रतियोगित्वम्। अभिमतपदमसं-

१ ज्ञानाघटिता पदसंबद्धा या सामग्री तदनिवर्त्यत्वे सतीत्यर्थः।

भववारणाय, यावत्पदमर्थान्तरवारणायेति १२ अयं प्रपञ्चो मिथ्यैव सत्यं ब्रह्माहमद्वयम्, अत्र प्रमाणं वेदान्ता गुरवोनुभवस्तथा मिथ्यातर्कः-ब्रह्मभिन्नत्वं यदि मिथ्यात्वव्यभिचारि स्यात्तर्हि ब्रह्मभिन्नत्वहेतोर्निरुपाधिकत्वं न स्यादिति। मिलं-संश्लेषणं मिथ्यादृष्टिः-कर्मफलापवादकज्ञानं।मिथ्यावादः-अपार्थकप्रलापः मिथ्यावचनं-अयथार्थप्रियवचनम्। [शरीरप्रापकं मिश्रितकर्ममध्यमं-स्वाश्रमोचितकाम्यकर्मानुष्ठानादियोग्य- मिश्रितकर्मसामान्यं-चाण्डालव्याधाद्यधमशरीरप्रापकम् । मिश्रितकर्मोत्कृष्टं-निष्कामकर्मानुष्ठानादियोग्यशरीरप्रापकम् मिषं-पराभिभवेच्छा १प्रयोजनान्तरप्रवृत्तस्य प्रयोजनान्तरोद्भ- मीमांसकः-अन्वेषकः १वाक्यार्थवेत्ता २सिद्धान्तकारकः। [वनं मीमांसा-विचारपूर्वकतत्त्वनिर्णयः १वेदवाक्यविचारः २ वेदा- मीलितः-अप्रफुल्लः । मुकुः-मोक्षः। [र्थकर्मनिर्णायको ग्रन्थः मुकुटं-शिखरः १शिरोभूषणम् । मुकुरः-दर्पणः १कुलालदण्डः । मुक्तः-परित्यक्तः १वृत्तिशून्यः २छिन्नस्नेहपाशः * ३प्राप्तमोक्षः४ निवृत्तसंसारः ५ पुनःसंसाराभाववान् ६अविद्याकामकर्मपा- मुक्तामुक्तास्त्रं-सोपसंहारास्त्रम् । [रतन्त्र्यरहितः मुक्तिः-अनासक्तिः १निःश्रेयसम् २निखिलबन्धराहित्येन स्थितिः मुखं-गलादिसप्ताङ्गकवदनम्।मुखबन्धः-प्रस्तावना । [रामृतं मुखमार्जनं-मुखप्रक्षालनम्।मुखाग्निः-दावानलः।मुखासवः-अध- मुख्यः-मुखे भवः १पथप्रदर्शकः २ प्रकारत्वासमानाधिकरणम्। मुख्यप्रयोजनं-फलांतरेच्छानधीनेच्छाविषयः[सामानाधिकरण्यं मुख्यसामानाधिकरण्यं-अज्ञानोपहितस्य जीवस्यावाधेन ब्रह्मणा मुख्यानन्दः-विषयाद्यानंदानपेक्षभासमान आनंदः[ष्यप्रसिद्धार्थः मुख्यार्थः-प्रधानार्थः १स्वीयप्रवृत्तिनिमित्तप्रकारकप्रतीतिविशे-

मुग्धः-युक्तायुक्तविवेकशून्यः १ सान्निध्ये विषयाणाञ्च समर्थोऽविकलेन्द्रियः, सुप्तवद्वर्तते नित्यं भिक्षुर्मुग्धः स उच्यते।
मुञ्जः-शरवल्कः। मुञ्जीकृतः-रज्ज्वर्थं मुञ्जवज्जर्जरीकृतः।
मुण्डः-छिन्नकेशः १मुण्डिमुण्डः।मुण्डनं-केश(ट पनम् १)हरणम्।
मुण्डी-केशहारी। मुदितः-प्रहृष्टः। [दिभिः सत्कारः
मुदिता-भोग्यवस्तुदर्शनजश्चित्तविकारः १पुण्येष्वभ्युत्थासना-
मुद्गः-खण्डीरः। मुद्गरः-गदा १ द्रुघणः २ मुशलतुल्यो दण्डः।
मुनित्वं-ध्यानभिक्षुत्वम् १वेदशास्त्रार्थतत्त्वावगन्तृत्वम् २ दुःख-पङ्कमग्नजगदुद्दिधीर्षुत्वम् ३निरन्तराद्वितीयार्थमननशीलत्वं
मुनिवृत्तिः-मुनिवृत्त्युपजीवी। [कदा भविष्यतीतीच्छा
मुमुक्षा-स्वरूपेच्छा १ हे धातः! संसारबन्धनान्मम मोचनं
मुमुक्षुः-श्रेयोर्थी जिज्ञासुः १स्वात्मानं द्वैतबन्धान्मोक्तुमिच्छुः।
मुमूर्षुः-मरणासन्नः। मुष्कः-वृषणः १ मांसलः२तस्करः३हृष्ट-
मुष्टामुष्टि-मिथो मुष्टिप्रहरणम्। [पुष्टपुरुषः
मुष्टिः-बद्धपाणिः १ कुञ्च्यग्रभागः२चतुरङ्गुलिः३अङ्गुलि-
मुहुः-पौनःपुन्यम्। [सन्निवेशः४सस्यानाङ्गोपनकालः
मुसलं-अयोग्रः १आयसोऽरत्निप्रमाणको दण्डः।मूकः-वाक्शक्ति-
मुहूर्तं-शुभदः कालः * १त्रिंशत्कला२नालिकाद्वयम्। [शून्यः
मूढः-निर्बुद्धिः १ शास्त्रज्ञानरहितः २ कर्तृत्वाद्यहङ्कारभावारूढः ३ इदमर्थसाधनमिदमनर्थसाधनमिति विवेकशून्यः।
मूढावस्था-निद्रातन्द्राग्रस्तावस्था। मूत्रं-उपस्थनिर्गतजलम्।
मूर्खः-अल्पमतिः १जडबुद्धिः२ प्रकृतज्ञानरहितः३स्वपरबलानभिज्ञः ४ हिताहितबुद्धिशून्यः ५ लोकवेदविरुद्धपक्षावलम्बी ६ वेदशास्त्राधीतत्वे सति संसारासक्तः ७ मूर्खचिह्नानि षडिति गर्वो दुर्वचनं मुखे,विरोधी विषवादी च कृत्याकृत्यं न मन्यते।

मूर्च्छावस्था-मुद्गरादिप्रहरणानन्तरं विशेषविज्ञानोपरमावस्था
मूर्तत्वं-क्रिया(श्रयत्वम् १)वद्द्रव्यत्वम् २परिच्छिन्नपरिमाणवत्त्वं
मूर्तिः-प्रतिमा १आकृतिः२सदृशीकरणम्। मूर्धन्यं-मूर्ध्नि भवम्।
मूलं-सर्वाद्यम् १ अकारणकम् २ पादप्रदेशः ३ टीकार्हग्रन्थः।
मूलहरं-वंशविघातकम्। मषा-ताम्राद्यावर्तनी। [च्छादकं
मूलाज्ञानं-ब्रह्मावरकमज्ञानम् १निरवयवावच्छिन्नविभुचैतन्या-
मृगचक्रः-अनागतार्थज्ञापकः। मृगगामिनी-मृग इव गमनवती
मृगतृष्णा-जलाभा १आकाशे दृश्यमानमलज्जलायमानरश्मिसमूहः
मृगवृत्तिः-प्राणयात्रानिर्वाहात्मको मृगव्यवहारः।मृतं-भिक्षान्नं
मृगाक्षी-मृग इव चपलनेत्रवती स्त्री।मृगया-अहेरा १आखेटकः।
मृत्युः-प्राणहर्ता १दीर्घनिद्रा २महायात्रा ३प्राणवियोगकर्त्री देव-
मृत्युञ्जयमन्त्रः-ॐजूँसः। [ता ४विजातीयात्ममनःसंयोगनाशः
मृत्युदूतः-मरणसूचकः। [स्वभावः ४ प्रेमार्द्रचित्तत्वं
मृदुः-परमिताचारी १सुकुमारत्वम् २ अनिष्ठुरचित्तः ३ सरल-
मेखला-स्त्रीकटिभूषणम् १ ब्रह्मचारिधारणयोग्यं कटिसूत्रम्।
मेदः-अस्थिगतमांसम् १ स्थौल्यहेतुभूतः कश्चन धातुविशेषः।
मेधा-अनेकश्रुतग्रन्थार्थधारणशक्तिः।मेढ्रः-पुंसोऽसाधारणचिह्नं
मेधावी-ऊहापोहकुशलः * १धारणाशालिमतिकः २ गुरूपदि-
मैत्रः-सर्वत्र स्निग्धव्यवहर्ता। [ष्टपदार्थग्रहणधारणपटुः
मैत्री-सर्वभूतसुहृत्त्वम् १परानुद्वेगजनिका वृत्तिः२सुखिष्वात्मी-
मैथुनं-सुखविशेषहेतुशुक्रक्षरणानुकूलो व्यापारः। [यत्वभावनं
मोक्षः-स्वातन्त्र्यम् १ मृत्युर्वेति चार्वाकाः २ उत्तराधरभावेन
निरन्तरोत्पादक्लेशादिदोषदूषितबोधसंततिविच्छेद इति
माध्यमिकाः३पुनर्भावनाप्रकर्षपरिलब्धपरिशुद्धचित्तसंतान
इति योगाचाराः४धर्मिनिवृत्तौ निर्मलज्ञानोदयो महोदय इति

विज्ञानवादिनः ५ प्रलीननिखिलोपाधेः क्षेत्रज्ञस्य सततोर्ध्व-गतिरिति जैनाः५आनन्दमयपरमात्मनि जीवात्मलय इति त्रिदण्डिनः ७ जीवस्य लिङ्गशरीरापगम इति भास्करीयाः ८ अक्षयशरीरादिलाभः९ विष्णुभक्तिधर्माचरणाद्विष्णुलो-कगमनं वेति वैष्णवाः १०सर्वकर्तृत्वमेकं विहाय वासुदेवस्य सर्वज्ञत्वादीनां कल्याणगुणानामाप्तिमत्त्वे सति भगवद्या-थात्म्यानुभव इति रामानुजीयाः ११ जगत्कर्तृत्व,लक्ष्मीप-तित्व, श्रीवत्सवर्जं भगवज्ज्ञानायत्तनिर्दुःखपूर्णसुखमिति माध्वाः१२द्विभुजकृष्णेन सह स्वांशभूतानां जीवानां गोलोके लीलानुभव इति वल्लभीयाः१३पारमैश्वर्यप्राप्तिरिति माहे-श्वराः१४चन्द्रचूडवपुषः सतः पार्वत्यालिङ्गनमिति कापा-लिकाः१५पूर्णात्मतालभ इत्यभिनवगुप्ताचार्याः१६पाशुपत-धर्माचरणात्पशुपतिसमीपगमनमेव पुनरावृत्तिरहितमिति पाशुपताः१७पञ्चाग्निविद्याद्युपासनैरर्चिरादिमार्गेण हिर-ण्यगर्भप्राप्तिरिति हैरण्यगर्भाः १८ पारदरसपानेन देहस्थैर्य-मिति रसेश्वरवादिनः १९ आत्यन्तिकैकविंशतिदुःखध्वंसः २० स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःख-ध्वंसः। संसारकालीनदुःखध्वंसस्य मोक्षत्ववारणाय काली-नान्तं दुःखविशेषणम्, अस्मदीयदुःखसमानकालीनशुकमो-क्षेऽव्याप्तिवारणाय स्वसमनाधिकारणेतिदुःखविशेषणमिति तार्किकाः२१स्वर्गादिरिति मी० २२दुःखसाधनशरीरनाशे नित्यनिरतिशयसुखाभिव्यक्तिरिति तदेकदेशिनः२३नित्य-सुखसाक्षात्कार इति भाट्टाः२४आत्यन्तिकदुःखप्रागभावप-रिपालनमिति प्राभाकराः२५परापश्यन्तीमध्यमावैखरीति वाणीचतुष्टये प्रथमायाः पराख्याया ब्रह्मरूपाया वाण्या दर्श-

नमिति पाणिनीयाः२६पुरुषस्य निर्लेपस्य कैवल्येनावस्था-
नमिति योगिनः२७ प्रकृतिपुरुषविवेकदर्शनात्तदविवेकनि-
वृत्तौ पुरुषस्य स्वरूपेणावस्थानमिति सां० २८चित्तानुत्पा-
दनमित्यन्ये२९संसारोपरम इत्यपरे३०आत्महानिरित्येके
३१निखिलदुःखनिवृत्तिपुरस्सरं स्वात्मानन्दावाप्तिः ३२
विद्यानिरस्ताविद्यातत्कार्यब्रह्म (भावापत्तिः ३३) ात्मनाव-
मोक्षणं-परगृहीतस्वीयभटमोचनम् । [स्थानमिति वे०
मोक्षी-निःसङ्गः।मोघः-निष्फलः।मोचनं-दूरीकरणम् १बहिः-
क्षरणावच्छिन्नव्यापारः। [भिलाषस्य मोट्टायितमितीर्यते
मोट्टायितं-कान्तस्मरणवार्तादौ हृदि तद्भावभवतः, प्राकट्यम-
मोदः-इष्टार्थलाभजन्या सुखाकारा वृत्तिः।मोदितः-संजातमोदः।
मोहः-ममत्वबुद्धिः१चित्तवैकल्यम् * २ अर्जितस्य द्रव्यस्य वि-
नियोगासामर्थ्यम् ३ वस्तुतत्त्वानवधारिणि चित्तवृत्तिः४हि-
मोहनं-भ्रान्त्युत्पादनम्। [तेष्वहितबुद्धिरहितेषु हितबुद्धिर्वा
मोहनिवृत्त्युपायः-सत्येन यथार्थज्ञानरूपेण विवेकेनास्य निवृत्तिः
मोहितः-कर्तव्यविषयकविवेकरहितः।मोहिनी-काममोहजननी।
मौग्ध्यं-बाल्यव्यपगमाद्यद्विसदृशं वचनम्।मोही-मोहविधायकः।
मौण्ड्यं-केशशून्यता।मौञ्जी-मुञ्जनिर्मितमेखला।मौनं-वाक्संयमः
१वाङ्निरोधः२वाग्व्यापारराहित्यम् ३जनैः सह संभाषणा-
भावः४'मौनव्रतं मुहाकष्टं हुङ्कारेणापि नश्यति'५वाचो
यस्मन्निवर्तन्ते तद्वक्तुं केन शक्यते, प्रपञ्चो यदि वक्तव्यः सोऽपि
शब्दविवर्जितः । इति वा तद्भवेन्मौनं सर्वं सहजसंज्ञितम्,
गिरां मौनं तु बालानामयुक्तं ब्रह्मवादिनाम् । [दागतं
मौनी-शब्दप्रयोगरहितः।मौलं-धनबलम् १क्रमागतम् २ मूला-
मौहूर्तिकः-निर्माणारम्भार्थशुभकालनिश्चायकः।म्रक्षणं-स्निग्धता

म्लेच्छः-अनार्यः१जातिच्युतः२अपशब्दवक्ता ३ गोमांसखादको
यस्तु विरुद्धं वहु भाषतेः, सर्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते।
म्लेच्छदेशः-म्लेच्छ(धारो)प्रधानो देशः२चातुर्वर्ण्याचाररहितो
म्लेच्छब्राह्मणः-वापीकूपतडागानामारामसुखवेश्मनाम्,विच्छे-
☞ य [दने निरातङ्कः स विप्रो म्लेच्छ उच्यते
यकृत्-कुक्षिदक्षिणभागस्थः कालखण्डाख्यो मांसपिण्डः५९१०
यजमानः-स्वार्थश्रौतस्मार्तकर्मानुष्ठानकर्ता।यक्षिणी-यक्षपत्नी।
यजुर्मन्त्रः-अनियताक्षरपादावसानो मन्त्रः१वृत्तगीतिवर्जितत्वेन
प्रश्लिष्टतो [१९७५] मन्त्रः,यथाग्नीदग्नीन्विहरे इत्यादिः।
यजुर्वेदः-यजुर्वहुलो वेदः१यजुरवयवको वेदः२यजुर्विनियोजको
वेदः३यजुर्द्रव्यको वेदः४यजुरेव वेदः५यजुषां प्रतिपादको वेदः
यज्ञः-देवतोद्देशेन हविस्त्यागः १ यूपसंवन्धरहितत्वे सति शा-
यज्ञवाहः-यज्ञनिर्वाहकः। [स्त्रविहितकर्मविशेषः
यज्ञोपवीतं-उपनयनम् १कण्ठे विधार्यमाणं कार्पासं त्रिवृत्सूत्रम्।
यतमानवैराग्यं-अस्मिन्संसारे इदं सारमिदमसारमितिसारा-
यतमानसः-नियतमनस्कः।यतव्रतं-संयमव्रतधारी [सारविवेकः
यतिः-पाठविच्छेदः१पादान्ते जिह्वाया विश्रामविशेषः२शम-
यथाक्रमं-क्रममनतिक्रम्य। [दमादिसंपन्नो जितेन्द्रियः पुरुषः
यतिचान्द्रायणं-एकमासं प्रत्यहं मध्याह्नकालेऽष्टाष्टपिण्डाशनं
यथार्थस्मृतित्वं-संस्कारद्वारकप्रमाजन्यज्ञानत्वम् ॥५९३९॥
यथार्थज्ञानं-अदुष्टसामग्रीजन्यं ज्ञानम्। [चनशीलः
यथार्थनिश्चयः-अविसंवादिनिश्चयः। यथार्थवक्ता-सत्यव-
यथार्थानुभवः-अवाधितार्थविषयानुभवः१फलवत्प्रवृत्तिजनन-
यथावृत्तः-स्वेच्छाचारः१यादृशाचारः। [योग्योऽनुभवः
यथासिद्धः-यथोपपन्नः। यथास्थितं-यथास्थातुं योग्यं तथास्थितं

यथेष्टं-यथेप्सितम् १स्वेच्छानुसारम् । [भीष्टव्यवहरणं
यथेष्टाचरणं-स्वच्छन्दचेष्टा १ यथाभिप्रेतानुष्ठानम् २ यथा-
यद्वा-पूर्वकल्पशैथिल्यप्रयुक्तारुच्या कल्पान्तरबोधनम्॥५९०१॥
यमः-पितृपतिः १ पुण्यापुण्यफलदायकः २ कायचेष्टानिरोधः ३
हिंसादिभ्यो निषिद्धधर्मेभ्यो योगिनं यमयति निवर्तयतीति४
अहिंसा (द्यन्यतमः ५) दिपरिग्रहः ६ मनोमात्रसाध्यत्वे सति
निवृत्तिलक्षणयोगाङ्गविशेषः७यमफलानि सकामानां योग-
शास्त्रे कथितानि, तथाहि—अहिंसाप्रतिष्ठायां तत्सन्निधौ
वैरत्यागः १ क्रियाफलाश्रयत्वम् २ सर्वरत्नोपस्थानम् ३
वीर्यलाभः ४ जन्मकथन्तासंबोधः । [यमण्डलवल्गनं
यमकं-नियतस्थानम् १ भिन्नार्थकवर्णसमूहावृत्तिः २ युगपदुभ-
यमत्वं-दण्डम् । यवः-दीर्घयूकः । यवनः-नृपाद्वैश्यायां जातः ।
यशः-कीर्तिपदः १अभिख्यातं २परिचित्तचमत्कृदिजनको गुणौघः
यशस्वी-लब्धकीर्तिः । यष्टा-यागशीलः । यष्टिः-भुजदण्डः ।
यागः-मन्त्रकरणकः १ वह्न्याद्यधिकरणं वा २ सयूपत्वे सत्य-
न्त्याहुतित्वम् । अग्निहोत्रवारणाय सत्यन्तम्, देवगृहस्थण्डि-
लविशेषवारणायान्त्याहुतीति ३ देवतोद्देशेन द्रव्यत्यागः ।
याचनं-स्वोद्देश्यकदानेच्छा १ स्वीकारानुकूलो व्यापारः ।
यात्रा-तीर्थाटनम् १ किञ्चित्कार्यमुद्दिश्य देशान्तरगमनम् ।
यानं-शत्रोस्त्रासार्थं युद्धसमुद्यमः । यापनं-कालादेः क्षेपणम् ।
यियासुः-यष्टुमिच्छुः १गन्तुमिच्छुः।युक्तः-सन्नद्धः १सहितः२मि-
युक्तियुक्तः-युक्तिसङ्गतः। [लितः३सावधानः४शास्त्रविहितः
युक्तप्रतिषेधः-युक्तानामध्यक्षाणां धनापहाराद्वारणम्६०२९
युक्तयोगित्वं-सर्वदा(पदार्थज्ञानवत्त्वम् १)समाधिमत्त्वम्६०३१
युक्तिः-अर्थावधारणम् १अर्थानुकूलोपपत्तिः * २ संशयितार्थस्य

निर्णयः ३ स्वपक्षसाधकविपक्षबाधकप्रमाणोपन्यास इति ग्रं०
युगं-चतुर्हस्तः१कालचक्रम् २पञ्चयवत्सरः। [सकलज्ञानवत्त्वं
युञ्जानयोगित्वं-कादाचित्कसमाधिमत्त्वम् १चिन्तासहकारेण
युतं-संयुक्तम् १ संपन्नम्। [न्धशून्ययोरवस्थानं
युतसिद्धिः-पृथग्गतिमत्त्वम् १युताश्रयाश्रितत्वम् २ परस्परसंव-
युद्धं-परस्पराभिघातार्थशस्त्रादिक्षेपणव्यापारः।युद्धरङ्गं-रणक्षेत्रं
युवती-यौवनवती। यकः-केशकीटः। [संस्कृतदारुविशेषः
यूपः-शास्त्रीयच्छेदनतक्षणादिक्रियाश्रयः १पशुबन्धनसाधनभूतः
योगः-अलब्धलाभः १सन्नहनकालः २वाक्ययोजना ३कामुकका-
मिनीसंमेलनम् *४दैवासुरवृत्तीनां निरोधः५चित्तवृत्तेर्विष-
यान्तरतिरस्कारेणात्मस्थैर्यमिति ग्रं० ६ स्वरूपावस्थितिहेतु-
चित्तवृत्तिनिरोधः७क्लेशकर्मादिपरिपन्थित्वे सति चि० ८
क्लेशकर्मविघटकत्वे सति प्रमाणविपर्यादिवृत्तिनिरोधः।
क्षिप्तमूढादिषु माभूद्योगत्वमिति सत्यन्तनिवेशस्तथा च तत्र
वृत्तिनिरोधसत्त्वेपि क्लेशकर्माद्यविघटकत्वात्तस्य न तेषु
योगत्वम्,विवेकख्यातावपि तद्विघटकत्वात्तद्वारणाय निरोधान्त
योगक्षेमं-जीवननिर्वाहः १अनुभवानुसारवस्तुस्थितिसङ्घटनम् २
योगिनी-रणपिशाचिनी।[अलभ्यलाभचिन्तासहितं लब्धपरिरक्षणं
योगपट्टः-योगाभ्यासार्थं पट्टः १ स्वसंप्रदायपरिज्ञानसङ्केतः।
योगरूढं-योगार्थप्रतिपादकपदम् १शास्त्रकल्पितावयवार्थानुसं-
धानपूर्वकसमुदायशक्त्यर्थबोधकपदमिति स्फोटचन्द्रिकायाम्।
योगरूढिः-उभयशक्तिः १योगार्थवृत्तिरूढिः, यथा पङ्कजादिप-
योगवृत्तिः-अवयवशक्तिः, यथा पाचकादिपदानाम्। [देषु
योगी-उपायज्ञः १योगनिष्ठः २अतीन्द्रियार्थदर्शी। [बाधितं
योग्यं-योगार्हम् १ समुचितम् २ अन्यतरोपस्थितावन्यतरस्या-

योगेशः-विविधविचित्रानन्तशक्तः।योगेश्वरः-दुर्घटघटनसमर्थः
योग्यता-वाक्यार्थाबाधः१तात्पर्यविषयसंसर्गाबाधः,यथा पयसा
सिञ्चति२एकपदार्थेपरपदार्थसंबन्धः३बाधकप्रमाणाभावः४
तत्पदार्थे तत्पदार्थवत्ता ५ कार्यविशेषोत्पादने सामर्थ्यम् ।
योग्यानुपलब्धिः-अभावप्र (त्यक्षसामग्रीविशिष्टप्रतियोग्युपल-
म्भाभावः१) तियोगिसत्त्वप्रसंजनप्रसंजितोपलब्धिरूपप्रति-
योगिकानुपलब्धिः,यथा भूतले घटो नास्तीति प्रतीतिसिद्ध-
घटाभावप्रतियोगिनो घटस्य यद्यत्र घटःस्यादितिप्रसञ्जनेन
(=आपादनेन)तह्युपलभ्येतेति प्रसञ्जितोपलब्धिरूपप्रतियो-
गिका घटस्यानुपलब्धिस्तया भूतले घटाभावप्रमा जायते इति
योजनं-चतुर्गोरुतम्१आसत्तिसंपादनम् । [गाङ्कुरः
योद्धा-युद्धक्षमः। योनिरञ्जनं-रजस्वलाधर्मः। योनिलिङ्गं-भ-
योनिः-गर्भाशयः१उद्भवस्थानम्२शङ्खनाभिरिव त्रयावर्तस्थानं
योनिजशरीरं-शुक्रशोणितयोः परस्परमेलनजन्यं शरीरम् ।
यौक्तिकः-युक्तिसिद्धः [भूतब्रह्मव्यतिरेकेण प्रपञ्चाभावनिश्चयः
यौक्तिकबाधः-मृद्व्यतिरेकेण घटाभावनिश्चयवन्निखिलकारणी-
यौगपद्यं-एकका (लवृत्तित्त्वम्१) लोत्पत्तिकत्वम् ॥६०६६॥
यौगिकः-प्रकृतिप्रत्ययद्वारार्थवाचकः शब्दः १ अवयवशक्त्य-
र्थशक्तिद्वारावबोधकः शब्दः, यथा प्रियः सुखद इत्यादिः ।
यौगिकरूढिः-अवयव(शक्तिसमानाधिकरणसमुदायशक्तिरूपा
रूढिः१)समुदायशक्त्यर्थोपस्थितिबोधे स्वातन्त्र्येणोपस्थिति-
☞ र [बोधविषयत्वम्, यथोद्भिदादिपदेषु
यौवनं-षोडशाब्दात्परम्।रक्तः-रागयुक्तः।रक्तमोक्षणं-रुधिर-
रक्षकः-इष्टप्रापकोऽनिष्टनिवर्तकः।रक्षिता-पालकः [स्रावणं
रक्षा-अनिष्टनिवृत्त्यनुकूलव्यापारः।रङ्कः-कृपणः१धनहीनः ।

रङ्कुः-कृष्णसारमृगः।रङ्गः-नाट्यशाला १मल्लक्रीडास्थानम्।
रचना-प्रतियत्नः १ मानसिककल्पना २ पुष्पपत्रादेर्विन्यासः ।
रजः-रजोगुणपरिणामः १ प्रेरकत्वे सति सक्रियत्वे सति दुःख-
रजकः-निर्णेजकः।रज्जुः-दशदण्डः।रटनं-परिभाषणम्। [हेतुत्वं
रतिः-कामपत्नी १वाह्यसाधननिरपेक्षा * २ विजातीयस्त्रीसंयो-
गः ३वस्तुविशेषविषयिका प्रीतिः ४ यूनोरन्योन्यविषयस्था-
रतिबन्धः-स्त्रीप्रसङ्गासनम् । [यिनीच्छा
रत्नज्ञः-रत्नपरीक्षाकुशलः।रत्निः-वद्धमुष्टिकरः। [थचालकं
रथकारः-रथनिर्माणकर्ता १करण्यां माहिष्यादुत्पन्नः।रथाङ्गं-र-
रमणीयः-चित्ताकर्षकः १ लोकोत्तराह्लादजनकज्ञानविषयः ।
रविः-सूर्यः १वेदत्रयीशब्दमयः। रविवारः-रविस्वामिको वारः।
रसः-पदार्थमात्रसारः १भुक्तान्नपरिणामः * २रसनेन्द्रियमात्र-
ग्राह्यो गुणः ३ विभावानुभावव्यभिचारिभिर्व्यञ्जितो रति-
हासशोकादिस्थायित्वेन चित्तवृत्तिविशेषः ४ शृङ्गारवीरक-
रुणाद्भुतहास्यभयानकाः, वीभत्सरौद्रशान्ताश्चनवधा की-
रसज्ञः-काव्यमर्मज्ञः १रसज्ञानसंपन्नः। [तिता रसाः
रसनेन्द्रियं-रस(ग्राहकत्वं रसनत्वम् १) ोपलब्धिसाधनमिन्द्रि-
यम्। रसनेन्द्रियरससंवन्धादावतिव्याप्तिनिरासायेन्द्रियमिति
रसप्रत्यक्षं-रसावच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदजन्यं रासनं
रसातलं-भूसन्निहिताधोलोकः। रहस्यभेदः-गोप्यप्रकाशनम् ।
रसास्वादः-विक्षेपनिवृत्तिजन्यानन्दानुभवः १ समाध्यारम्भस-
मये ब्रह्मानन्दानवाप्तौ स्थूलवृत्त्यभावानन्दास्वाद इति ग्रं०
राक्षसविवाहः-प्रबलान्प्रमथ्य कन्याहरणम्। राक्षसः-हिंसकः।
रागः-मनोज्ञता १ ध्वनिविशेषेण चित्तरञ्जकः * २ उत्कटे-
च्छा ३अभिमतविषयाभिलाषः ४विषयानुवुभूषा ५पुनःपुनर्वि-

षयानुरञ्जनेच्छा६ रम्यवस्तुदर्शने चित्तस्योत्फुल्लतेति ग्रं०७
स्त्र्यादिष्विष्टसाधनताबुद्ध्या स्नेहः ८ प्राप्तो विषयः क्षय-
कारणे सत्यपि न क्षीयतामित्येवमाकारश्चित्तवृत्तिविशेषः।
रागारुः-आशां दत्वा दानविमुखः।रागी-भावपूर्णः१अनुरक्तः।
रात्रिः-सूर्यमण्डलादर्शनयोग्यकालः।राजपुरुषः-राजकर्मचारी।
राजा-शासिता १दुष्टनिग्रहाधिकारी२षोडशक्रोशपर्यन्तभूमिपः
रामं-रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि, इति रामप-
रामानुजः-विशिष्टाद्वैतप्रवर्तकः। [देनासौ परं ब्रह्माभिधीयते
रामायणं-रामचरितमधिकृत्य कृतो ग्रन्थः। राष्ट्रं-जनपदः।
रासः-देवानां रसनम् १ईश्वरस्य मायया स्त्रीसंभोगः २ अनेक-
नर्तकनर्तकीयुक्तो नृत्यविशेषः [भवेद्रासो मण्डलीभूय नर्तनं
रासक्रीडा-नटैर्गृहीतकण्ठीनामन्योन्यात्तकरश्रियाम्,नर्तकीनां
रिक्थहरः-उत्तराधिकारी।रिपुः-अनिष्टं रपतीति।रिप्रं-कुत्सितं
रीतिः-गुणवत्पदरचना। रुचिः-सार्वकालिकीच्छा। रुठः-रुषणं
रुचितः-रुचिविषयीभूतः। रुजा-प्रहारादिप्रभवा वेदना।
रुतं-ध्वनिः१जयपराजयसूचकम्। रुद्धः-आवरणादिवेष्टितः।
रुद्रः-सर्वसंहारकः१सत्त्वोपसर्जनभूततमोगुणाविच्छिन्नचैतन्यं
रुधिरं-शरीरस्थरसभावधातुः।रुरुः-बहुशृङ्गमृगः। रुष्टं-क्रुद्धं।
रूक्षः-नीरसः१स्नेहशून्यः।स्निग्धजनशून्यः।रूढयौवनः-जातयौवनः
रूढं-जातम् १अंकुरितम् २सङ्केतयुक्तो नाम३प्रकृतिप्रत्ययार्थ-
मनपेक्ष्य समुदायशक्त्यार्थबोधकः शब्दः, यथा गोवृक्षादिः।
रूढिः-प्रथा १समुदायशक्तिः, यथा घटादिपदानाम् २ अवय-
वार्थनिरपेक्षत्वे सति समुदायार्थोपस्थापकत्वमिति ग्रं०।
रूपं-सौन्दर्यम् १अवयवसंस्थानम् २चित्रार्थसमायुक्तो वितर्कः३
तत्तद्वृत्तिरुद्दिष्टधर्मः ४ चक्षुर्मात्रग्राह्यो गुणः। सङ्ख्यादि-

वारणाय मात्रपदम्, प्रभावारणाय गुणपदम्। [तीतिः
रूपकं-आरोपः १ प्रतिकृतिः२उपमानोपमेययोरभेदे साम्यप्र-
रेखा-पङ्क्तिः१सादनम्।रेखामात्रं-रेखापरिमाणम्।रेकः-संदेहः
रेचकप्राणायामः-पीतस्य वायोर्द्वात्रिंशन्मात्राभिस्त्यागः ।
रेणुः-रजः। रेतः-मज्जासारः। रोगी-व्याधितः। [रविशेषः
रोगः-धातुवैषम्यहेतुको(व्याधिः१)मानसः शारीरो वा विका-
रोचनं-रुचिकरम्।रोम-शरीरजातांकुरः [तेन कथितो इत्युतः
रोमहर्षणः-रोमाणिहर्षयां चक्रे श्रोतॄणां यः सुभाषितैः, कर्मणा-
रोदनं-दुःखजन्यबाष्पमोचनम्।रोधनं-देशान्तरसञ्चारविरो-
रोहिणी-प्राप्तरजा नारी। रौक्ष्यं-निष्ठुरता। [धिव्यापारः
लकुहानाडी-गुदप्रदेशस्था नाडी। ☞ ल
लक्षं-दशायुतसङ्ख्या। [संबन्ध्यनुभावकः
लक्षकः-लक्षणोपाधिकः१लक्षणयार्थबोधकः शब्दः १ तीरादि-
लक्षणं-व्यतिरेकिहेतुवचनम् १व्यतिकीर्णवस्तुव्यावृत्तिहेतुरिति
जैनाः २ लक्ष्यमात्रव्यापको धर्मः ३ असाधारणधर्मः, यथा
गन्धवत्त्वं पृथिव्या इति ४इतरभेदज्ञापकम् ५ज्ञानजनकज्ञान-
विषय इति ग्रं० ६ अव्याप्त्यतिव्याप्त्यसंभवदोषत्रयशून्यम्,
यथा गोःसास्नादिमत्त्वम् ७ सजातीयविजातीयव्यावर्तको
लक्ष्यगतः कश्चिल्लोकप्रसिद्धाकारः८समानासमानजातीय-
व्यवच्छेदकम्।नीलमुत्पलमित्यत्र सजातीयमात्रव्यवच्छेदके
विशेषणेऽतिप्रसङ्गवारणायासमानजातीयेति, रूपं गुण इ-
त्यादौ विजातीयद्रव्यव्यवच्छेदकधर्मेतिव्याप्तिवारणायसमान-
जातीयेति ९लक्ष्यतावच्छेदकसमनियतत्वम् । लक्ष्यतावच्छे-
दकसमनियतत्वं नाम लक्ष्यतावच्छेदकेन सह समव्याप्तिकत्वम्
यथाऽन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यमिति प्रमातृल-

क्षणे यत्र यत्रान्तःकरणावच्छिन्नचैतन्यत्वं तत्र तत्र प्रमातृत्वं यत्र यत्र च प्रमातृत्वं तत्र तत्रान्तःकरणावच्छिन्नचैतन्यत्वमिति लक्ष्यतावच्छेदकेन प्रमातृत्वेन सह लक्षणस्य समव्याप्तिः लक्षणप्रयोजनं-इतरभेदज्ञानम् १पदार्थतत्त्वज्ञानम् २व्यावृत्ति- लक्षणवाक्यं-असाधारणधर्मप्रतिपादकं वाक्यम् [व्यवहारो वा लक्षणा-शक्यसंबन्धः १शक्यार्थसंबन्धेन वृत्तिः २ स्वशक्तिज्ञाप्य- संबन्धः ३शक्यार्थस्मृतिव्यवहितशक्यार्थसंबन्धिपदार्थविषय- लक्षणाध्यक्षः-क्षेत्रारामादिसीमाचिह्नाध्यक्षः। [कप्रतीतिः लक्षणाबीजं-मुख्यार्थानुपपत्तिः १तात्पर्यानु०। [द्राचिह्नितः लक्षितः-लक्षणाश्रयः १ लक्षणया बोधितोर्थः * ३ अभिज्ञानमु- लक्षितलक्षणा-शक्यपरम्परासंब(न्धेनार्थान्तरप्रतीतिः १)न्धः, यथा द्विरेफो रौतीति वाक्ये द्विरेफस्य भ्रमरपदे संबन्धस्तस्य लगितः-संसक्तः।लग्निका-अदृष्टरजस्का स्त्री। [च मधुकरे लक्ष्यं-ज्ञाप्यम् १शरवेध स्थानम् २लक्षणाविषयः ३लक्षयितुं योग्यं ४ज्ञानजन्यज्ञानविषयः५वक्तृतात्पर्यविषयत्वे सति शक्यसंबद्धं लक्ष्यलक्षणभावसंबन्धः-पदयोस्तदर्थयोर्वेश्वरजीवयोः सर्वज्ञ- त्वाल्पज्ञत्वादिविरुद्धांशपरित्यागेन चिन्मात्रयोरभेदः । लघिमा-लघुत्वापत्तिः १ कार्पासवल्लघुत्वभवनम्। [शकाष्ठः लघिष्ठः-अतिशयलघुः। लघुः-अगुरुः १अल्पपरिमाणम् २ पञ्चद- लघुत्वं-ह्रस्वसंज्ञकवर्णवृत्तिधर्मविशेषः १शीघ्राल्पोपस्थितिकत्वं लघुक्रमः-त्वरितपदविन्यासः। लघुचित्तः-वायुवच्चलचित्तः। लघ्वी-कोमलाङ्गवती स्त्री । लङ्घनं-सीमातिक्रमगतिः । लज्जा-मन्दाक्षम् १ अपत्रपा २ अकृत्यप्रवृत्तिः ३ अकार्यकरणा- दिजन्यो ज्ञानविशेष इति ग्रं० ४ मुखसंवरणादिकार्यजनको मनोविकारविशेषः ५ कालविशेषदेशविशेषावच्छेद्यजनवि-

शेषसन्निधानप्रयोज्य कार्यविशेषगताकर्तव्यत्वबुद्धिः६३००
लज्जापाशः-ब्रह्मज्ञानाद्यर्थं यतनेऽहोऽयमतीव भक्तो बकध्यायी-
लता-पराश्रयवला। [ति मां लोका वदेयुरित्यादिभावना
लब्धवरः-वरप्राप्तः।लम्पटः-भोजनभट्टः१दोषदूषितः२नारीत-
लम्बुषानाडी-मेढ्रनाडी। लम्बकेशः-दीर्घकेशाढ्यम्। [रङ्गकः
लयः-बाधः१संश्लेषः२ प्रकृतेर्विरुद्धपरिणामः३कार्यस्य कारणे
समावेशः*४ भावान्तरालवर्ती कामः५ नृत्यगीतवाद्यानामे-
ककालविरामः६अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा।
ललितः-मनोमुग्धकारी१शृङ्गारहावजन्यः क्रियाविशेषः[दनं
लवः-द्वित्रुटिः१एकदेशः२परमाणुः३सस्यच्छेदनकालः।लवनं-छे-
लहरी-वीचिमाला १ महातरङ्गः २ स्वभावसिद्धतरङ्गो वा।
लाक्षणिकः-शुभाशुभसूचकलक्षणज्ञः१लक्षणयार्थबोधकः शब्दः
लाघवं-शैघ्र्यम्१लघोर्भावः२तर्कविशेषविषयः। [सूचनं
लाङ्गलं-फलाकर्षणसाधनभूतो दण्डः। लाङ्गूलचालनं-दैन्य-
लाटानुप्रासः-पुनरुच्चारणम् १ लाटजनवल्लभोऽनुप्रासः।
लाभः-समागमः१फलसिद्धिः २ इष्टसिद्धिः३स्वत्त्वोत्पत्तिरूपो
लाभ्यः-लाभार्हः। लालसा-उत्(सुकता१)कटेच्छा। [व्यापारः
लास्यनृत्यं-शृङ्गाररसप्रधानं स्त्रीकृतं नृत्यम्। लाला-सृणिका
लिङ्गं-धर्मबोधकचिह्नम्१पुंसोऽसाधारणचिह्नं२व्याप्त्याश्रयः
३व्याप्तिविशिष्टपक्षधर्मताविशिष्टहेतुः४शब्दसामर्थ्यम्।अं-
कुरादिजननानुकूलबीजादिसामर्थ्यवारणाय शब्देति५प्राकृ-
तगुणगतावस्थात्मको धर्मः६लीनस्यार्थस्य(तात्पर्यादेः)गमकं
लिङ्गार्थः-प्रवृत्तिजनकज्ञानविषयः१प्रवृत्त्यनुकूलप्रवर्तयितृपुरु-
षनिष्ठोभिप्रायविशेषः२कार्यबुद्धिगोचरत्वे सति(प्रवर्तकः३)
लिङ्गदेहः-'सूक्ष्मशरीर'वदस्य लक्ष० [भावार्थसाध्यफलजनकः

लिङ्गभेदः-उपमानोपमेययोर्लिङ्गव्यत्यासः।लिङ्गवृत्तिः-आड-
लिङ्गी-धर्मध्वजी १सूक्ष्मशरीरधारी। [म्बरी १बाह्योपाङ्गी
लिप्तं-श्लिष्टम् १विषदिग्धः२कृतलेपनम्।लिप्सा-लब्धुमिच्छा।
लिपिः-शब्दानुमापकरेखा १ अक्षरनामकसाङ्केतिकचिह्नमिति
ग्रं० २ज्ञानजनकशब्दघटकवर्णाभिव्यञ्जकरेखोप विलेखनम्।
लीनं-मग्नम् १तन्मयम् २नेत्रच्छदम् ३लयप्राप्तम् ४तिरोहितम्।
लीला-प्रियानुकरणम् १ रहस्यपूर्णव्यापारः२फलनिरपेक्षप्रवृ-
त्तिः३ शृङ्गारादिजातचेष्टा ४ स्त्रीणां क्रीडारूपो व्यापारः
लुब्धः-भोगतृष्णाकुलः १ अत्यन्तधनाशापरः । लेखः-लिपिः ।
लेखकः-लेखनकर्ता १शीर्षोपेतान्सुसंपूर्णान्समश्रेणिगतान्समान्,
लेखनी-वर्णाङ्का। [अक्षरान्विलिखेद्यस्तु स लेखक इति स्मृतः
लेशाविद्या-क्षालितलशुनभाण्डानुवृत्तलशुनवासनाकल्पोवि-
द्यासंस्कारः२प्रारब्धकार्यसंपादनपटीयानविद्याया अवस्था-
विशेषः२आवरणविक्षेपशक्तिमत्या मूलाविद्यायाः प्रारब्ध-
कर्मवर्तमानदेहाद्यनुवृत्तिप्रयोजको विक्षेपशक्त्यंशः।[शर्करादि
लेशः-अल्पीभावः।लेह्यं-मुखलालयाद्रवीभावमापद्यमानं खण्ड-
लोकः-जनसमूहः१लोक्यतेऽनुभूयत इति २ प्राणिनां कर्मफल-
लोककण्टकः-दुष्टप्राणी । [भोगस्थानविशेषः
लोकवासना-सर्वे जना यथा मां न निन्दन्ति यथा वा स्तुवन्ति
तथैव सर्वदाचरिष्यामीत्यशक्यार्थाभिनिवेशः१लोकानुभव-
जनितत्वे सति लोकस्यैव पुनः पुनः(रञ्जनाद्यर्थम्)स्मरणहेतुः
लोकवासनानिवृत्त्युपायः-संपादयितुमशक्यत्वात्पुरुषार्थानुप-
लोकैषणा-लोकाभिमानः। [योगित्वादिति निरन्तरचिंतनं
लोकसंग्रहः-लोकनिष्ठसदाचारविषयकप्रवृत्तिजनको व्यापारः१
लोकानां स्वे स्वे धर्मे प्रवर्तनपूर्वकमुन्मार्गान्निवर्तनमिति ग्रं०

लोडनं-इतःस्ततः चालनम्।लोडिनी-लोडनकर्त्री। लोपः-अदर्शनं
लोभः-अतितृष्णा १लब्धधनापरिहाणप्रयत्नः २प्राप्तेष्वपि वि-
षयेष्वलम्बुद्धिराहित्यमिति ग्रं० ३ हस्तं गतस्यापि वित्तस्य
बुद्धिपूर्वकमुचितव्ययवर्जनम् ४ परवित्तादिकं दृष्ट्वा नेतुं यो
हृदि जायते,अभिलाषो द्विजश्रेष्ठ स लोभः परिकीर्तितः ५अ-
स्तेयेनापरिग्रहेण संतोषेण दानेन चास्य निवृत्तिः। [घृक्षुः
लोभी-धनव्ययभीरुः १स्वद्रव्यापरित्यागित्वे सति परद्रव्यजि-
लोलुपः-अत्यासक्तः १अतिलोभयुक्तः २निरर्थकमानसचेष्टावान्
लौकिकः-अप्राप्तशास्त्रजन्यधीप्रकर्षः।लोष्टः-शुष्कमृत्पिण्डः।
लौकिकगुणाधानवासना-समीचीनशब्दादिविषयसंपादनम् ।
लौकिकदोषापनयनदेहवासना-चिकित्सकोक्तैरौषधै (र्मुखा-
लौहित्यं-रक्तवर्णः । [दिप्रक्षालनम् १)व्याध्याद्यपनयनं
लौकिकवाक्यत्वं-आप्तपुरुषोक्तत्वे सत्यर्थबोधकपदसमूहत्वं
लौकिकीशाब्दीप्रमा-आप्तवाक्यजन्या प्रमा ☞ व
वंशः-दशहस्तः १दीर्घदारुविशेषः २अविच्छिन्नाधारः ३पितृपि-
तामहादिरूपोत्पादप्रबन्धः ४ पुत्रपौत्रपरम्परानुगतशरीरसं-
वंशकरः-मूलपुरुषः । वंशघ्नः-कुलनाशकः । [ततिप्रवाहः
वकः-कुटिलीभावः।वक्त्रासवः-अधररसः। [विनीतश्वं रुंदाहृतः
वंकवृत्तिः-अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः,शठो मिथ्या-
वक्ता-उपदेष्टा १वाक्शक्तिसंपन्नः २ अप्रतिहतवाग्व्यवहारः ।
वक्तृतात्पर्यं-पुरुषाभिप्रायः १तदर्थप्रतीतीच्छयोच्चारितत्वम्।
वक्रोक्तिः-कुटिलोक्तिः १वक्रमार्गेण कथनम् २अन्यथा संभावि-
तयोश्शब्दार्थयोरन्यथा योजनमिति ग्रं० ३एकेनान्याभिप्राये-
वक्तुं-कथयितुं १अधिगतम्।वचनीयं-कलङ्कः। [णोक्तं वाक्यं
वचनं-कथनम् १ पुनरावृत्तिः २ ज्ञानोद्देश्यकप्रवृत्त्यधीनशब्दः।

वज्रः-शत्रुभयङ्करः १ प्रत्यक्षनिष्ठुरः २ रूक्षप्रायं वचनम् ।
वज्रधरणं-विंशतितण्डुलम् । वज्रपुटं-औषधीपाचनपात्रम् ।
वज्रहृदयः-वज्रवन्निष्ठुरमनस्कः । वज्री-वज्रवान् १वज्रायुधः।
वञ्चकः-वञ्चनकर्ता १ अन्यथा स्थितस्य वस्तुनोऽन्यथा रूपेण
वध्री-एकतन्तुका चर्मरज्जुः। [कथादिनाऽन्यमोहोत्पादकः
वञ्चनं-स्वार्थसिद्धि(फलकं कपटाचरणम् १)व्याजेन वशीकरणं
वदतोव्याघातः-परस्परपराहतवाक्यम्, यथा ममसुखे जिह्वा
वधः-प्रमापणः १व्यापादः। [नास्ति,मे माता वन्ध्येत्यादौ
वनं-स्वतःसिद्धवृक्षसमूहः।[सरोरुहैः,पञ्चभिः पुष्पैरेतैः प्रकीर्तिता
वनमाला-आपादलम्बिनी माला १तुलसीकुन्दम दारपरिजात-
वनस्थली-आरण्यदेशः १ तृणगुल्मलताजलाशययुक्ता भूमिः ।
वनस्पतिः-अश्वत्थादिवृक्षः। वनिता-जातरागस्त्री १प्रणयकारि-
वन्द्यः-वन्दनीयः १नमस्कार्यः।वन्द्यमानः-स्तूयमानः। [णी नारी
वदनं-स्तवनम् १ स्वोत्कृष्टत्वप्रकारकज्ञानाननुकूलव्यापारः ।
वन्दी-मङ्गलपाठकः १प्रबन्धस्तुतिपाठकः।वरत्रा-चर्ममयीरज्जुः
वंध्या-प्रसवसामर्थ्यशून्या।वपनं-केशमुण्डनम्।वरिष्ठः-श्रेष्ठतमं
वरं-वरणीयम् १ स्वीकारम् २ प्रार्थितोऽर्थः ३ मनाक्प्रियः ।
वरूथं-तनुत्राणम् १ रथवेष्टनम् । वर्गः-सजातीयसमुदायः ।
वर्चः-शरीरकान्तिः । वर्णकः-रञ्जनसाधनो धातुः ॥६३१०॥
वर्णः-आकृतिः १ब्राह्मणादिजातिभेदकः २शब्दस्य स्फुटावस्था ।
वर्णदूतः-अक्षरः।वर्णनं-पदान्तरापादनम् । वर्णविपर्ययः-अन्य-
वर्णविलोडकः-ग्रन्थतस्करः । [स्यसिद्धिरन्यस्योच्चारणं
वर्णसंहारः-वर्णितस्यार्थस्य तिरस्कारः।वर्णाङ्का-वर्णतूलिका ।
वर्तमानकालः-सूर्यपरिस्पन्दादिक्रियावच्छिन्नः कालः १वर्तमा-
नोपाधिसंबन्धित्वम् २स्वध्वंसप्रागभावानधिकरणवृत्तित्वम् ३

प्रयोगोच्चारणाधिकरणत्वे सति प्रारब्धापरिसमाप्तिक्रियाश्रय :
वर्तमानप्रतिबन्धः-वर्तमानकालीनत्वे सति तत्त्वज्ञानप्रतिरोधः
वर्त्म-स्वाभाविकः पन्थाः। [मासात्मककालः
वर्वरः-प्राकृतो जनः। वर्वरीकः-कुटिलकेशः। वर्षः-द्वादश-
वल्लरी-वशीभूता१पुष्पमञ्जरी। वल्ली-लता१जीविताशा।
वशकरः-अन्यान्वशे कर्तुंसमर्थः।वशक्रिया-वशीकरणम्। [तत्
वशित्वं-मनोमोहकता१येनैश्वर्येणेन्द्रियादीनि वश्यानि भवन्ति
वशी-स्वाधीनकर्ता१उपाधिदोषानभिभूतः२जिताशेषबहिरि-
वशीकरणं-स्वायत्तीकरणम्। वश्यः-अनुचरः। [न्द्रियं
वशीकारवैराग्यं-ऐहिकामुष्मिकविषयजिहासा।वषट्-हविर्दानं-
वष्टरः-पञ्चविंशतिदर्भनिर्मितस्तापसासनविशेषः। वसा-मेदः।
वस्तुनिर्देशमङ्गलं-स्वेष्टतमदेवतागुणगणोक्तिः।वस्तु-प्रमेयम्।
वस्तुपरिच्छेदः-अन्योन्याभावप्रतियोगित्वम् १ सर्ववस्तुसमा-
वाक्यपतिः-निर्दोषोद्धतवचनयुक्तः। [नाधिकरणाभावः
वाक्यं-वक्तुमर्हम् १समभिव्याहारः२एकतिङन्तार्थमुख्यविशे-
ष्यकम्, यथा पचति भवतीति३ स्वार्थबोधसमाप्तम्४पद-
समूहः। घटादिसमूहवारणाय पदेति५आकाङ्क्षायोग्यता-
सन्निधिमत्पदसमुदायः, यथा गामानय। विलम्बोच्चारित-
पदसमुदायेतिव्याप्तिवारणाय सन्निधीति,अग्निना सिञ्चे-
दिति वाक्येऽतिव्याप्तिव्यावृत्त्यर्थं योग्यतेति, गौरश्वः पुरुषो
हस्तीत्यत्रातिव्याप्तिवारणायाकाङ्क्षेति६शाब्दप्रतीतिजन्य-
वाक्यपद्धतिः-वाक्यरचनविधिः [शाब्दप्रतीतिजनकं पदात्मकं
वाक्यज्ञः-वाक्यतात्पर्यज्ञाता। वाक्यविज्ञातः-वाक्यतात्पर्यार्थो
वाक्यवज्रः-हृदयदाहोत्पादककठोरवाक्यप्रयोक्ता। [विज्ञातः
वाक्यशेषः-कथावसानम्* १अपेक्षितगुणसमर्पकः २ प्रकृतार्थ-

विधायकः३विध्यर्थसंदेहाधीनाकाङ्क्षाप्रयुक्तप्रयोगविषयः।
वाक्यसंबद्धः-वाक्यनिष्ठशक्तिज्ञानजन्यबोधविषयः ॥६२६१
वाक्यार्थः-पदोपस्थापितपदार्थानां परस्परसंबन्धः१साकाङ्क्ष-
पदार्थो निराकाङ्क्षः, यथा गौरित्युक्ते किमित्याकाङ्क्षा-
भवति, ततो गच्छतीत्युक्ते निराकाङ्क्षं भवति २ वाक्यता-
वागरः-निर्णयः १ वीरपुरुषः। [त्पर्यविषयः
वाक्यैकवाक्यता-वाक्यानामुपकार्योपकारकाकाङ्क्षायामेकवा-
क्यता१ उपजीव्योपजीवकभावापन्नबोधजनकत्वमिति वै०२
स्वार्थबोधे समाप्तानां पदानां परस्पराकाङ्क्षयैकवाक्यता३
अङ्गबोधकवाक्यस्याङ्गिबोधकवाक्येन सहैकवाक्यतेति मी०४
प्रत्येकं भिन्नभिन्नसंसर्गप्रतिपादकयोर्वाक्ययोराकाङ्क्षावशेन
वाक्शरः-निष्ठुरभाषी। [महावाक्यार्थबोधकत्वमिति वे०
वाक्यसन्धिः-जिह्वासंधानं।वागिन्द्रियं-वचनक्रियासाधनमिन्द्रियं
वागुरा-स्नेहपाशः१विषयतृष्णादिवासना। वाग्यज्ञः-प्रणवजपः
वाग्जीवनः-कथोपजीवी। वाग्दण्डः-पारुष्यम् १ मितभाषणम्।
वाग्विदग्धा-मनोमोहिनी स्त्री१मधुरभाषिणी।वाग्युद्धं-वादविवादः
वाग्मी-मधुरोपपन्नवक्ता१अभिसंहितार्थसमर्पणक्षमवाक्यवक्ता
वाचकः-पुराणादिपाठकः *१अभिधोपाधिकः२शक्यार्थबोधकः
वाचनं-लिखिताक्षरपाठनम्। [शब्दः३पदार्थस्मृतिजनकत्वं
वाचालः-असङ्गतार्थप्रलापी। [येद्वाचा वाचिकोऽयं जपः स्मृतः
वाचिकजपः-यदुच्चनीचोच्चरितैः शब्दैः स्पष्टपदाक्षरैः,मन्त्रमुच्चार-
वाचिकपापं-दुरुक्त्यादिकम्१वाक्यनिष्पादितं पापम् [क्पटुः
वाचिबद्धं-वाग्व्यापारमात्रसाध्यम्।वाचोयुक्तिः-घोषणा१वा-
वाच्यं-वचनार्हं१पदजन्यप्रतीतिविषयः।वाच्यवज्रं-कठोरशब्दः
वाच्यलिङ्गः-वाच्यमित्युच्यते भेद्यं तल्लिङ्गभजनेतु यः, विशे-

षणत्वमापन्नो वाच्यलिङ्गः स उच्यते । वाजं-शरपक्षः ।
वाञ्छा-फलतृष्णा १इष्टसाधनताधीजन्याभीष्टविषयचित्तवृत्तिः
वादः-तत्त्व(बुभुत्सुना सह कथा १)निर्णयफलः कथाविशेषः२य-
वादप्रतिवादः-शास्त्रार्थः [थार्थबोधेच्छुवाक्यम् ३स्वाभिमता-
वार्तद्धिः-वायुवृद्धिः। वातकेलिः-प्रेमरसपूर्णालापः। [र्थकथनं
वादकः-वंशवीणादिवादयिता[तसाध्यसिद्ध्यर्थन्यायप्रयोगकर्ता
वादी-प्रथमपक्षप्रतिपादकः १विचारस्थले वादकथाकर्ता२प्रकृ-
वानप्रस्थः-तपोनिष्ठः १ गृहस्थाश्रममपहाय गृहीतमुनिवृत्ति-
रसंन्यस्तः २ गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः, अप-
वानरः-लाङ्गूलः। [त्यस्यैव चापत्यं तदारण्यं समाश्रयेत्
वानप्रस्थब्राह्मणः-अकृष्टफलमूलाशी वनवासरतः सदा, कुरु-
तेऽहरहः श्राद्धं मुनिर्विप्रः स उच्यते । [कूलो मार्गः
वापी-कृत्रिमसरा । वाममार्गः-वेदविहितदक्षिणमार्गस्य प्रति-
वामनः-अल्पकरचरणः। [धत्ते सा वामा तु प्रकीर्तिता
वामा-या पुनः पूज्यमाना तु देवादीनां तु पूर्वतः, यज्ञभागं स्वयं
वामोरूः-प्रशस्तोरुमती नारी।वायुकोणः-पश्चिमोत्तरयोरन्त-
वारः-पल्लीपारः १पर्यायागतो दिवसः। [राला दिक्
वायुः-शब्दस्पर्शगुणकः १रूपरहितत्वे सति स्पर्शवत्त्वं वायुत्वम्
वारकः-प्रवृत्तिनिरोधकः । वारणं-क्रियाप्रतिषेधः १प्रवृत्तिवि-
वारुणी-पश्चिमदिशा १वरुणनिर्मिता मदिरा। [मुखीकरणं
वार्ता-कथोपकथनम् । अन्योन्यक० । वार्तायनः-संवाददाता ।
वार्त्तिकः-वार्तामात्राभिज्ञः १ उक्तानुक्तदुरुक्ता(र्थव्यक्तका-
रित्वम् २) नां चिन्ता यत्र प्रवर्तते, तं ग्रन्थं वार्त्तिकं प्राहुर्वा-
वार्यं-आशीर्वचनम्। [र्त्तिकज्ञा मनीषिणः
वार्षिकः-वर्षे वर्षासु वा भवः। वासः-फलभूतार्जनकर्तृकर्तृकः।

वासना-अनुभवजन्या स्मृतेर्हेतुः १ पूर्वापरपरामर्शं विना सहसोत्पद्यमानस्य क्रोधादिवृत्तिविशेषस्य हेतुश्चित्तगतः संस्कारविशेषः, यथा स्वस्वदेशाचारकुलधर्मभाषास्वभावभेदतद्गतापशब्दसुशब्दादिषु प्राणिनामभिनिवेशः २ सुषुप्त्यवस्थागता धीसूक्ष्मावस्था। [सत्यपि क्रोधाद्यनुत्पत्तिः
वासनाक्षयः-विवेकजन्यचित्तप्रशमवासनादार्ढ्येन वाह्यनिमित्ते
वासनानन्दः-ब्रह्मध्यानादेर्व्युत्थितस्य या आनन्दस्य वासना।
वासुदेवः-सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः, ततः स वासु-
वाहसः-जलप्रणाली। [देवेति विद्वद्भिः परिकीर्तितः
वाहः-धान्यपूर्णशकटम् १ त्रिंशतिखारीकः २ द्वात्रिंशत्सहस्रतोलः।
वासी-काष्ठतक्षणशस्त्रम्। [नराः सार्द्धलक्षमश्वाः
वाहिना-पञ्चाशत्सहस्रं नागास्तावन्तो रथाः सार्धलक्षद्वयं
विकचः-केशशून्यः। विकरणः-प्रकृतिप्रत्यययोर्मध्ये यः पतितः सः।
विकत्थनः-स्वगुणश्लाघी १ परगुणाक्षेपेण स्वगुणोत्कर्षाभि-
विकर्म-निषिद्धं कर्म। विकर्मा-कर्महीनः। [धानशीलः
विकल्पः-अनेन वानेन वेति १ पक्षान्तरबोधकः शब्दः २ तुल्यकक्षयोरेकबाधेनान्यसंबन्ध इति ग्रं० ३ शब्दज्ञानानुपाती वस्तुशून्यः ४ स्वविरोध्युत्तरज्ञानावध्यत्वे सति वस्तुशून्यत्वं
विकल्पसमा-दृष्टान्ते विकल्पं कृत्वा दार्ष्टान्तिके विकल्पकथनं
विकारः-प्रकृतेरन्यथाभावः १ जन्यत्वे सत्यजनकत्वं विकारत्वं
विकूणनं-विकृतिविमुखीकरणम्। विकृतः-वीभत्सः १ मलिनीकृतः
विकृतिः-विकलाङ्गसंयुक्तो विधिः १ आतिदेशिकेतिकर्तव्यताकत्वमिति मी० २ तत्त्वानारंभकं ३ जन्यत्वेसतिजनकत्वमिति सा०
विक्रमः-परतर्जनः १ पराभिभवसामर्थ्यम्। विक्रमहीनः-धर्म-

१ आदिपदेन विषयध्यानस्य सुषुप्तेश्च परिग्रहः।

कार्यादिर्निरुत्साहः । [कपरस्वत्वजनकत्यागः
विक्रयः-संगृहीपण्यव्ययः १ मूल्यग्रहणप्रयुक्तस्वस्वत्वध्वंसपूर्व-
विक्रयहितः-विक्रेतुरनुकूलः।विक्रयी-विक्रयकर्ता।विक्रांतः-परा-
विक्रेता-विक्रयिकः। विक्लवः-विह्वलः१व्याकुलीभावः [क्रमी
विक्षिप्तावस्था-क्षिप्ताद्विशिष्टा (कदाचिद्ध्यानावस्था विषय-
प्रवणा च कदाचित्) अवस्था। [चित्तवृत्तेरन्यावलम्बनं
विक्षेपः-पुनःपुनर्विषयानुसन्धानम् १ अखण्डवस्त्वनवलम्बनेन
विक्षेपगदायुद्धं-समीपस्थे कोट्या प्रहारः। [ङ्गमुद्भाव्यं कथा०
विक्षेपनिग्रहस्थानं-केनचिद्व्याजेन कथाविच्छेदः१कार्यव्यासा-
विक्षेपशक्तिः-आकाशादिविविधकार्यजननानुकूलमज्ञानसामर्थ्यं
विखः-गतनासिकः। विख्यातः-लब्धकीर्तिः। विगमः-प्रस्थानम्
विग्रहः-विरोधमात्रम् १ परमण्डले दाहलुण्ठनच्छेदनादिना
युद्धकरणम् * २ वृत्त्यर्थाववोधकं वाक्यम् ३समासादिवृत्ति-
समानार्थकवाक्यम् । [प्रयोजकीभूतधर्मविघटकः
विघ्नः-समीहितक्रियास्वरूपप्रतिवन्धकं पापम् १ कार्योत्पाद-
विचक्षणः-सतर्कः१स्वार्थज्ञः२ऊहापोहकुशलः३लौकिकालौकि-
विचर्षणिः-विविधशोधनप्रकाराभिज्ञः। [कक्रियाकु०
विचारः-प्रमाणेन तत्त्वपरीक्षा * १तात्पर्यनिर्णयानुकूलयुक्त्य-
नुसंधानम् २युक्तिवाक्यैरनेकैश्च अप्रत्यक्षार्थसाधनः,अनेको-
पायसंयुक्तो विचार इति कीर्तितः। [णमननात्मिका वृत्तिः
विचारणाभूमिका-गुरुमुपसृत्य वेदान्तवाक्यविचारात्मकश्रव-
विचित्रं-विशेषेण चित्रम् * १स्वविपरीतफलनिष्पत्तये प्रयत्नः।
विचेतनः-निर्जीवः १ चैतन्यरहितः २ कर्तव्यार्थचेतनाशून्यः ।
विचेताः-कामादिभिर्ग्रस्तचित्तः । विचेष्टितः-चेष्टाशून्यः ।
विच्छेदः-एकजातीयद्रव्यगुणादीनामन्यजातीयेन व्यवधानम् ।

विजयः-जयलाभः१पराहङ्कारखण्डनम्।विजननं-गर्भमोचनम् ।
विजयी-जितशत्रुः।विजातीयः-वर्णसङ्करः१विभिन्नधर्मावलम्बी
विजातीयभेदः-विरुद्धजातिकृतो भेदः, यथा वृक्षस्य शिलादितः।
विजिहीर्षुः-विहर्तुमिच्छुः।विजिगीषा-विजेतुमिच्छा[सुक्ष्मशाखा
विज्ञानमयकोशः-ज्ञानेन्द्रियैः सहिता बुद्धिः।विटपं-अल्पशाखा१-
विज्वरः-सर्वसंतापरहितः१मरणशङ्कारहितः।विज्ञाप्यं-प्रार्थना
विडंबनं-उपहासः१संतापनं२अनादरकारणम् ३बुद्धितिरस्कारकं
वितण्डा-परस्परस्पर्धा १ स्वपक्षस्थापन(हीनः प्रतिपक्षे प्रति-
क्षेपः२)हीना विजिगीषुकथा ३ स्वपक्षानिर्देशपूर्वकं परपक्ष-
खण्डनमात्रोद्देशेन कथोपकथनम्। [न्तरंजायमान ऊहः
वितर्कः-विपरीततर्कः१अनेकधर्मप्रकारकं ज्ञानम् २ संदेहाद्यन-
वितस्तिः-द्वादशांगुलः।वितानः-निःसारः।वितृष्णं-कामनाशून्यं
वित्तपाशः-एतावद्वित्तं कथं त्यजेयमिति चिन्तयतो धनिनः स-
वित्तैषणा-वित्ताभिमानः। [न्मार्गगतिप्रतिबन्धः
विदग्धः-लोकशास्त्रनिष्णातः । विदारकः-विदारणकर्ता ।
विदीर्णः-प्रस्फुटितः। विदूषकः-विकृताङ्गवचोवेषैर्हास्यकारी।
विदेहमुक्तिः-भाविशरीरानारम्भः १ तत्त्वज्ञानिनो भोगेनप्रा-
विद्धः-विद्रितः। [रब्धकर्मक्षये वर्तमानशरीरपातः
विद्यमानः-सर्वदेशेनानपहृतः। [स्तीति मनसोभिनिवेशः
विद्यामदः-मत्सदृशः को वेत्त्यहं पण्डितो न मत्तोन्यः पण्डितोऽ-
विद्या-पुरुषार्थसाधनम् १वेदार्थपरिज्ञानम्*२विद्याहेतुशास्त्रम्
विद्यामदनिवृत्त्युपायः-अहं कः मत्तोप्यधिकाः पण्डिता बहवः
संति तस्मान्मामपि कश्चित्पण्डितः पराभविष्यतीति निरन्त-
विद्यार्थी-अधीयानः१ज्ञानाभिलाषी। [रचिन्तनं
विद्रवः-द्रवीभावः१शङ्कादिभिर्मनसः क्षोभः। विद्रुतः-पलायितः

विद्वत्संन्यासः-गृहस्थाश्रमादौ कृतश्रवणादिभिरुत्पन्नसाक्षात्कारेण गृहस्थादिना चित्तविश्रान्तिलक्षणां जीवन्मुक्तिमुद्दिश्य
विद्वान्-शास्त्र(ज्ञाता १)नुशीलकः। [क्रियमाणः संन्यासः
विद्विष्टः-घृणितः। विद्वेषणं-घृणोत्पादकः १ विद्वेषकारकः।
विधवा-मृतभर्तृका स्त्री। विधाता-विविधप्रकारेण पोषकः।
विधानं-आदेशः १अप्रवृत्तप्रवर्तनम् २अप्राप्तस्य प्राप्तये कथनम्।
विधिः-शास्त्रोक्तव्यवस्था १ प्रवर्तकज्ञानविषयो धर्मः*२विधायकवाक्यम् ३ पुरुषप्रवर्तकवाक्यं वा ४ अज्ञातार्थज्ञापको वेदभागः५अप्राप्तप्रापको विधिरिति वैदिकाः६शब्दभावना विधिरिति भाट्टाः७नियोगो विधिरिति प्राभाकराः८इष्टसाधनतावोधकप्रत्ययसमभिव्याहृतवाक्यमिति तार्किकादयः।
विधित्सा-विधानेच्छा १इदमदः करीष्यामीतीच्छा २ सत्यप्यु-
विधुरः-जीवनासमर्थः। [त्तरोत्तरलाभे पिपासाख्या अतृप्तिः
विधूतं-आदावनुनयस्य कृतस्यापरिग्रहः।विधेयं-विधातुं योग्यम्
विनयकामः-शास्त्रसंस्कारार्थी।विनश्वरः-क्षणभंगुरः१ध्वंसशीलः
विनष्टत्वं-भूतकालोत्पत्तिकनाशप्रतियोगित्वम्।विना-अन्तरेण।
विनिगमनाविरहः-एकतरपक्षपातियुक्तिविरहः। [विनाशकः
विनिमयः-तुल्यद्रव्यदानेन द्रव्यान्तरग्रहणम्।विनायकः-विघ्न-
विनियोगः-अनुष्ठानक्रमविधानम् १प्रकृतक्रियाप्रवृत्तिः [क्षकः
विनियोगविधिः-अङ्गप्रधानसंबन्धबोधको विधिः।विनेता-शि-
विनिवर्तनं-प्रत्यावर्तनम्।विनोदः-मनोनुकूलेन कालयापनम्।
विन्यासः-स्थापनम् १निर्वेदवाक्यम्। विपक्त्रिमं-विपाकाधीन-
विपक्षः-निश्चितसाध्याभाववान्*१विरुद्धपक्षावलम्बकः [जातं
विपणिः-पण्यवीथिका।विपदा-सङ्कटः१धनबन्ध्वादिनाशः[ल्पनं
विपरीतः-रतिबन्धः१अन्यथाभूतप्रकृतिः२प्रकृतोपमर्दकार्यक-

विपरिधावकः-स्वगुणप्रख्यापनायेतस्ततो धावनशीलः ।
विपरीततर्कः-दुर्भावनिवर्तकः १यत्र तु व्यापकं प्रथमं निर्दिश्य
व्याप्यमापाद्यते,यथा यदि धूमो न स्यात्तदा वह्निर्न स्यादिति
विपरीतभावना-अतस्मिंस्तद्बुद्धिः, यथा देहे आत्मत्वबुद्धिः ।
विपर्ययः-व्यतिक्रमः १बाध्यमानज्ञानम् २मिथ्याध्यवसायः ३अ-
तस्मिंस्तत्प्र(त्ययः४)कारकनिर्णयः ५ विचारस्यान्यथाभाव-
स्तथा दिष्टोपदिष्टियोः,संदेहात्कल्प्यते यत्र सविज्ञेयो विपर्ययः
विपश्चित्-विद्वान् १सूक्ष्मदर्शी । [वात्मत्वबुद्धिः
विपर्ययदुराग्रहः-अहं श्रोत्रियः पण्डितोऽहमिति देहेन्द्रियादा-
विपाकः-परिपाकावस्था १अन्यथाभूतस्यान्यरूपेण परिणामः
विपुलः-विशालः १विस्तीर्णः।विप्रकर्षः-बहुतरसंयोगान्तरितत्वं
विप्रतिपत्तिः-विपरीताबुद्धिः १संशयजनकवाक्यम् २ विरुद्धार्थ
(प्रतिपादकानेकवचनम ३)कवाक्यद्वयजन्यप्रतीतिद्वयम् ४विरु-
विप्रतिषेधः-तुल्यबलविरोधः । [द्धकोटिद्वयोपस्थापकः शब्दः
विप्रलयः-समूलनाशः।विप्रलापः-युगपत्परस्परविरोधेन कथनं
विप्रलिप्सा-अन्यथाप्रतीतस्यार्थस्यान्यथा (बोधयितुमिच्छा १)
विप्रवादः-विविधप्रलापः। [प्रतिपिपादयिषा प्रतारणा सा
विभक्ता-अन्नादेर्विभागकर्ता । विभक्तिः-पार्थक्यम् १ सुप्ति-
विप्लुतं-उपद्रुतम् । [ङित्येतदन्यतरप्रत्ययः
विभागः-रसोपादानहेतुः १प्राप्तिपूर्विकाऽप्राप्तिः*२परस्परा-
सङ्कीर्णव्याप्यधर्मकथनम् ३ संयोग (नाशको गुणः४) समा-
विभाकरः-प्रकाशकः । [नाश्रयत्वे सति संयोगनाशकः
विभुत्वं-सर्वदेशवृत्तित्वम् १सर्वमूर्तद्रव्यसंयोगित्वम् २ परमम-
विभ्रमणं-इतस्ततश्चलनम् । [हत्परिमाणवत्त्वं
विमनाः-विषण्णमनाः।विमतं-वादिप्रतिवादिनोर्विवादविषयीभूतं

विमर्शः-गर्भनिर्भिन्नबीजार्थो विलोभनकृतोपि वा,तस्य वाश्ले-
विमलः-निर्दोषः१निष्कपटः। [षसंयुक्तः स विमर्श इति स्मृतः
विमोहनः-मुग्धकारी।विरक्तः-अननुरक्तः१विषयवासनाशून्यः
विरलः-दूरस्थः१क्वाचित्कः। [२स्वस्वरूपातिरिक्तरतिरहितः
विरक्तिः-स्वेतरविषयेऽसारताबुद्धिः१विषयान्यकृष्यचित्तत्वम्
विरसः-अरुचिकरः१स्वादहीनः२प्रधानरसपोषकादिभावशून्यः
विरागः-इहामुत्र (फलभोगोपेक्षाबुद्धिः१)र्थभोगेष्वरुचिः ।
विराट्-ब्रह्माण्डशरीरम् १पञ्चीकृतपञ्चभूतकार्यसमष्टिस्थू-
लशरीरः२समष्टिस्थूल(प्रपंचाभिमानी३)सूक्ष्मकारणशरीरो-
विरामः-यतिः १ अन्तः २ विरमणम् । [पहितं चैतन्यं
विरुद्धहेत्वाभासः-साध्यार्थाभावनिश्चय इति बौद्धाः १ सा-
ध्यार्थं विनाभावनियमनिश्चय इति जैनाः२विपरीतव्या-
प्तिकः३साध्याभावव्याप्तो हेतुः४साध्यव्यापकीभूताभाव-
विरुद्धः-विरोधयुक्तः१एकाधिकरणावृत्तिः। [प्रतियोगित्वं
विरेचनं-मल(ोत्सर्गः१)ादेर्निःसारणम्। विरोचनः-रुचिकरः।
विरोधः-इष्टार्थभङ्गः१भ्रान्तिनिवृत्तिः२सहानवस्थानयोरेक-
देशे समावेशः३एकावच्छेदेनैक(त्रावर्तमानः४)ाधिकरणक-
विरोधनं-कार्यात्ययोपगमनं।विरोधी-विपरीतार्थकः [त्वाभावः
विलक्षणं-विशेष(णाश्रयः१)त्रासंयुतं।विलम्बः-प्रतीक्षणीयकालः
विलङ्घनं-नियमोल्लङ्घनम्।विलापः-क्रन्दनम् १परिदेवनोक्तिः।
विलासः-लीलाप्रदर्शनम् १समीहा रतिसंभोगार्था२खेलाकूर्द-
नादिमनोरञ्जनव्यापारः३रागरहितत्वे सति कार्योन्मुखी-
विलोकनं-नायिकानायकयोरन्योन्यदृष्टिमेलनम्। [भावत्वं
विलोचनः-विपरीतदृष्टिः। विलोभनं-गुणनिर्वर्णनम्। [परीतं
विवक्षा-वक्तुमिच्छा।विवरं-छिद्रम् १गूढस्थानम्।विलोमं-वि-

विवरणं-व्याख्यानग्रन्थव्याख्यानम् १तत्समानार्थकपदान्तरेण तदर्थकथनम् २पूर्वोच्चरितवाक्यस्योत्तरवाक्येनार्थकथनम्।
विवर्तः-अपवर्तनम् *१स्वरूपपरित्यागेन रूपान्तरप्रदर्शकः २ उपादानविषमसत्ताकत्वे सत्यन्यथाभावः। परिणामवारणाय सत्यन्तम् ३पूर्वावस्थानपायेऽवस्थान्तरापत्तिः ५ पूर्वरूपापरित्यागेनासत्यनानाकारप्रतिभास इति ग्रं० [कथनं
विवर्तवादः-अधिष्ठानस्वरूपमपरित्याज्य दोषवशाद्रूपान्तरेण
विवर्द्धनं-शरीरस्य भूयोभिरवयवैः संबन्धः।विवर्णं-विषमवर्णम्
विवशः-मृत्युकामी १कुतूहलपरवशः।विवसनं-देशान्तिःसरणम्।
विवादः-उच्चरवः १वाग्युद्धः २ विरुद्धो वादः ३ जनकलहाचर-
विवासः-निर्वासनम्। [णम् ४पक्षप्रतिपक्षपरिग्रहेण वदनं
विवाहः-विशिष्टं वहनं १भार्यात्वसंपादकं कर्म २सहधर्मचारिणी-
विविक्षुः-प्रवेष्टुमिच्छुः।विवित्सा-विषयान्वेत्तुमिच्छा [संयोगः
विविदिषा-वेदनेच्छा १सद्यः स्वतत्त्वसाक्षात्कारकारणैकपरायणत्वं जनयत्स्वचित्तवृत्तिः। मुमुक्षोरष्टाङ्गयोगैकतत्परत्वं जनयन्त्यां वृत्तौ व्यभिचारवारणाय सद्य इति पदम्, साक्षात्कारतदिच्छयोः क्रमाद्बोधयितुं स्वपदद्वयम्,अद्वैतब्रह्मेतरवस्तुप्रत्यक्षहेतुतादृग्वृत्तावतिव्याप्त्यभावार्थं तत्त्वेति, साक्षात्कारस्थले ज्ञानेत्युक्तौ परोक्षज्ञानकारणनिरुक्तवृत्तावतिप्रसङ्गस्तद्वारणाय साक्षात्कारेति,तथा करणस्थले हेतुपदनिवेशे कर्मणां शान्त्यादीनामपि बहिरङ्गान्तरङ्गहेतुत्वेन तादृक्स्थले व्यभिचारपरिहारार्थं करणेति, एकपदं लौकिकव्यापारान्तरव्युदासाय, परायणपदं वैदिककर्मरत्यभावार्थम्,जनयदिति प्रतिबन्धराहित्यार्थम्,चित्तेति पराभिमता-
विविदिषुः-विवित्सुः। [त्मधर्मेच्छाव्यावृत्यर्थं

विविदिषासंन्यासः-विवेकादिसाधनसंपन्नेन तत्त्वज्ञानमुद्दिश्य क्रियमाणः संन्यासः । [जन्मापादककर्मत्यागः
विविदिषासंन्यासजातरूपधरः-औत्पत्तिकं रूपमपरित्यज्य
विविधः-नानाप्रकारः* १ प्रथमादीनां विभक्तीनां विभक्तः।
विवृतः-सावधानः १प्रकाशितः। विवृतिः-विस्तारः १व्याख्यानं
विवेकः-संशयोन्मूलनम् १नित्यानित्यवस्तुवि(चारः२)वेचनं ३
विवेकी-अग्रमतिकः १विचारशीलः [संदेहानंतरं जायमान ऊहः
विशास्त्रः-शास्त्रश्रवणशून्यः। विशालः-आदर्शः १विस्तीर्णः ।
विशिष्टः-विलक्षणः १विशेष्यविशेषणसंवन्धावगाहिज्ञानसंवन्धी
विशिष्टाद्वैतं-द्वैतविशिष्टमद्वैतम् १विशिष्टञ्च(व्याकृतनामरूपविशिष्टं चिदचिद्)विशिष्टञ्च(अव्याकृतनामरूपविशिष्टं च चिदचिद्) विशिष्टे,तयोरद्वैतम् २सूक्ष्मचिदचिदात्मकशरीरविशिष्टस्य कारणस्य परमात्मनः, स्थूलचिदचिदात्मकशरीरविशिष्टस्य कार्यस्य परमात्मनश्चैक्यम् ३विशिष्टं युक्तं
विशीर्णः-जरावस्थापन्नः । [मिलितमद्वैतं
विशुद्धः-विनम्रः १कलङ्कशून्यः।विशुद्धात्मा-विगतक्रोधचित्तः।
विशेषः-अल्प(तरविषयः १)व्यापकः २स्वतो व्या(वृत्तः ३)वर्तकः ४निःसामान्यत्वे सत्येकमात्रसमवेतः।गुणादावतिव्याप्तिवारणाय सत्यन्तम्, सामान्यवारणायैकमात्रेति ५अन्त्यव्यावर्तकत्वे परमसीमावृत्तित्वे वा सति नित्यद्रव्यमात्रवृत्तित्वम्।
विशेषणं-विशेष्यधर्मः १विद्यमानं सदुपस्थापकम् २ प्रत्याय्यव्यावृत्त्यधिकरणतावच्छेदकम् ३स्वकालनियतव्यावृत्तिबोधजनकमित्यद्वैतरत्नरक्षणे ४ कार्यान्वयित्वे सति कार्यकाले नियमेन वर्तमानत्वे सति व्यावर्तकम्, यथा नीलरूपादिकं घटस्य ५ प्रतीयमानवैशिष्ट्यप्रतियोगित्वम् ६सिद्धान्वहून्प्र-

धानार्थानुक्त्वा यत्र प्रयुज्यते, विशेषयुक्तं वचनं ज्ञेयं तद्वि-
विशेषणम्७तद्द्विविधं, केवलविशेषणं लक्षणरूपविशेषण-
ञ्च। सजातीयमात्राद्व्यावर्तकं केवलम्, स्वेतरकृत्स्नव्याव-
विशेषकः-इतरव्यावर्तकधर्मः। [र्तकं लक्षणरूपं
विशेषज्ञः-अधिकज्ञानशाली जनः१दिक्कालाद्यानुकूल्याभिज्ञः।
विशेषाहङ्कारः-ब्राह्मणोऽहं क्षत्रियोहमित्याद्यभिमानात्मिका
विशेषोक्त्यलङ्कारः-सत्यपि कारणे कार्याभावः। [चित्तवृत्तिः
विशेष्यः-विशेष्यताश्रयः १ भासमानवैशिष्ट्यानुयोगित्वम्।
विशेषणविशेष्यभावसंबन्धः-मिथो विशेष्यविशेषणयोरनुलोम-
प्रतिलोमतया विशेष्यविशेषणत्वे२यत्किंचिन्निष्ठविशेषणता-
निरूपितविशेष्यता,यत्किंचिन्निष्ठविशेष्यतानिरू०विशेषणता।
विश्रामः-विरामः१श्रमापनयनम्२प्रवृत्तव्यापारस्यावसानम्।
विश्लेषः-संसर्गपूर्वको विभागः। विश्वकर्मा-सकलशिल्पाचार्यः
विश्वं-चराचरम्। [स्थूलसूक्ष्मकारणशरीरत्रयोपहितं चैतन्यं
विश्वजीवः-जागरे व्यष्टिस्थूलशरीराभिमानी जीवः१व्यष्टि-
विश्वम्भरः-विश्वं बिभर्तीति। विश्वस्तः-निर्भयः १ जातवि-
विश्वव्यसनं-गृहक्षेत्रादिसंपादनेच्छाहेतुर्व्यसनम्। [श्वासः
विश्वासः-वञ्चकत्वाभावसंभावना१निर्दोषत्वेनाभिमानो वा
विश्वासघातकः-कृतविश्वासस्यापकर्ता।विषं-गरलम्१कालकूटं
विषमः-विद्वेषकर्ता१उभयबहिरर्धः२स्वशक्त्यसाध्यः३विरूप
विषमहृदयः-दुष्टमनस्कः। [(सङ्घटनम्४)कार्योत्पत्तिः
विषयः-पदवाच्यः१प्रस्तुतोर्थः२संविन्निरूपकः३ज्ञाने स्वाका-
रसमर्पको वा४शास्त्रजप्रमानिवर्त्याज्ञानगोचरः५ जीवब्र-
ह्मणोरेकत्वलक्षण इति वे०६बाह्यान्तरकरणशक्तिव्यापार
इति सां०७ज्ञायमानभोगोपयोगी८शरीरेन्द्रियभिन्नत्वे सति

जन्यत्वे सति साक्षात्परम्परया वोपभोगसाधनम्। शरीरादावतिव्याप्तिवारणाय सत्यन्तम्,कालादिवारणाय जन्यत्वे सतीति,शशशृङ्गपरमाण्वादिवारणाय विशेष्यदलम्९विशब्दश्च विशेषार्थः सिनोतिर्बन्धनार्थकः, विशेषेण सिनोतीति

विषयचैतन्यः-विषयावच्छिन्नं चैतन्यम्। [विषयोर्थनियामकः

विषयगतपरोक्षता-योग्यविषयस्यानावृतसंवित्तादात्म्याभावः

विषयता-ज्ञानविषयातिरिक्तज्ञानादिनिरूपितधर्मविशेषः ।

विषयप्रत्यक्षं-इन्द्रियजन्यज्ञानविषय इति नै० १ज्ञानाकारार्पणक्षमो हेतुः। चक्षुरादिवारणायाकारसमर्पकत्वविशेषण मिति सौगताः२प्रमातृचैतन्यसत्तातिरिक्तसत्ताशून्यम् ३तत्तदर्थस्य स्वव्यवहारानुकूलचैतन्याभेदः ४स्वव्यवहारानुकूलचैतन्येन सह विषयस्याभेद इति ग्रं० ५योग्यवर्तमानविषयचैन्याभिन्नप्रमाणचैतन्यविषयः । [विधायकं वाक्यं

विषयवाक्यं-सिद्धान्तितार्थतात्पर्यकम् १ विचार(ार्ह वाक्यम् २)

विषयवासना-शब्दादिविषयाणां भुज्यमानत्वदशाजन्यः संस्कारः । [भिव्यङ्ग्य आनन्दः

विषयानन्दः-तत्तत्स्रक्चन्दनवनितादिविषयाकारैकाग्रबुद्ध्य-

विषयासक्तिवर्तमानप्रतिबन्धः-विषयसेवने साभिनिवेशप्रवृत्तिः

विषयी-विषयासक्तः१शास्त्रानुसारैहिकविषयभोक्तृत्वे सत्यामुष्मिकार्थकर्मकर्ता२विषयिताश्रयः३विषय(तानिरूपकः४) निष्ठावरणनिवर्तक इति ग्रं०५ विषयावभासकचैतन्यम् ।

विषादः-इष्टनाशजन्यमनोभङ्गः। विष्कम्भकः-पूर्वकथासंक्षेपः

विष्णुः-सर्वपालकः १ व्यापनशीलः२रजस्तमोगुणोपसर्जनक-

विसर्गः-विश्रावः१विसर्जनीयः। [सत्त्वावच्छिन्नचैतन्यं

विसर्जनं-निर्वासनम् १प्रतिमाऽऽद्यवच्छेदेनाभिव्यक्त्यनुसंधानं

विसंज्ञः-विवेकरहितः। विसर्पी-प्रसरणशीलः। विस्पष्टं-बोधगम्यं
विसंवादः-विप्रलम्भः १अन्यथास्थितस्यार्थस्यान्यथाकथनम् २
प्रमाणा(न्तरेण बाधः३)नुसरणाभावः। [मणिबुद्धिः
विसंवादिभ्रमः-निष्फलप्रवृत्तिजनको भ्रमः, यथा दीपप्रभायां
विस्मयः-नष्टगर्वः १अपूर्ववस्तुदर्शनादिजन्यो मानसोल्लासः।
विस्मितः-जातरोमाञ्चः १ विस्मयापन्नः। विस्मृतः-विस्मृतिः
विहारं-क्रीडास्थानम्। [युक्तः १अनुसंधानरहितः
विहितं-विधेयम् १धर्मोपादकं कर्म, यथाग्निहोत्रादि २इष्टसा-
विहेठकः-अपकारकः। [धनत्वेन वेदबोधितं
विह्वलः-परवशः १व्याकुलः २मतिभ्रष्टः ३बाह्येन्द्रियचलनशून्यः
वीतमलः-मलसंसर्गरहितः। वीतरागः-विरक्तचित्तः १अपगत-
वीतानुमानं-अन्वयमुखेन प्रवर्तमानं विधायकमनुमानम्[स्नेहः
वीरः-अतिक्रान्तः १शत्रुनिवारणः। वीर्यशाली-दृढपराक्रमी।
वीर्यं-उत्साहः १ मज्जासारः २ फलनिष्पत्तिपर्यन्ता शक्तिः।
वीर्यपणं-ब्रह्मचर्यादिसाधनसाध्यम्। वृकः-हिंस्रपशुः।
वृत्तं-वर्तुलम् १परि(पाकः २)चर्या ३सच्चरित्रम् ४ शिष्टाचारः।
वृत्तिः-आजीविका १लाभोपायः २नम्रताव्यवहरणम् ३परार्था-
भिधानम्*४सूत्रार्थमात्रप्रतिपादकग्रन्थः ५सूत्रघटकपदनिष्ठ-
शक्तिप्रकाशिकेति ग्रं० ६शक्तिलक्षणान्यतरात्मकः संबन्धः ६
शाब्दबोध (नुकूलस्मारकत्वप्रयोजकमूलसंबन्धः ८) हेतुप-
दार्थोपस्थित्यनुकूलः पदपदार्थयोः संबन्धः ९ विषयचैतन्या-
भिव्यञ्जकोऽन्तःकरणाज्ञानयोः परिणामविशेषः। क्रोधा-
दिवृत्तावतिव्याप्तिवारणाय विषयचैतन्याभिव्यञ्जक इति,

१व्यावहारिकघटपटाद्यर्थाकाराऽन्तःकरणस्य परिणामात्मिका वृत्तिः, प्र-
तिभासिकशुक्तिरजताद्यर्थाकारा त्वज्ञानस्य परिणा० वृत्तिरिति विभागः।

चक्षुरादौ विषयचैतन्याभिव्यञ्जकेऽतिव्याप्तिवारणार्थमन्तः-
करणाज्ञानयोः परिणामविशेष इति। [नाधीनज्ञानविषयः
वृत्तिविषयः-शक्तिलक्षणाकृत्तद्धितान्तसमासानामन्यतमज्ञान-
वृत्तिव्याप्तिः- } विषयस्य स्वाकारवृत्त्या संबन्धः १ वृत्तिवि-
वृत्तिव्याप्यत्वं } षयत्वम् २ वृत्त्युपहितचेतनविषयत्वम् ३
विशिष्टशब्दादिप्रमाणबलात्तत्तद्विषयाकारधीसमुन्मेषाभि-
वृत्त्यनुप्रासः-स्वरवैषम्येपि तुल्यशब्दरचना। [व्यक्तत्वं
वृत्तिभङ्गः-वृत्तेर्भङ्गः१नष्टवृत्तिः। वृत्रः-शत्रुः१अन्धकारः।
वृथालापः-आध्यात्मिकीं कथां मुक्त्वा भिक्षायाच्ञा सुरस्तुतिं,
वृथावादी-मिथ्याभाषी[अनुग्रहं पथिप्रश्नं वृथाजल्पोन्य उच्यते
वृद्धः-जर्ज्जरीभूताङ्गः१षष्टिवर्षात्परम्।वृद्धा-वर्षयौवना स्त्री
वृद्धिविकारः-अवयवोपचयः१संवर्धनावस्था। [१कन्यासंताना
वृषः-महोक्षः१धर्मप्रधानः। वृहस्पतिः-बुद्धेर्यधिष्ठातृदेवता।
वेगः-कामस्य प्रबलेच्छा*१क्रियाजन्यः क्रियाहेतुः संस्कारः।
गुरुत्वादिवारणाय क्रियाजन्येति,विभागादिवारणाय क्रि-
वेगितः-संजातवेगः। वेणी-त्रिधाविभागवद्धकेशः। [याहेतुः
वेतालः-भूताधिष्ठितशवः। वेत्ता-ज्ञाता१वेदिता। वेत्तुं-लब्धुं
वेदः-मन्त्रब्राह्मणात्मकः१मीनशरीरावच्छिन्नभगवद्वाक्यम्२ब्र-
ह्ममुखनिर्गतधर्मज्ञापकशास्त्रमिति पौराणिकाः३संप्रदाया-
नुसारेण स्वरादिविशिष्टा या वर्णानुपूर्वीपरिपाटी सः४इष्ट-
प्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति
सः। अलौकिकपदेन प्रत्यक्षानुमाने व्यावर्त्येते इति सायण-
भाष्ये ५ धर्मब्रह्मप्रतिपादकमपौरुषेयं प्रमाणवाक्यम्। भार-
तादावतिव्याप्तिवारणायापौरुषेयमिति, आत्मादौ तद्दोष-
वारणाय वाक्यमितीति प्रस्थानभेदे ६ शब्दतदुपजीविप्रमा-

णातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्य-
वाक्यार्थज्ञानाजन्यप्रमाणशब्दः । व्यासादिचाक्षुषजन्ये भा-
रतादौ दृष्टार्थकायुर्वेदादौ चातिव्याप्तिवारणाय सत्यन्तम् ७
विदिताखिलशास्त्रार्थसर्वधर्मनिरूपणात्, दर्शनानां प्रमाणत्वा-
द्वेद इत्यभिधीयते ८ विद्यन्ते, ज्ञायन्ते, लभन्ते वा एभिर्धर्मा-
दिपुरुषार्था इति वेदाः । [कस्य वेदस्याप्रामाण्यकर्ता
वेदनिन्दकः-नास्तिकः १अतोन्यदार्तमिति तदनित्यत्वप्रतिपाद-
वेदपारगः-समस्तवेदाभिज्ञः । वेदाधिगमः-वेदाध्ययनम् ।
वेदवचनं-प्रमाणान्तरविषयातीतविशिष्टार्थावबोधकं वचनम्।
वेदाङ्गत्वं-वेदोपकारकत्वम् १वेदार्थप्रकाशकत्वम् । [भागः
वेदान्तः-जीवब्रह्माभेदबोधकवाक्यम् १ वेदानामन्तोऽवसान-
वेदान्तविद्या-अध्यात्मशास्त्रम्॥ वेदान्ती-वेदान्ततत्त्वनिष्ठः ।
वेदिः-ज्ञाता १वेदपूजास्थानम् २यज्ञार्थपरिष्कृतभूमिः ३गृहोप-
वेद्यः-ज्ञेयः १वेदप्रतिपाद्यः २वेदाध्येतृत्वम् । [करणविशेषः
वेमा-वायदण्डः । वेला-जलोद्रेकः १कालोपदेशः [रः १)भोगः
वेश्या-वित्तमात्रोपाधिप्रकटितानुरागवती। वेषः-कृत्रिमा(का-
वैक्लव्यं-निष्पौरुषत्वम् १ कातर्यपीडनम् २ परदुःखैर्विक्लवता
वैखरीवाक्-वाक्यशक्तिः १ मौखिकवाग्वभिव्यङ्ग्यः सर्वश्रु-
तिगोचरः स्थूलः शब्दः । [ग्निहोत्रादिकर्मकर्ता
वैखानसः-वानप्रस्थः १ग्रामबहिष्कृताकृष्टपच्यौषधिकरणका-
वैजयन्तीमाला-पञ्चवर्णपुष्पैर्ग्रथिता माला १नानापुष्पपत्रर-
वैजात्यं-विजातीयता १जातिबहिष्कारः । [चनामयी माला
वैडालव्रतं-प्रकाशे धर्माचरणं गुप्ते पापाचरणम् १ यस्य धर्म-
ध्वजो नित्यं शक्रध्वज इवोच्छ्रितः, प्रच्छन्नानि च पापानि
वैतालिकः-वन्दिजनः १मङ्गलपाठकारी। [वैडालं नाम तद्व्रतं

वैदग्ध्यं-सौन्दर्यम् १निपुणता। [ल्पवृत्तिर्वा रीतिरिष्यते
वैदर्भी-माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका, अवृत्तिर-
वैदिकः-वेदप्रतिपाद्यार्थविरुद्धार्थप्रतिपादकः।वैदुष्यं-पाण्डित्यं
वैदिकवाक्यत्वं-ईश्वरोक्तत्वे सत्यर्थबोधकपदसमूहत्वम् ।
वैदेहकः-वैश्यात् ब्राह्मणीजातः १वैश्यायां शूद्रादुत्पन्न इति ग्रं०
वैद्यः-आयुर्वेदकृताभ्यासः सर्वेषां प्रियदर्शनः, आर्यशीलगुणो-
वैनाशिकः-बौद्धागमाभिज्ञः। [पेत एष वैद्योऽभिधीयते
वैधर्म्यं-विरुद्धो धर्मः १असाधारणधर्मत्वम् २विभिन्नधर्मवेत्तृत्वं
वैधर्म्यदृष्टान्तः-एकधर्म्यसमावेशो दृष्टान्तः। वैभवं-विभुत्वं
वैयधिकरण्यं-भिन्नविभक्त्यन्तानां पदानां विभिन्नार्थनिष्ठत्वं
वैयात्यं-निर्लज्जता १ अप्रतिसमाधेयप्रश्नपरम्परायां मौनम् ।
वैरं-विद्वेषः १ परस्परविरोधः २ आजन्मानिष्टमनस्कत्वम् ।
वैरपुरुषः-वैरप्रियः पुरुषः । वैरक्त्यं-विषयवासनाराहित्यम्।
वैरशुद्धिः-वैरप्रतीकारः। [स्पृहाविरोधिचित्तपरिणामविशेषः
वैराग्यं-विष (येषु जिहासा १) यवैतृष्ण्यम् २ दृष्टादृष्टविषयेषु
वैराग्यकारणं-विषयेषु दोषदृष्टिः १ शरीरं व्रणवत्तद्यदन्नं च
व्रणलेपनम्,व्रणशोधनवत्स्नानं वस्त्रं च व्रणपट्टवदित्यादिभावनं
वैराग्यकार्यं-पुनराशाभावः। वैराग्यावधिः-ब्रह्मलोकतृणीकारः
वैरानुबन्धः-वैरपूर्वकानुस्मरणं।वैरूप्यं-कुरूपता १वस्तुविकारः
वैरी-बद्धवैरः १ प्रतिद्वन्द्वी।वैशारद्यं-आत्मनः पौरुषप्रतिपादनं
वैशिष्ट्यं-विलक्षणता १विशेष्यविशेषणयोः संबन्धविशेषः ।
वैशेषिकः-सप्तपदार्थानुसारिन्यायज्ञः। [कृत्य कृतं शास्त्रं
वैशेषिकशास्त्रं-कणादप्रणीतं शास्त्रम् १विशेषं पदार्थभेदमधि-
वैश्यः-वैश्यायां वैश्यादुत्पन्नः १कृषिगोरक्षवाणिज्यादिस्वाभा-
विककर्मसंपन्नः।वैश्यब्राह्मणः-लोककर्मसुनिरतः पशूनां परि-

पालकः, वाणिज्यकृषिकर्ता च स विप्रो वैश्य उच्यते ।
वैश्यविद्वत्संन्यासः-'क्षत्रियविद्वत्संन्यास'वदस्य लक्षणमनुसंधेयं
वैश्वदेवः-विश्वदेवसंबन्धी होमः । [मानो बलिः
वैश्वदेवबलिः-अग्निपितृगोश्वकाकादिभ्यो मन्त्रविशेषेण दीय-
वैश्वानरः-वह्निः१चेतनशक्तिः२'विराड्' वदस्य लक्षणमनुसंधेयं
वैष्णवः-विष्णुमन्त्रोपासकः१वैखानसाद्यागमोक्तदीक्षायुक्तः ।
वैष्णवीमाया-संसारनिर्वाहयित्री। वौषट्-देवोद्देश्यकहविस्त्यागः
व्यक्तं-इन्द्रियग्राह्यम् । व्यक्तिः-पदार्थ(ाभिव्यक्तिः१)मात्रम् ।
व्यङ्गः-हस्ताद्यवयवहीनः।व्यचः-व्याजीकरणम् । [बोधनं
व्यङ्ग्यः-व्यञ्जनाविषयः१व्यञ्जनया बोध्योर्थः२व्यङ्ग्यभावेन
व्यञ्जकः-व्यञ्जनोपाधिकः१ व्यञ्जनयार्थबोधकः शब्दः१स्व-
विषयेस्ति प्रकाशने इत्यादिव्यवहारप्रतिबन्धकमात्रापनेता।
व्यञ्जनं-अर्धमात्रकम् १अन्नोपकरणम् २ स्त्रीपुंसयोरशुद्धदेशः ।
व्यञ्जना-शक्तिलक्षणाद्यजन्यप्रतीतिजनकशब्दनिष्ठो व्यापारः ।
व्यतिकरः-परस्परविषयगमनम्।व्यतिक्रमः-असत्कर्म १विपर्ययः
व्यतिरेकः-परस्परमर्थानागमनम् १यदभावे यदभावः, यथा यत्र
यत्र सर्वप्राणिहिंसनशीलत्वे सति पशुत्वाकृतिविशिष्टा काचन
व्यक्तिर्न भवति तत्र तत्र सिंहप्रत्ययोपि न भवति २साध्याति-
भावस्य साधनाभावेन व्याप्तिः। [रेकेणावधार्यं तज्जिहासा
व्यतिरेकवैराग्यं-चित्तगतदोषाणां मध्ये पक्वेभ्योऽपक्वान्व्य-
व्यतिरेकदृष्टान्तः-निश्चितसाध्याभावहेत्वभाववान्दृष्टान्तः ।
व्यतिरेकव्यभिचारः-कारणाभावे कार्यसत्त्वम् १ कार्याधिकर-
व्यतिषङ्गः-परस्परसंबन्धः। [णवृत्त्यत्यन्ताभावप्रतियोगित्वं
व्यतिरेकव्याप्तिः-हेत्वभावसाध्याभावयोर्व्याप्तिः १ साध्या-
भाव (पुरःसरत्वम् २) व्यापकीभूताभावप्रतियोगित्वम् ।

व्यतिरेकसहचारः-कारणाभावे कार्याभावः। व्यथकः-पीडाका-
व्यतिरेकालङ्कारः-उपमानादुपमेयस्याधिक्यवर्णनम्। [रकः
व्यतिरेक्यनुमानं-व्यतिरेकव्याप्तिविशिष्टहेतुकानुमानम् ।
व्यतिहारः-परस्परैकक्रियाकरणम्। [विवारेण स उच्यते
व्यतीपातः-श्रवणाश्विधनिष्ठाद्रानागदैवतमस्तकैः, अमा चेद्र-
व्यधिकरणं-विशेष्यभिन्नाधिकरणकम् १ तदधिकरणावृत्तित्वं
व्यपदेशः-सामर्थ्यविशेषः १अवयवार्थापेक्षणम् २आकाङ्क्षादि-
वशात्पदानां परस्परसंबन्धः ३ परस्परनिरूप्यनिरूपकभावा-
पन्नविषयताप्रयोजकत्वे सत्येकार्थोपस्थितिजनकत्वमिति ग्रं०
व्यभिचारः-धर्मातिक्रमः १साध्याभाववद्वृत्तित्वम् । [त्रवृत्तिः
व्यभिचारी-क्वचित्सत्ताकः १साध्यवज्जातीयवृत्तित्वे सत्यन्य-
व्यभिचारिणी-असती १ भ्रष्टाचारिणी स्त्री २जारसमूहगामिनी ।
व्ययः-नाशः १वित्तसमुत्सर्गः । [क्लृप्तधर्मान्तरघटितः
व्यर्थः-विफलः १प्रकृतोपयोगरहितः २स्वसमानाधिकरणावश्य-
व्यवकलनं-वियोजनम् १हीनतासंपादनं।व्यवच्छेदः-पृथक्करणं
व्यवसायः-प्राथमिकज्ञानम् १विषयविषयकज्ञानम् २ ज्ञानवि-
षयीभूतं ज्ञानम् ३करणीयार्थविषयकनिश्चयः ४ प्रतिज्ञाहेतु-
व्यवधानं-द्रव्यान्तरेण द्रव्यान्तरस्याच्छादनम् [संश्लिष्टं वाक्यं
व्यवधायकः-व्यवधानकर्ता[यन्निश्चितं तन्निश्चितमेवेति दृढविचारः
व्यवसायबुद्धिः-निश्चयात्मिका बुद्धिः १यद्भवेत्तद्भवतु मया तु
व्यवस्था-प्रबन्धः १विषयान्तरपरिहारेण विषयविशेषस्थापनं
व्यवहारः-व्यवसायः १ व्यवह्रियते हानोपादानादिकं क्रिय-
तेऽनेनेति २कथनप्रतीत्यात्मकः ३कार्यानुकूलशब्दप्रयोग इति
ग्रं० ४ भाषोत्तरक्रियानिर्णायकः ५ वादिप्रतिवादिकर्तृकः
संभवद्भोगस(ाक्षि)त्वप्रमाणको विरोधकोटिव्यवस्था-

नानुकूलो व्यापार इति मदनरत्ने ६ विनानार्थेऽव संदेहे
हरणं हार उच्यते, नानासंदेहहरणाद्व्यवहार इति स्मृतः।
व्यवहारी-क्रयविक्रयरूपेण व्यापारेण जीवनः। [द्विविषयः
व्यष्टिः-पृथक्पृथगवभासमानः पदार्थः १ प्रत्येकवृक्षवदनेकबु-
व्यसनं-प्रक्षेपः१भ्रंशनम्२दुःखदानम् ३ लाम्पट्यम् ४ इष्टानि-
व्यसनार्तः-दुःखेन पीडितः। [ष्टवस्तुविषयं चित्तसंलग्नं
व्यसनी-द्यूतमद्यादिहीनकर्मरतः।व्यस्तः-प्रक्षिप्तः१पृथक्पृथक्ता
व्याकरणं-साधुशब्दव्याख्यानम् १ व्याक्रियन्ते व्युत्पाद्यन्ते
शब्दा यस्मिंस्तत्२प्रत्ययविधानसामर्थ्यादर्थनिश्चयः३अर्थ-
विशेषमाश्रित्य स्वरप्रकृतिप्रत्ययादिविशेषादीन्विदधत्पद-
खण्डार्थविशेषज्ञापको ग्रन्थः। [माभूमेत्यध्येयं व्याकरणं
व्याकरणप्रयोजनं-वैदिकपदसाधुत्वज्ञानेनोहादिकम् १ म्लेच्छा
व्याकृतः-प्रकाशितः। [त्मकशब्दसमूहरूपो ग्रन्थविशेषः
व्याख्या-वक्तृता१स्फुटार्थप्रत्ययानुकूलो व्यापारः २ विवरणा-
व्याख्यानं-विशिष्टमाख्यानम् १फलमाहात्म्योपासनप्रकारादि-
कथनम्२पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना, आक्षेपस्य
व्याख्याता-व्याख्यानकर्ता। [समाधानं व्याख्यानं पञ्चलक्षणं
व्याघातः-प्रतिवादः १ विरुद्धसमुच्चयः२परस्परविरुद्धधर्मयो-
रेकाधिकरणे समुच्चयः३असंबद्धार्थकवाक्यम्४यावज्जीव-
महं मौनी ब्रह्मचारी च मे पिता, माता तु मम वन्ध्याऽऽसीद-
व्याख्याता-वर्णनकर्ता। [पुत्रश्च पितामहः
व्याजः-विभवाभावः * १ अन्यफलसाधनतया स्वेष्टस्यान्यफ-
व्याजनिन्दा-अपदेशनिन्दा। [लसाधनत्वेन ज्ञापितस्याचरणं
व्याजी-तुलामानान्तरं हस्तपूरणमुत्कारः। व्याघ्रः-हिंस्रः।
व्याजोक्तिः-असत्यस्य सत्यत्वे वचनम्१उद्भिन्नवस्तुनिगूहनं

व्याधिः-धातुक्षोभः१ देहव्यथा।व्याधितः-व्याधियुक्तः। [बन्धः
व्यानः-विष्वग्गामी १नाडीसहस्रसंचारी वायुः । व्यानतं-रति-
व्यापकः-सर्वसंबद्धः १ देशाद्यन्तरहितः २ सजातीयविजातीय-
स्वगतभेदशून्यः * ३ व्याप्तिनिरूपकः४स्वाधिकरणवृत्तिभे-
दप्रतियोगितानवच्छेदकः ५ हेतुसमानाधिकरणात्यन्ताभा-
व्यापादः-द्रोहचिन्तनम्। [वाप्रतियोगित्वं६अधिकदेशवृत्तित्वं
व्यापारः-सहायः१सूत्रधारवृत्तिः * २ तज्जन्यत्वे सति तज्ज-
न्यजनकः, यथा कुठारदारुसंयोगः। ईश्वरेच्छादिवारणाय
सत्यन्तम्, दण्डरूपादिवारणाय तज्जन्यजनक इति ३पदान्त-
रसमभिव्याहाराप्रयोज्यसाध्यत्वप्रकारकाभिधानविषयः ।
व्यापारी-क्रयविक्रयिकः। व्यापृतः-स्थापितः १ कृतव्यापारः ।
व्याप्तिः-व्यापनम् १साहचर्यम् २निखिलहेत्वधिकरणनिष्ठसा-
ध्यसामानाधिकरण्यम् ३साध्यसाधनयोरव्यभिचरितसंबन्धः
व्याप्यत्वं-न्यूनदेशवृत्तित्वम् * १साध्यवदन्यावृत्तित्वे सति व्या-
प्त्याश्रयत्वम्। [त्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वं
व्याप्यवृत्तित्वं-निरवच्छिन्नवृत्तिकत्वम् १स्वसमानाधिकरणा-
व्यामः-हस्तचतुष्टयम् । व्यायतः-संमिलितः१अतियत्नशाली ।
व्यायामः-स्वास्थ्योन्नतिसंपादनार्थं विधिपूर्वकमङ्गसंचालनम्
व्यालः-नृशंसः१दुष्टगजः * २ कञ्चुकालुः । [मापकं
व्यावर्तकलक्षणं-लक्ष्यवृत्तित्वे सतीतरभेद(व्याप्यत्वम् १)नु-
व्यावहारिकः-व्यवहारकालेऽबाध्यमानः१आगन्तुकदोषासह-
कृताविद्याकार्यः२ब्रह्मज्ञानपूर्वाबाधितत्वे सत्यात्मज्ञानोत्त-
व्यावहासी-पारस्परिकोपहासकर्ता। [रसत्तास्फूर्तिशून्यः
व्यावृत्तिः-प्रतिषेधः१बहिष्करणम् २तत्तद्धर्मावच्छिन्नेतरभेदः।

---

१ कारकेण जन्यत्वे सति तत्कारकजन्यक्रियां प्रति जनक इत्यर्थः ।

व्यावेधनं-परबलस्य विविधव्यधोत्पादनम्।व्यावृतः-निवृत्तः १-
व्यावेशनं-परबलस्यान्तः प्रविश्य विक्षोभणम्। [मनोनीतः
व्यासः-पुराणेतिहासादेः स्रष्टा। व्याहतं-व्याघातयुक्तम्।
व्यासङ्गः-कार्यान्तरत्यागेनैकपरत्वम्। व्यासिद्धः-निषिद्धः।
व्यासज्यवृत्तित्वं-एकत्वानवच्छिन्नपर्याप्तिकत्वग् १एकमात्र-
व्याहारः-शब्दप्रयोगः। [वृत्तिधर्मावच्छिन्नपर्याप्तिमत्त्वं
व्युत्क्रमणं-क्रमविपर्यासः १पृथगवस्थानम्। व्युष्टिः-समृद्धिः।
व्युत्पत्तिः-विग्रहवाक्यम् १शक्तिग्रहजन्यसंस्कारः २शब्दानामर्था-
ववोधकशक्तिः ३समुदायशब्दस्यावयवशोऽर्थवोधकताशक्तिः
व्यूहः-बलविन्यासः १सेनास्कन्धनिवेशः २व्यवहाररचनाकौशलं
व्रणं-क्षतम् १गात्रविचूर्णनम्। व्रणविरोपणं-स्फोटकप्रशमनम्।
व्रतं-नियमाभिधानम् १ क्रियाविषयको नियमः २दीर्घकालानु-
पालनीयसङ्कल्पः ३सम्यक्सङ्कल्पजनितानुष्ठेयक्रियाविशेष-
व्रती-तपस्वी १ब्रह्मच।री २व्रतधारी। [रूपमिति हेमाद्रौ
व्रीडा-विनम्रता १असामर्थ्यवचननिमित्ता। ☞ श
शकुनं-भाविशुभाशुभसूचकनिमित्तम्। शकुनज्ञः-निमित्तज्ञाता
शक्तः-समर्थः १द्योतकः २शक्त्याश्रयः ३ शक्तिसंपन्नः ४ विरो-
धशमनकर्ता ५कार्योत्पादनयोग्यः। [र्थनीयः ३)गृहीतः
शक्तिग्राहकः-वृत्तिपरिच्छेदः १व्युत्पत्तिग्राहकः २ शक्ति(सम-
शक्तिः-पराक्रमः १विरोधशमनम् २हस्तक्षेप्यो लोहदण्डः ३अ-
र्थवोधजनिकेति वै० ४क्रियायाः पूर्वपरावस्थेति सां० ५सङ्के-
तग्रहजन्यग्रहविषय इति मी० ६अस्मात्पदादयमर्थो वोद्धव्य
इ(त्यनादिसङ्केतः ७)तीश्वरेच्छेति नै० ८ कार्यजननानुकूलं
कारणनिष्ठं सामर्थ्यमिति वे० [योर्वाच्यवाचकभावसंबन्धः
शक्तिवृत्तिः-पदानामन्वयानुभवजननसामर्थ्यम् १ पदपदार्थ-

शक्तिवैकल्यं-निर्बलता । शक्नुः-मधुरभाषी १ प्रियंवदः ।
शक्यः-क्रियासंभवः १पदनिष्ठशक्तिविषयः । शङ्का-वितर्कः ।
शङ्कापाशः-ब्रह्मात्मतत्त्वज्ञानं मया संपादितं ममानर्थनिवारकं
भविष्यति न वेत्यादिरूपः, ब्रह्मज्ञानाद्यर्थप्रवृत्तौ प्रतिबन्धकः
शङ्कुः-शाखादिविहीनस्तरुः । शङ्कितः-संदिग्धः १ अविश्व-
शङ्खिनीनाडी-नाभिनाडी । शठबुद्धिः-कुटिलबुद्धिः। [सितः
शठः-संक्लेशकः १सर्वत्र वक्रः २सत्यपि सामर्थ्ये दारिद्र्यव्यञ्ज-
कः ३कामिनीविषयकपटपटुः ४ प्रियं व्यक्तिपरोऽन्यत्र विप्रियं
कुरुते भृशम्, व्यक्तापराधचेष्टश्च शठोऽयं कथितो बुधैः ।
शठोदर्कं-शाठ्यपर्यवसानम्।शण्ढः-नपुंसकः। [किनी गदा
शतघ्नी-चतुर्हस्(ता लोहकण्टकसंयुक्ता १)तप्रमाणा लोहकण्ट-
शत्रुः-विजयी १नित्यापकारी।शनिवारः-शनिस्वामिको वारः ।
शपथः-निर्दोषोद्धतवाक् १स्वोक्तसत्यत्वप्रत्यायनोद्देश्यकोऽसत्य-
त्वप्रसङ्गेऽनिष्टाभ्युपगमः २स्वाभिप्रायबोधानुकूलशपनकरणं
शब्दः-पदवाक्यात्मकः १श्रोत्रग्राह्यो गुणः । शब्दत्वेतिव्याप्तिवा-
रणाय गुण इति,रूपादिवारणाय श्रोत्रेति २आकाशविशेषगुणः
शब्दतात्पर्यं-तदितरप्रतीतिमात्रेच्छयानुच्चरितत्वे सति तदर्थ-
प्रतीतिजननयोग्यत्वम्,यथा भोजनप्रकरणे सैन्धवमानयेति-
वाक्यस्थं सैन्धवपदं लवणेतराश्वादिप्रत्यायनेच्छायानुच्च-
रितत्वे सति लवणरूपार्थविषयकप्रतीतिजननयोग्यमिति ।
शब्दपाकः-शब्दानां पर्यायपरिवर्तासहत्वम् १ यत्पदानि त्यज-
न्त्येव परिवृत्तिसहिष्णुताम्, तं शब्दन्यायनिष्णाताः शब्द-
शब्दध्वनिः-शब्दाश्रितं ध्वननम् । [पाकं प्रचक्षते
शब्दपुनरुक्तं-समानार्थकपूर्वानुपूर्वीकशब्दप्रयोगः,यथा घटो घटः
शब्दप्रत्यक्षं-शब्दावच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदजन्यं श्रावणं

शब्दप्रमाणं-यथार्थवाक्यम् * १ शाब्दप्रमाकरणम् २ सदर्थ-
विषयकज्ञानहेतुः ३ वर्णतादात्म्येनार्थबोधजनकम् ४ अस-
न्निकृष्टार्थप्रतिपादकं वचनम् । अनुवादविसंवादव्यवच्छेदा-
यासन्निकृष्टपदम्, अपेक्षितादिपदनिराकरणायार्थग्रहणम्,
अनुमानत्वनिराकरणाय वचनमिति मी० ५ समयबलेन
सम्यक्परोक्षानुभवसाधनम् । अनुमानादिव्यावृत्त्यर्थं समय-
ग्रहणम्, प्रत्यक्षव्यावृत्त्यै परोक्षपदम्, संशयादिव्यावृत्त्यै
सम्यगिति, स्मृतिव्यावृत्त्यर्थमनुभवेतीति भूषणे६आप्तोच्च-
रितत्वे सति वाक्यम्।अनाप्तोच्चरितवाक्येऽतिव्याप्तिवार-
णाय सत्यन्तम्,जवगडदशादावतिव्याप्तिवारणाय वाक्येति-
७ स्वसमानविषयवाक्यार्थयथार्थज्ञानजन्यम् ८ मानान्तरा-
बाधिततात्पर्यगोचरीभूतपदार्थसंसर्गबोधकवाक्यमिति ग्रं०
शब्दलिङ्गं-अर्थप्रकाशनसामर्थ्यम्,यथाग्नये त्वा जुष्टमित्यादि।
शब्दशक्तिः-इदं पदमिममर्थं बोधयतु इत्यादिसङ्केतः ॥७२७१
शब्दश्लेषः-बहूनां पदानामेकवद्भासनम् । [दानुसंधानं
शब्दाध्याहारः-आकाङ्क्षि (तैकदेशपूरणम् १)तार्थबोधकप-
शब्दान्तरत्वं-विभिन्नप्रकृतिकप्रत्ययत्वम्।शमी-शांतः१जितेन्द्रियः
शमः-मनो(निग्रहः १)नैश्चल्यम्२चित्तप्रशान्तिः३स्थिरमनस्क-
त्वम्४ब्रह्मज्ञानोपयोगिव्यापारातिरिक्तचित्तव्यापारमात्रनि-
शम्बः-मुसलाकारकाष्ठम्।शम्भुः-ईश्वरः१सिद्धपुरुषः। [रोधः
शम्या-दक्षिणहस्तगृहीततालविशेषः । शरः-मुञ्जः१मार्गणः ।
शय्या-बन्धनम्१संवेशस्थानम्२किञ्चिदेकं वस्तु बुद्धौ समाधाय
तदधिकाप्रबन्धरचनायामधिकस्यान्तरान्तरा प्रवृत्ते योजना ।
शरीरं-शीर्यते प्रतिक्षणं नश्यतीति१चेष्टेन्द्रियाश्रयः२सुखदुःखा-
न्यतरसाक्षात्काररूपभोगायतनमिति वे० ३ निरपेक्षत्वगि-

न्द्रियाधारः। अङ्गुल्याद्यवयवानां प्रत्येकं शरीरत्वनिरासाय निरपेक्षपदमिति देहात्मवादिनः ४ अन्त्यावयविमात्रवृत्ति-चेष्टावद्वृत्तिजातिमत्त्वं शरीरत्वम्।हस्तत्वपृथिवीत्वद्रव्यत्व-सत्त्वादिवारणाय प्रथमवृत्त्यन्तम्,घटत्वादिवारणाय चेष्टा-वद्वृत्तीति, घटशरीरसंयोगादिवारणाय जातिमदिति ५ पुन-र्दाराः पुनर्वित्तं पुनः क्षेत्रं पुनः सुतः, पुनः श्रेयस्करं कर्म न

शरीरी-भोगावच्छेदकः १देहावच्छिन्नात्मा। [शरीरं पुनः पुनः

शर्करा-क्षुद्रपाषाणः १पाषाणशकलः। शर्करी-नदी १मेखला।

शल्यानृत्यं-ललाटे हस्तं दत्वा क्रियमाणं नृत्यम्।शशः-शीघ्रगः

शवः-निर्जीवः १प्रेतदेहः २मृतकल्पः।शवरथः-शववाहनार्थरथः

शशिमदः-चिन्ताभरितस्य करिष्यमाणं कार्यं भविष्यति न

शष्पं-बालतृणम्। [वेत्यादिसंशयात्तूष्णींभावहेतुर्मदः

शस्तः-हिंसितः। शस्त्रं-अप्रगीतमन्त्रसाध्या स्तुतिः। [कृतः

शस्त्री-गृहीतशस्त्रः। शाक्तः-शक्त्युपासकः।शाणितः-तीक्ष्णी-

शाठ्यं-दुष्टता १परहिंसाहेतुर्वचनम्।शादः-कर्दमः १बालतृणम्।

शान्तः-निवृत्तिप्रधानः १ शौर्यधर्मरहितः। शान्तचेताः-स्वस्थ-

शान्तात्मा-सर्वान्तर्बहिर्भावेनानुगतचैतन्यम्। [चित्तः

शान्तिः-क्रोधोपशमः १ अन्तःकरणनिरोधशक्त्यधिष्ठात्री।

शान्तियज्ञः-निवृत्तिमार्गाभ्यासः। शापः-अनिष्टाभिशंसनम्।

शापोत्सर्गः-शापोच्चारणम्। शापोद्धारः-शापमुक्तिः।

शाब्दबोधः-शब्दा(ज्जातो बोधः १)र्थबोधजनकतावच्छेदकी-भूतो बोधः २ एकपदार्थेऽपरपदार्थसंसर्गविषयकं ज्ञानम् ३ शक्तिलक्षणान्यतरसंबन्धेन पदजन्यपदार्थस्मृतित्वावच्छिन्न-

शाब्दिकः-व्याकरणशास्त्राभिज्ञः। [कारणतानिरूपितकार्यत्वं

शाब्दी प्रमा-वाक्यकरणिका प्रमा १अबाधितार्थविषयकबोधज-

नकवाक्यजन्यज्ञानम् २शब्दविज्ञानादसन्निकृष्टेर्थे विज्ञानम्।प्र-
त्यक्षव्यवच्छेदार्थमसन्निकृष्टेति,आकाशं भक्षयेत्यादिव्यवच्छे-
शाब्दी भावना-पुरुषप्रवृत्त्यनुकूलभावकव्यापारविशेषः[दायार्थेति
शाम्भवी दीक्षा-गुरोरालोकमात्रेण भाषणात्स्पर्शनादपि, सद्यः
शारं-कर्बुरवर्णम् [संजायते ज्ञानं सा दीक्षा शाम्भवी मता
शारीरकः-शरीरधारी १शारीरको जीवः तमधिकृत्य कृतो ग्रन्थः
शारीरकमीमांसा-वेदांतानां ब्रह्मणि तात्पर्यनिर्णायको विचारः
शारीरकशास्त्रं-शास्यते प्रतिपाद्यते तत्त्वं शिष्येभ्योऽनेनेति ।
शारीरतापः-वातपित्तश्लेष्मणां वैषम्यनिबन्धनो ज्वरादिः ।
शालिहोत्रः-अश्वशास्त्रप्रणेताचार्यः । [पः १पुनरुत्थानशून्यः
शाश्वतः-आद्यन्तशून्यः १अप्रतिसमाधेयः । शाश्वतः-सदैकरू-
शास्ता-दण्डदाता १परसैन्यनिग्राहकः। शासनं-प्रवर्तकव्यापारः
शास्त्रं-हितशासकम् १लोकानधिगतार्थवक्त्रिति ग्रं० २एकप्रयो-
जनोपनिबद्धमशेषार्थप्रतिपादकम् ३प्रवृत्तिश्च निवृत्तिश्च पुंसां
येनोपदिश्यते, तद्धर्माश्चोपदिश्यन्ते शास्त्रं शास्त्रविदो विदुः
शास्त्रवासना-शास्त्रानुभवजनितत्वे सति शास्त्रस्यैव पुनः
पुनः (वादिजयाद्यर्थम्) स्मरणहेतुः १अनात्मशास्त्रेषु सक-
लग्रन्थाभ्यासपाटववादिविजिगीषाद्यभिनिवेशहेतुः ७३५७
शास्त्रवासनानिवृत्त्युपायः-सर्वग्रन्थानां जन्मसहस्रैरप्यध्येतु-
मशक्यत्वात्क्लेशबहुव्याप्तत्वादसारबहुलत्वाद्दर्पहेतुत्वात्स-
र्वेषां वादिनां दुर्जयत्वादात्मपराभवस्यावश्यं भावित्वाद्वृथा-
श्रमोयमिति निरन्तरं चिन्तनम् । [प्रद्वेषादिद्वारा महानर्थः
शास्त्रवासनाफलं-श्रमासूयामानमत्सरमहत्तिरस्कारसच्छास्त्र-
शास्त्रसङ्घर्षः-अन्योन्यदृढविवादः। शास्यः-उपदेशष्टुं योग्यः
शास्त्रीयः-शास्त्र (संबन्धी १) स्थपदशक्यतावच्छेदकः २शास्त्र-

सङ्केतितावच्छेदकधर्मवान् २ अशास्त्रीयत्वान्मुखतः शास्त्रापेतमिदं विदुः, शास्त्रनिर्णयगम्यत्वाच्छास्त्रीयमभिधीयते ।
शास्त्रीयगुणाधानदेह०-गङ्गास्नानशालग्रामतीर्थादिसंपादनं
शास्त्रीयदोषापनयनदेहवासना-स्नानाचमनादिभिरशौचाद्यपनयनम् । [तिरेकेण प्रपञ्चाभावनिश्चयः
शास्त्रीयबाधः-अथात आदेशोनेति नेतीत्यादिश्रुत्या द्रष्टव्य-
शिक्यं-रज्जुपञ्जरः । शिक्षकः-पथप्रदर्शकःशिक्थं-मक्षिकामलं
शिक्षा-विनयता १ त्रुटिनिवारणम् २प्रवृत्तिप्रयोजकेष्टसाधनताज्ञा(नानुकूलो व्यापारः ३)नम् * ४ ह्रस्वदीर्घादिवैदिकस्वरोच्चारणप्र(कारप्रदर्शको ग्रन्थः ५)तिपादकं शास्त्रम् ६
शिक्षणं-ज्ञानोपदेशः । [शिक्ष्यते स्थानादिकमनया
शिक्षाप्रयोजनं-उदात्तानुदात्तस्वरित ह्रस्वदीर्घप्लुतादिविशिष्टस्वरव्यञ्जनात्मकवर्णोच्चारणविशेषज्ञानम्। [रयोगः
शिक्षितः-परिपूर्णविद्यः । शिथिलः-अदृढसंयोगः १अल्पप्राणाक्ष-
शिरः-प्रौढः १मस्तकः।शिलं-कणिशार्जनम्।शिला-समपाषाणः
शिलापट्टः-दीर्घचतुरस्रपाषाणः। शिलोञ्छः-क्षेत्रपतितकणिश-
शिल्पं-कलाकौशलम् । शिल्पी-चित्रकलादिकर्मकरः। [ग्रहणं
शिल्पशास्त्रं-कर्षणादिगोपुरप्राकारनिर्माणादिप्रतिपादकम् ।
शिवः-विश्वसंहारकः १सर्वार्थगोचरज्ञानक्रियाशक्तिमत्त्वम् ।
शिशुत्वं-आदन्तजननात् १ पञ्चवर्षपरिमितवय इति ग्रं० ।
शिष्टत्वं-सत्यज्ञातृत्वम् १अनुशासनयोग्यत्वम् २ वेदोक्तावाधितप्रामाणिकार्थाभ्युपगन्तृत्वे सति वेदविहिताकरणप्रत्यवायफलककर्मकारित्वम् । चैत्यवन्दनप्रवृत्तबौद्धे व्यभिचारवारणाय वेदविहितेति ३ निखिलशब्दधर्मिकसाधुत्वप्रका-
शिश्नः-पुंसोऽसाधारणचिह्नम् । [रकयथार्थज्ञानवत्त्वं

शिष्टाचारः-शिष्टैर्धर्मबुद्ध्याऽनुष्ठीयमानोऽलौकिकव्यवहारः।
शिष्यः-शास्यः १शिक्षणीयः २उपदेशविषयः। शिष्टिः-शासनम्।
[वर्णः-शुश्रूषालाभपूजार्थं यशोर्थं वा परिग्रहः,शिष्याणां
ारुण्यात्स ज्ञेयः शिष्यसंग्रहः। [काले शी-शी ध्वनिः
वलम्बाभावः १क्षिप्रकारित्वम्। शीत्कारः-स्त्रीणां रति-
ारी-लघुविक्रमः। [द्यर्थप्रवृत्तावपि ततः परावर्तकः
शः-कथञ्चित्सदुपदेशादिनाऽसतः कस्यचिद्ब्रह्मज्ञाना-
शीलं- द्वृत्तम् १सदाचरणम् २सुस्वभावः लोकमनोहरस्वभावः
शुक्रं-वं र्यम् १निष्कर्षः २प्राक्कर्मबीजम्।शुक्लकर्म-शुभचरित्रम्
शुक्लकृ ष्णं-हिंसायुक्तप्रवृत्तिधर्मप्रावण्यम्।शुक्लपक्षः-चन्द्रवृ-
शुक्तिः मुक्तास्फोटः। शुचिः-सङ्करवर्जितः [द्व्यधिकरणकालः
शुद्ध-दोषास्पर्शी १सर्वधर्म(तीतः २)वर्जितः। शुभ्रं-उद्दीप्तम्।
शुद्धचैतन्यं-निरवच्छिन्नचैतन्यम् १जीवेश्वरविभागरहितं चैतन्यं
शुद्धशास्त्रवासना-अध्यात्मशास्त्राभ्यासजन्या विषयदोषदर्शन-
शुद्धसत्त्वं-रजस्तमोऽमिश्रकेवलसत्त्वम्। [विवेकवैराग्यादिहेतुः
शुद्धात्मा-विमलचित्तः १ जल्पच्छलजात्यादिदोषशून्यः।
शुद्धाद्वैतत्वं-द्वित्वसामान्याभाववत्त्वम् १इतरसंबन्धानवच्छिन्न-
कार्यकारणादिरूपद्वित्वप्रकारकज्ञानप्रतियोगिकाभाववत्त्वम्
शुद्धिः-वैदिककर्मयोग्यतासंपादकसंस्कारः १ दोषराहित्यम्।
शुभवासनात्वं-शुभानुभवजन्यत्वे अविनाश्यैश्वर्यप्रदत्वे वा
सति साधुसेवितत्वम्। निमेषोन्मेषादा तिव्याप्तिवारणा-
याविनाशीति। [लपर्य सायिनी मोक्षेच्छा
शुभेच्छाज्ञानभूमिका-नित्यानित्यवस्तुवि कादिपुरःसरा फ-
शुल्कं-मौल्यम् १मूल्यपणम् २घट्टदेयम्। ह ूषकः-आज्ञाकारी।
शुश्रूषा-परिचर्या १श्रोतुमिच्छा २श्रवणे ा। शुषिरं-सच्छिद्रम्

संबोधनं-व्याख्या १ अनभिमुखस्य अन्यत्रासक्तस्य वे ...ज्ञानावत
करणम् २ अभिमुखीकृत्याज्ञातार्थज्ञानानुकूलव्यापारानुकूलदनं
संबोध्यत्वं-तद्व्यापा... न्यज्ञानानुकूलव्यापाराश्रयः। [व्यापारः
संभवप्रमाणं-भूयःस... रदर्शनजन्यज्ञानं, यथा संभवति ब्राह्मणेः
विद्या,संभवति स... शतमिति १अविनाभाविनोऽर्थस्य सत्ता-क...
संभली-दूती १कुट्टिनी [ग्रहणादन्यस्य सत्ताग्रहणमात्र
संभावना-शक्त्युत्कर्ष... स्कर्तमत्युक्तिः १निश्चयप्राय औत्क-...
संमुखः-पुरोवर्तितव... ...ग्रः २उत्कटैकतरकोटिज्ञानं
संभोगः-सुरतेच्छा १स... ...र्जनं-धूलिनिराकरणम्
संमोदितं-संजातसंमो... ...१प्रकृत्यविस्मरणम् ।
सम्यक्-उत्तमप्रकारेण... ...न्य ल० [विशिष्टज्ञा०
सम्यग्ज्ञातत्वं-प्रकृतिप्र... ...तत्वे सति [दाव्यक्ति-
सरकं-सुराग्रहणपात्र... ...
सरस्वती-गिरा १वाग... ...रज्ञानपरोक्षस्व-
रवादीकवीश्वरः, सु... ...र पार सोऽभिधानः सरस्वती।
सर्गः-ग्रन्थसंधिः-प्रपंच... ...ष्टः। [स्वाध्यस्तसर्वजगदवभासकः
सर्वज्ञः-मनोवृत्तज्ञः १... कलपदार्थज्ञानसंपन्नः २ स्वरूपचैतन्येन
सर्वतन्त्रसिद्धान्तः-सर्व... ...स्त्राभ्युपगतः कथानुकूलोऽर्थः ७८३६
सर्वनामत्वं-स्वोच्चार... ...नुकूलबुद्धिप्रकारविशिष्ट(त्वम् १)र्थ-
बोधकत्वे सति सर्व... ...देगणपठितत्वम् २वक्तृबुद्धिविशेषविष-
यत्वावच्छेदकत्वोप... ...क्षितधर्मावच्छिन्नार्थवाचित्वमिति ग्रं०
सर्वशङ्की-स्वर्गादिष्टा... ...सद्भावेपि शङ्कावान्।सर्वमयं-सर्वात्मकं
सलिलमदः-संसारभ... ...स्य ममेदमावश्यकमिति चिन्ताहेतुर्मदः
सवर्णः-समानरूपः १... ...वजनकयावत्स्थानप्रयत्नजन्य वे सति
सवेगः-त्वरान्वितः [स्वाजनकस्थानप्रयत्नाजन्यः

सिद्धान्त-
[illegible]तावकल्पकं-वैशिष्ट्यावगाहिज्ञानम्, यथा घटमहं जानामी-
त्यादिज्ञानम्। इच्छादिवारणाय ज्ञा[illegible]मिति, निर्विकल्पक-
वारणाय वैशिष्ट्यावगाहीति। - [illegible]ग्रम. [चित्तसमाधानं
सविकल्पसमाधिः-ज्ञातृज्ञानज्ञेयविकल्प[illegible]सपुरःसरमात्मनि
[illegible]शूकः-आस्तिकः।सहः-समभिव्याहृतप[illegible]पस्थाप्यक्रियाकालः
सव्यभिचारः-साधारणासाधारण[illegible]न्यतमः[णवृत्तित्वं
सहकारी-स्वभिन्नत्वे सति [illegible]कार्यकारी [illegible]तदधिकर-
सहजत्वं-सौलभ्यम्।[illegible]-अपराधे सत्यपि कोपानाविष्करणम्।
सहसा-शरीरम[illegible]दय कार्ये प्रवृत्तिः। सहमरणं-सहमृतेन पत्या
सहस्रा[illegible]नन्तकरचरणादिमान्। [एकचितारोहणेन मरणं
स[illegible]तनतापः-पुण्यकर्मक्षये(मुद्गरादिप्रहरणजन्यस्तापः१)
[illegible]यिकैकराज्यादिपरावधिकपतनज०[न्कालेऽनवस्थितिः
सहानवस्थानं-एकत्र [illegible]योग्यता१एकाधिकरणे एकस्मि-
सहाप्रतीतिविरोधः-एकस्मिन्काल[illegible]धिकरणेऽप्रतीतिः।
सहा-दण्डोत्पलः१सत्तानाशी। सहायक[illegible]।सहासनं-ए-
सहायता-अन्यकर्तृकक्रियायामप्राधान्येनान्वयित्वम्। [कासनं
सहिष्णुः-सहनशीलः। सहृदयः-गुणग्राही१प्रशस्तचित्तः।
सांवादिकः-विवादकारी१संवाददाता। [illegible]शयिकः-संदिहानः।
सांसिद्धिकत्वं-निमित्तानपेक्षाधोदेशप्रस[illegible]त्वम्। [तंमानः
साकारः-शोभनमूर्तिः१प्राकृतधर्मविशि[illegible]ः२आकारेण सहव-
साक्षात्कारत्वं-साक्षात्करोमीत्यनुगतप्रत[illegible]तेसाक्षिको जाति-
विशेषः। [संबन्धः२वृत्ति[illegible]नियामकः संबन्धः
साक्षात्संबन्धः-पारम्पर्यरहितः संबन्धः [illegible]बन्धान्तराघटितः
साक्षात्त्वं-इतरपदार्थाप्रतियोगिकत्वे सत्यु[illegible]ष्टपदार्थप्रतियोगिकत्वं
साक्षात्साधनं-पारम्पर्यरहितं साधनं१साधनान्तराघटितं साधनं

साक्षिगतप्रत्यक्षं-विषयचैतन्याभिन्नप्रमाणचैतन्यम्॥७९९७॥
साक्षी-वृत्तज्ञः १अकर्तृत्वे सति द्रष्टा २ उदासीनत्वे सति बोद्धा।
विवादकर्त्रादावति[illegible]प्तिवारणाय सत्यन्तम्, स्तम्भादिवा-
रणाय बोद्धेति ३ [illegible]वेश्वरानुगतसर्वानुसंधातृचैतन्यम्।
साङ्ख्यशास्त्रं-कपिलप्र[illegible]तं शास्त्रम् १ सम्यग्विविच्य ख्याय-
न्ते प्रकटीक्रियन्ते [illegible]कृतिपुरुषपदार्थरूपाणि यस्मि-
सादनं-अपस[illegible]यम्। सात्त्विकः-सत्त्वगुणी जनः। [स्तत्
सादृश्यं-प्रमाणाजन्यज्ञानविशेषः १ उप[illegible]पमेयाभावासाधा-
रणकारणम् २तद्भिन्नत्वे सति तद्गतभूयोधर्म[illegible]त्वं [तिजनकः
साधकः-साधनकर्ता १साध्यज्ञापकः २फलोत्पादकः ३[illegible]मि
साधनं-कार्यजनकम् १करणकारकम् * २व्याप्त्याधारः ३[illegible]
प्रमितिकरणम् ४ पूर्वकालवृत्तिधर्मवान्वा ५ [illegible]
साधनाप्रसिद्धः-साधनतावच्छेदकाभा[illegible]साधनम्॥८००१॥
साधर्म्यसमा-तुल्यधर्म[illegible]वम्यणं स्थापनहेतुदूषकमुत्तरम्
साधारणं-सामान्य[illegible]तम् १ अनेकस्वत्ववत्येकस्मिन्।
साधारणकारणत्वं-कार्यत्वावच्छिन्नकार्यतानिरूपितकारणता-
साधारणधर्मत्वं-तदितरवृत्तित्वे सति तद्वृत्तित्वम्। [शालित्वं
साधारणहेतुः-साध्याभाववद्वृत्तिर्हेतुः। साध्यता-सिद्धिकर्मत्वम्
साधुः-हर्षदायी १समीच[illegible]नः २प्रियकारी ३श्रेष्ठकुलोत्पन्नः ४स्व-
परकार्यसाधकः ५ नि[illegible]रः सदयः शान्तो दम्भाहङ्कारवर्जितः,
निरपेक्षो मुनिर्वीतराग[illegible] साधुरिहोच्यते। [दकजातिविशेषः
साधुत्वं-निर्दोषत्वम् १[illegible] करणबोध्यत्वम् २पुण्यजनकतावच्छे-
साधुवृत्तं-सौजन्यम् [illegible] साध्वी-सुशीला १ पतिव्रता स्त्री।
साधुशब्दः-अपभ्रंशभिन्नः शब्दः १अभ्युदयसाधनप्रयोगविषयः।
साध्यः-निष्पाद्यः १व्याप्तिनिरूपकः २ अवयवत्वावच्छिन्नविष-

र्थतानिरूपितविषयताप्रयोजकः३भाविकालवृत्तिधर्मवत्त्वम्।
साध्यक्रियात्वं-क्रियान्तराकांक्षानुत्थापकतावच्छेकरूपवत्त्वम्।
साध्यनिश्चयः-हेतौ साध्यव्याप्तिद्वारा जायमानो निश्चयः ।
साध्वसं-अद्भुतस्य साध्वसेन भूतोदाहरणं। सानुः-शिखरम् ।
सान्त्वनं-सुखम् १योऽहं स भवान् मम द्रवन्ति द्रवतः इत्युपग्रहः।
साम-गानक्रियाविशेषः * १ शत्रुवशीकरणं २ प्रियवचनैः
सामन्तः-प्रतिपक्षभूतः१अलाङेशाधीश्वरः। [क्रोधशमनं
सामग्री-समस्तता १ कार्यांयोगव्यवच्छिन्नः कारणसमुदायः।
सामन्त्रः-गीतिशब्दे [८८१४] मन्त्रः१गीतिविशिष्टो मन्त्रः।
सामयाचारिकं-समयाचारमधिकृत्य प्रवृत्तम्।सामयिकः-समय-
सामयिकाभावः-उत्पत्तिविनाशवानभावः [गृहीतसंबन्धजन्यः
सामर्थ्यं-अर्थनिष्पादनविषयकशक्तिः१पृथगर्थानां पदानां विशि-
ष्टार्थोपस्थितिजनकत्वं २ अन्यथासाघटकपदनिराकाङ्क्षत्वे सति
सामवादः-मृदुशब्दः। [परस्परसमभिव्याहृतपदसाकाङ्क्षत्वं
सामवेदः-सामबहुलो वेदः१सामावयवको वा२सामविनियो-
जको वेदः३सामद्रव्यको वेद इति सुधायाम् ४ सामैव वेदः।
सामानाधिकरण्यं-अभेदान्वयबोधकत्वम् १ तदधिकरणवृत्ति-
त्वम् २ एकार्थविषयकबुद्धिजनकत्वम् * ३ एकविभक्त्यन्त-
त्वे सत्येकार्थनिष्ठत्वम् ४भिन्नप्रवृत्तिनिमित्तयोः समानविभ-
क्त्यन्तयोः पदयोरेकस्मिन्नर्थे तात्पर्यम् । घटकलशयोर्वार-
णाय भिन्नेति ६भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे
वृत्तिः, यथा सोयं देवदत्तः । मृद्घटः नीलमुत्पलं राज्ञः पुरुष
इत्यादिवाक्येषु व्यभिचारनिरासाय क्रमेण विशेषणम् ।
सामान्यं-बहु (तरविषयः१) व्यापकम्२नित्यत्वे सत्यनेकसम-
वेतत्वम् । संयोगादावतिव्याप्तिवारणाय सत्यन्तम्,एकत्वा-

दिवारणायानेकेति, अत्यन्ताभाववारणाय समवेतेति। [लङ्कनं
सामान्यधर्मः-अनुगतधर्मः १सादृश्यप्रयोजको धर्मः। सामि-क-
सामान्यतोदृष्टानुमानं-अदृष्टस्वलक्षणस्य सामान्यविशेषस्य
दर्शनम् १कार्यका भिन्नलिङ्गकमनुमानमिति ग्रं० २पूर्वा-
गृहीतव्यक्तिसामा विषयमनुमानम्। [सामान्यात्र
सामान्यलक्षणसन्नि इन्द्रियसंबद्धविशेष्यकज्ञानप्रकारीभूतं
सामान्यव्य मानोपमेयसाध धर्मविशिष्टोपमेयवचनं
सामान्याहङ्कारः-सामान्यतोहमित्य ात्मिका चित्तवृत्तिः।
सामीप्यमुक्तिः-उपास्यस (मीपवर्तित्वम् १) ीप्यप्राप्तिः ।
साम्यं-शत्रुमित्रादिबुद्ध्यभावः *१ यथास्थितवस्तुदर्शनम् ।
सायुज्यमुक्तिः-सहयुनक्तित्वम् १सदोपास्यसहवृत्तित्वं [ैक्यः
सारः-सम्यगंशः १निष्कर्षः २ उत्तरोत्तरोत्कर्षः ३ इत्य ति ।
सारथिः-रथादिघोटकनियोगकर्ता । रस्वतं-वाक्पटुता ।
सारूप्यमुक्तिः-संमोदा उपास्य(त्मतापत्तिः २)समानस्वरू-
सार्वभौमः-सर्व र्यी र:।सार्वभौतिकः-सर्वभूतव्यापकः[पप्राप्तिः
सालोक्यमुक्तिः-आमोदप्राप्तिः १उपास्यसमानलोकप्राप्तिः ।
सावयवः-अवयवेन सहवर्तमानः। सावधानं-मनोभिनिवेशयुक्तं
सार्थः-समानार्थकः। साहचर्यं-एकस्मिन्कार्ये परस्परापेक्षि वम् ।
सास्ना-गोगलकम्बलम्। साहनं-सहिष्णुता। साहसं-प्रभवकर्म।
साहाय्यं-सङ्कटेऽनुगुणभावः।साहित्यं-काव्यार्थप्रतिपादकं शास्त्रं
सिकता-सूक्ष्मपाषाणपांसुः। [भिन्नाभिन्नभिन्नकार्यकर्ता
सिद्धः-निपुणः १जीवन्मुक्तः २सिद्धिविषयः ३अक्षादिगोचरः ४वि-
सिद्धक्रिया-लिङ्गसङ्ख्याकारकान्वितः[जपाः कोटयः प्रकीर्तितः
सिद्धपीठः-जातो लक्षवलिर्यत्र होमो वा कोटिसङ्ख्यकः, महाविद्या-
सिद्धसाधनं-प्रमाणान्तरेणावगतार्थसाधनम् । सिता-शर्करा ।

सिद्धान्तः-अबाधितो निश्चयः * १ तत्तच्छास्त्रसिद्धोर्थः २वादि-
प्रतिवादिनिर्णीतोऽर्थः ३प्रामाणिकत्वेनाभ्युपगतोर्थ इति ग्रं०४
पूर्वपक्षकोटिनिरसनपूर्वकस्वीकरणीयकोटिनिर्देशः।।७९१८।
सिद्धान्तश्रवणं-वेदान्तार्थविचारः। [शुद्धः सदा शान्त उच्यते
सिद्धान्ताचारः-आत्मानं देवतां मत्वा यजेन्नेवञ्च मानसैः, सदा
सिद्धान्ती-संशयापनोदकः १ प्रमाणाद्युपन्यासेन पूर्वपक्षनिरा-
सिद्धार्थः-सिद्धसंबन्धः १पूर्वपक्षं निरस्य [illegible]र्थः। [सकः
सिद्धासनं-योनिं वामेन संपीड्य मेढ्रादुपरि दक्षिणं [illegible] मध्ये च
मनोलक्ष्यं सिद्धासनमिदं भवेत् १सिद्धये सर्वभूतादि [illegible]वाधि
ष्ठानमद्वयम्, यस्मिन्सिद्धिङ्गताः, सिद्धास्तत्सिद्धासनमुच्यते
सिद्धिः-योगपरिपाकः १ धर्मज्ञानवैराग्यादेर्लाभः २ बहूनां तु
प्रधानानां नाम यत्रानुवर्ण्यते, अभिप्रेतार्थसिद्धार्थं सा सिद्धि-
[illegible]षा-साधयितुमिच्छा। [रिति गीयते
सीमा-सावधिः। सुकरः सुखेन साध्यः। सुकृतः-सुष्ठुकृतः।
सुकुमारता-अनिष्ठुराक्षरप्रायम्। [illegible]ारी-मृदुस्वभावः।
सुखं-क्लेशासहनम् * १निरुपाधिकेष्टम् २ धर्ममात्रासाधारण-
कारणकगुणः ३सर्वेषामनुकूलतया वेदनीयम्। शत्रुदुःखवार-
णाय सर्वेषामिति ४ इष्टसाधनताज्ञानाजन्यजन्येच्छाविषय-
गुणः। सुखसाधनशब्दस्पर्शादावतिव्याप्तिवारणायेष्टसाध-
नताज्ञानाजन्येतीच्छाविशेषणम्, ईश्वरेच्छावारणाय जन्येति,
दुःखाभाववारणाय गुण इति ४सत्त्वपरिणामरूपप्रीत्यात्मक-
चित्तवृत्तिविशेषः५काम्यभावत्वम्। [वासस्थानं
सुखप्राप्तिः-आत्मनिसुखसंबन्धः। सुखाधारः-मुनिगृहम् १नि-
सुखश्रवः-कर्णमधुरः।सुखावहं-उत्तरोत्तरमधिकसुखजनकं सुखम्
सुगारी-प्रशस्तशरीरवती।सुतरां-अवधारितार्थस्यातिशयौचित्यं

सुदर्शः-प्रसन्नवक्त्रः। सुदृश्यं-प्रियदर्शनम्।सुनीतः-सुनीतिसहितः
सुधाकारः-प्रासादादिलेपनकारणीभूतपाषाणादिभस्मकारकः
सुन्दरी-हर्षप्रदा १प्रशस्तरूपवती २ विलक्षणसंस्थानावयववती
सुप्तप्रबुद्धः-अर्द्धजागरूकः । सुप्तयुक्तशरः-शीघ्रहस्तः ।
सुप्त्वं-प्रकृत्यर्थधर्मिकस्वार्थसङ्ख्यान्वयबोधकविभक्तित्वम् ।
सुमुखः-व्यक्तवर्णः। सुमेरुः-देवाचलः १ सुवर्णमेरुः। [कारः
सुरः-देवता १ अभिलाषपूरकः । सुरासंधानं-सुरानिष्पादनप्र-
सुलभः-अनायासलभ्यः। सुवचाः-प्रशस्तवाक्यवक्ता । [नव्रतः
सुविज्ञेयः-सुखेन ज्ञातुं योग्यः। सुव्यक्तः-संस्फुटः। सुव्रती-शोभ-
सुषुप्तिजाग्रत्-सुषुप्त्यवस्थायां सात्त्विकी या सुखाकारा वृत्तिः
(यदनन्तरं प्रबुद्धस्य सुखमहमस्वाप्समिति परामर्शः) सा।
सुषुप्तिसुषुप्तिः-सुषुप्त्यवस्थायां या तामसी वृत्तिः (यद्बलात्प्र-
बुद्धस्य गाढं मूढोऽहमस्वाप्समिति परामर्शः)सा॥८०
सुषुप्तिस्वप्नः-सुषुप्त्यवस्थायां या राजसी वृत्तिः (यदनन्तरं
दुःखमहमस्वाप्समिति प्रबुद्धस्य परामर्शः)सा ॥८०४७॥
सुषुप्त्यवस्था-सुखगोचराविद्यागोचराविद्यावृत्त्यवस्था १जाग्र-
त्स्वप्नोभयभोगप्रदकर्मोपरमे सति द्विविधदेहाभिमाननि-
वृत्तिद्वारा विशेषविज्ञानोपरमात्मिका या बुद्धेः कारणात्म-
सुषिरः-मन्दस्वरः। सुषीमः-मनोज्ञः। [नावस्थितिः
सुषुम्णानाडी-इडापिङ्गलाया मध्यस्था नाडी। सुहृदयः-प्रश-
सुहृद्-सर्वदानुगामी १प्रत्युपकारमनपेक्ष्योपकर्ता [स्तमनस्कः
सूकरः-सूप्रसवकर्ता। सूक्तं-सुन्दरकथनम् १ शोभनवचनम्।
सूक्ष्मः-दुर्लक्ष्यः १सुकुमारः। सूक्ष्मप्रपञ्चः-अपञ्चीकृतवस्तु।
सूक्ष्मशरीरत्वं-अपञ्चीकृतसूक्ष्मभूतकार्यत्वम् १दृगगोचरत्वे सति
सूक्ष्मालङ्कारः-संलक्षितसूक्ष्मार्थप्रकाशनम् [कारणदेहभिन्नत्वं

सूचः-दर्भाङ्कुरः । सूची-नक्षत्रसूचकः१सैन्यव्यूहः२सीवनसाधनं
सूतः-पुराण(संचालकः१)ाद्यर्थानुसारेण स्तावकः२स्वकृतस्तुति-
पाठकः ३ब्राह्मण्यां क्षत्रियादुत्पन्नः ४ अग्निकुण्डसमुद्भूतः ।
सूत्रं-वस्त्रसाधनम् * १ अभेदानुसंधानमिति सां० २ अल्पाक्षर-
(त्वे सति वह्वर्थसूचकम् ३) मसंदिग्धं सारवद्विश्वतोमुखम्,
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः । [पाककर्ता
सूत्रक्रीडा-सूत्रसंचालनेन पुत्तलिकादिचालनम्।सूदः-अन्नकारः१-
सूत्रधारः-परमेश्वरः * १ नाटकप्रयोगप्रधानसंचालकः२नाट-
कीयपदार्थानुष्ठानसंविधानकादिकार्यनिर्वाहकुशल इति ग्रं०
सूत्रभिद्-सीवनकर्ता१सूत्रणजीवी।सूत्रयन्त्रं-सूत्रवापनं यन्त्रम् ।
सूना-भूतहिंसा १ वधस्थानम् २ भक्ष्यप्राणिवधस्थानम् ।
सूर्यमदः-क्रोधाग्निभरितस्येदं संहर्तव्यमितीच्छाहेतुर्मदः ७८७७
सृष्टः-निर्मितः१विसर्जितः । सृष्टिः-उत्पत्त्यनुकूलव्यापारवि-
सृष्टदृष्टिः-सृष्ट्युत्तर(समया दृष्टिः१)कालीनदृष्टिः। [शेषः
सेकः-वीर्यपातः१द्रवद्रव्यक्रियानुकूलव्यापारः।सेना-चतुरङ्गबलं
सेनापतिः-सेनानायकः१चतुरङ्गबलनेता२समस्तनीतिशास्त्रज्ञः
वाहने पूनितश्रमः, शौर्यवीर्यगुणोपेतः सेनाध्यक्षो विधीयते ।
सेवकः-परिचारकः । सेवा-सर्वभावेनाचार्यानुकूलकारित्वम् ।
सेवकवृद्धिव्यसनं-परराष्ट्राभिभवादीच्छया सेवकवृद्ध्यर्थेच्छा-
सेवी-अनुचरः । सैन्धवं-सिन्धुदेशोद्भवम् । [हेतुर्व्यसनं
सैन्यं-हस्त्यश्वरथपादातं चतुरङ्गम्१प्रथमं युद्धकारित्वं सम-
स्तबलपालनम्, दिङ्मार्गयोधशोधित्वं पत्तिकर्म प्रचक्षते ।
सैरन्ध्री-द्रौपदी १ अन्तःपु(रचरी २)रेऽधिकारिणी स्त्री ।
सोढः-क्षमाशीलः१सहनकर्ता । सोत्तरं-उत्तरत्वसहितमुत्तरम्।
सोपलनं-आरोहणं।सोपाधिकभेदः-उपाधिसत्ताव्याप्यसत्ताकः

सोपाधिकभ्रमः-उपाधिसहितो भ्रमः १ अधिष्ठानज्ञानानिवर्त्यो
सोपाधिकाध्यासत्वं-उपाधिनिरूपणाधीननिरूपणत्वम्। [भ्रमः
सोमयाजी-सोमयागकर्ता।सौभिकः-कुहकः १आकाशयानिकः।
सौम्यः-निष्कम्पः १सदाप्रसन्नः। सौरभं-अनुकूलवेदनीयो गन्धः
स्कन्दः-उत्प्लुत्यगतिः १सेनानीर्महेश्वरसुतः। [समूहस्थानं
स्कन्धः-महाशाखा १ स्थूलशाखा २ राजगृहप्राकारः ३ लोक-
स्तब्धीभावः-गतिहीनः १ अहमाकारवृत्त्यन्यवृत्तिसामान्याभावः
स्तम्भः-स्थूणा १नमस्काराद्यकरणम्। स्तम्भनं-जडीकरणम्।
स्तुतिः-गुणिनिष्ठगुणाभिधानम् १आरोप्यगुणकथनम्[र्थकं वाक्यं
स्तुतिवादः-गुणकीर्तनं।स्तुत्यर्थवादः-साक्षाद्विध्यर्थस्य प्रशंसा-
स्तुत्यः-स्तोतुमर्हः। स्तेयं-परस्वापहरणम्। स्तोता-स्तुतिकर्ता।
स्तोत्रं-प्रगीतमन्त्रसाध्या स्तुतिः १सामगानविशिष्टमन्त्रकरणं
स्तोभः-स्तम्भनम् १निरर्थकः शब्दः २ अधिकत्वे सत्यृग्विलक्ष-
णवर्णः, यथा सामवेदे 'इडा, होई' त्यादिः ३अर्थशून्यत्वे सत्यु-
स्तोमः-आत्मगुणाविष्करणम्। [च्चारणमात्रप्रयोजनवत्त्वं
स्त्री-जनित्री १योनिस्तनवती। स्त्रीजितः-स्त्रैणः १स्त्रीवश्यः पुरुषः।
स्त्रीदोषः-अनृतं साहसं माया मूर्खत्वमतिलोभता,अशौचं निर्दय-
त्वं च स्त्रीणां दोषाः स्वभावजाः। [कृतं संद्भिः परिकीर्तितं
स्त्रीधनं-विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसन्निधौ,तदध्यग्नि-
स्त्रीपुरुषभेदः-पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा,
शशो मृगो वृषोश्वश्च स्त्रीपुंसोर्जातिलक्षणम् १को धर्मः किं
यशस्तेषां का प्रतिष्ठा च किं तपः, किं बुद्धिविद्याज्ञानञ्च पर-
स्त्रीप्रत्ययः-स्त्रीहेतुकः १स्त्रीवाचकप्रत्ययः। [स्त्रीषु च यन्मनः
स्त्रीबुद्धिः-स्त्रीपरामर्शः।स्त्रीमुद्रा-योषागुप्तेन्द्रियस्थानम्। [टः
स्त्रीलिङ्गं-इयमितिव्यवहारविषयः।स्त्रैणः-स्त्रीस्वभावः १स्त्रीलम्प-

स्थलं-उज्जटदेशः १वृष्टिमात्रलभ्यजलम् २तत्तद्व्यवहारजन्यशा-
स्थाणुः-गतिहीनः १छिन्नावशिष्टतरुः। [ब्दबोधविषयः
स्थानं-स्थापनकम् १सन्निधिविशेषः २ देशसामान्यम् ३स्वाभि-
स्थानभ्रष्टः-स्थानच्युतः। [प्रायबोधानुकूला स्थितिः
स्थायी-स्थितिशीलः १ समाधिककालवृत्तिः २ रसानुकूलो
स्थितिः-अचाञ्चल्यम् १अव्यभिचारिता। [रत्यादिभावः
स्थिरः-अर्थप्रतिष्ठः १पुनर्निवर्तितुमसमर्थः। स्थिरस्थितिः-पत-
स्थिरस्नेहा-अचपलसौहार्दा। स्थूलः-मांसलः। [नरहितः
स्थूलशरीरत्वं-शुक्रशोणितनिर्मितत्वे सत्यस्थ्यादिसमुदायत्वम्
स्थैर्यं-अचलता १अभेद्याध्यवसायत्वम् २क्रोधनिमित्तैरविकारः ३
स्थौरं-दृढता। [प्रहारेप्यारब्धकर्मापरित्यागित्वं स्थैर्यत्वं
स्नातकः-एकं द्वौ बहून्वा वेदानधीत्य यः स्नानं समावर्तनं
स्नातकव्रतं-देवद्विजप्रज्ञानां पूजनादिलक्षणम्। [प्राप्तः सः
स्नानं-शोधनम् १शरीरमज्जनम् २कायप्रक्षालनम्।स्नायुः-शिरा।
स्नापकः-स्नपयिता १ मज्जनादिकारयिता। स्नुषा-पुत्रवधूः।
स्निग्धः-चिक्कणः १ स्नेहोत्पादकः। स्नेहप्रवृत्तिः-प्रेमप्रवाहः।
स्नेहः-स्वाभाविकी प्रीतिः १प्रियायां प्रियस्येव सदा स्मृतिहेतुः २
दर्शने स्पर्शने वापि श्रवणे भाषणेपि वा, यत्र द्रवत्यन्तरङ्गं स
स्नेह इति कथ्यते ४ चूर्णादिपिण्डीभावहेतुर्गुणः। कालादावति-
व्याप्तिवारणाय गुणेति,रूपादिवारणाय चूर्णादिपिण्डीभावहेतु-
स्पर्द्धा-परैश्वर्यासहनजा पराभिभवेच्छा।स्पर्धी-ईर्ष्यालुः [रिति
स्पर्शः-उप(पातकः १)तप्ता २ त्वगिन्द्रियमात्रग्राह्यो गुणः।
स्पष्टब्रह्मलिङ्गकत्वं-विषयवाक्ये ब्रह्मधर्मतया निर्णीत(र्थबो-
धक)ब्रह्मलिङ्गकत्वम्,यथान्तरधिकरणविषयवाक्ये ब्रह्मधर्म-
तया निर्णीतं सर्वदुरितोदितत्वं फलवचनोपोद्बलनेन जीवादा-

वसंभवेन ब्रह्मण्येव सङ्गमनीयं ब्रह्मधर्मतया निर्णीतं विद्यते इति
स्पष्टार्थः-सङ्गतार्थः।स्पार्शनं-त्वगिन्द्रियजन्यं प्रत्यक्षम्। [तत्
स्पृहा-अभीष्टार्थे प्रवर्तनम् १निष्प्रयोजनमिन्द्रियविषयरूपादि-
विशेषदर्शनेच्छा। [सानधीनप्रतिपत्तिविषयः
स्फुटः-असंदिग्धाविपर्यस्तप्रतिपत्तिविषयः १ तद्विषयकजिज्ञा-
स्फुटार्थः-बोधगम्यः १ अभिप्रायसूचकः २ गूढार्थप्रकाशकः।
स्फुटितः-व्यक्तीभूतः। स्फुरः-सञ्चलः। स्फूर्जथुः-वज्रपातशब्दः।
स्फोटः-वर्णातिरिक्तो वर्णाभिव्यङ्ग्योऽर्थप्रत्यायको नित्यः
शब्दः १ अर्थनिष्ठविषयताप्रयोजकशक्तिमत्त्वं स्फोटत्वम्।
स्फ्यं-खड्गाकारं काष्ठम्। स्फोट(कः-)नं-विदार(कः)णम्।
स्मरणं-सादृश्यानुभवाद्वस्त्वन्तरस्मृतिः।स्मरणीयं-स्मर्तुं योग्यं
स्मरचक्रः-धृत्वा वामकरेणोरुं स्वपादस्योपरिस्थितम्, दृढं च
स्मरदशा-स्मरकृतशरीरावस्था। [रमते कामी प्रकीर्तित
स्मरवीथिका-वेश्या।स्मरस्तंभः-लिङ्गं। स्मरातुरः-प्रेमविह्वलः
स्मृतिः-चिरानुभूतार्थस्मरणशक्तिः १अनुभूतविषयाधिकानव-
गाहिज्ञानम्, यथा सा मे माता २उद्भूतसंस्कारमात्रजन्यं ज्ञा-
नम्। संस्कारध्वंसेऽतिव्याप्तिवारणाय ज्ञानमिति, अनुभ-
वेतिव्याप्तिवारणाय संस्कारजन्यमिति, असंभववारणायो-
द्भूतेति, प्रत्यभिज्ञायामतिव्याप्तिवारणाय मात्रपदम् ३-
स्मरणाद्वै निमित्तानां धर्माधर्मनिरूपणात्, तिमरोत्पाटनाद्देवि-
स्मार्तं-स्मारकम् १सूत्रोक्तम्। [स्मृतिरित्यभिधीयते
स्मृतिशास्त्रं-वेदार्थानु(भवजन्यं वाक्यम् १) वादकं शास्त्रम्।
स्यन्दनं-प्रस्रवणम्। स्रंसी-अधःपतनशीलः। स्रष्टा-सृष्टिकर्ता।
स्रुवः-खदिरकाष्ठनिर्मितवटपत्राकृतिहस्तमात्रयज्ञपात्रम्।
स्वकरणं-स्वीकारः।स्वकर्मी-स्वार्थी। स्वक्षयं-स्वाभीष्टस्थानम्

स्वगतं-स्वस्मिन्विद्यमानम् । स्वगतभेदः-स्वावयवैः कृतो भेदः,
स्वगम्यं-स्वसंवेद्यम् । [यथा वृक्षस्य पर्णपुष्पफलादितः
स्वतन्त्रः-मनोमुखः १ स्वेच्छाचारी २कर्तुमकर्तुमन्यथा वा कर्तुं
समर्थः ३ इतरसत्तानधीनसत्ताकः ४ इतरव्यापारानधीन-
स्वतन्त्रकारकः-कारकान्तरानधीनकारकः । [व्यापारवान्
स्वतोग्राह्यत्वं-ज्ञानग्राहक(मात्रग्राह्यत्वम् १तिरिक्तानपेक्षत्व-
मिति भाट्टाः२)सामग्रीजन्यग्रहविषयत्वमिति नै० ३ प्रामा-
ण्यग्रहप्रतिबन्धकाभावकालीनयावत्स्वाश्रयानुव्यवसायग्रा-
ह्यत्वमिति मुरारिमिश्राः४दोषाभावसहकृतयावत्स्वाश्रय-
स्वजनः-स्वजातिकः । [ग्राहकसामग्रीग्राह्यत्वमिति वे०
स्वत उच्चारणं-अन्यदीयस्वार्थतात्पर्यकोच्चारणानधीनोच्चारणं
स्वत उत्पत्तिकत्वं-आगन्तुकभावकारणानपेक्षज्ञानसामान्यप्र-
योजकप्रयोज्यत्वम् १दोषाभावसहकृतज्ञानसामान्यसामग्री-
जन्यत्वम् । अप्रमात्ववारणाय दोषाभावसहकृतेति २विज्ञा-
नसामग्रीजन्यत्वे सति तदतिरिक्तहेत्वजन्यत्वम् । विज्ञान-
सामग्रीजन्यत्वमप्रामाण्येप्यस्तीति परतः प्रामाण्यवादिभिश्च
वीक्रियत इत्यतिव्याप्तिरर्थान्तरता वा स्यात्तन्निवृत्त्यर्थं
स्वता-स्वकीयता । [तदतिरिक्तहेत्वजन्यमिति
स्वतोव्यावर्तकत्वं-स्वभिन्नलिङ्गजन्यस्वविशेष्यकस्वसजाती-
येतरभेदानुमित्यविषयत्वम् । [यमाना रोदनवाक्यं
स्वतःसंभवीवाक्यं-विवाह्य नववधूः श्वशुरगृहं दोलिकया नी-
स्वतःप्रमाणं-अन्यप्रमाणनिरपेक्षस्वार्थबोधनसमर्थम् ॥८३००
स्वत्वं-स्वामित्वम् १प्रतिग्रहयुद्धक्रियादिजन्यो धर्मविशेषः२स्वा-
भिलाषानुकूलक्रियायोग्यत्वम् ३ शास्त्रसंमतयथेष्टविनियोगार्ह-
स्वदेशगतः-स्वाश्रयतावच्छेदकान्यदेशानवच्छिन्नाश्रयताकः [त्वं

स्वधा-पितृभक्ष्यं कव्यम् १पित्रुद्देशेन दीयमानमन्नम् २स्वस्वक-
स्वप्नजाग्रत्-स्वप्नेमित्रादिप्राप्तिः। [रणको हविस्त्यागः
स्वप्नप्रपञ्चः-स्वप्नसदृशो मिथ्यासंसारः।स्वप्नशीलः-निद्रालुः।
स्वप्नसुषुप्तिः-जाग्रद्दशायां वक्तुमशक्यं यत्किञ्चित्स्वप्नेऽनुभू-
स्वप्नस्वप्नः-स्वप्नेऽपिस्वप्नो मया दृष्ट इति बुद्धिः। [यते तत्
स्वप्नावस्था-वासनामयविषयोपलब्ध्यवस्था १इन्द्रियाजन्यवि-
षयगोचरापरोक्षान्तःकरणवृत्त्यवस्था । जाग्रदवस्थाव्यावृ-
त्त्यर्थमिन्द्रयाजन्येति,अविद्यावृत्तिमत्यां सुषुप्तावतिव्याप्ति-
वारणायान्तःकरणेति २ जाग्रद्भोगप्रदकर्मोपरमे सतीन्द्रियो-
परमे जाग्रदनुभवजन्यसंस्कारोद्भूतविषयतज्ज्ञानावस्था ३
स्वप्नकरः-निद्राजनकः।स्वपनं-शयनम्। [विपरीतदर्शनत्वं
स्वप्रकाशत्वं-सजातीयप्रकाशाप्रकाश्यत्वम् १ इतराप्रकाश्यत्वे
संविदविषयत्वे वा सति प्रकाशमानत्वमित्यद्वैतदीपिकायाम् ३
स्वव्यवहारे स्वातिरिक्तसंविदनपेक्षत्वम् ४अवेद्यत्वे सत्य-
परोक्षव्यवहारयोग्यत्वम् । घटादावतिव्याप्तिवारणाय स-
त्यन्तम्, अतीन्द्रियधर्मादावतिव्याप्तिवारणायापरोक्षेत्यादि-
विशेष्यदलम् २ अन्यानवभास्यत्वे सति स्वव्यतिरिक्तसक-
स्वभटः- शरीररक्षकः। [लावभासकत्वं
स्वभावः-इतरनिरपेक्षं वस्तुस्वरूपं १हेत्वन्तरनिरपेक्षो वस्तुधर्मः
स्वभावोक्तिः-कविप्रतिभागोचरत्वे सति नानावस्थस्य व-
स्तुनः स्वभाववर्णनम्। [कन्येच्छयैकस्मै तद्दानं
स्वयंवरः-स्वयंवरणं यत्र क्रियायां तथा १ बहुषु वरेषु सत्सु
स्वरः-उदात्तानुदात्तस्वरितरूपो वर्णोच्चारणयत्नविशेषः १
काक्वादिकृते वर्णाद्युच्चारणध्वनिविशेषः २ श्रुत्यनन्तरभावी
[यः शब्दोऽनुरणनात्मकः, स्वतो रञ्जयति श्रोतृचित्तं स स्वर

उच्यते । स्वरुः-वज्रः१काष्ठशकलम् । स्वरुचिः-स्वाभिलाषः
स्वरूपयोग्यत्वं-कारणतावच्छेदकधर्मवत्त्वम् , यथा वनस्थदण्डे।
स्वरूपलक्षणं-स्वरूपं सद्व्यावर्तकम्,यथा प्रकृष्टप्रकाशश्चन्द्रः१
इतरानिरूप्यं लक्षणम् २ स्वरूपमेवलक्षणम्, यथा सत्यज्ञा-
स्वरितः-वक्रीभूतः । [नानन्दाः३लक्ष्यापायप्रयोजकापायकत्वं
स्वरूपसंबन्धः-धर्मिद्वयात्मकः संबन्धः १ प्रतियोग्यनुयोग्यन्यत-
रात्मकः संबन्ध इति ग्रं० २ संबन्धान्तरमन्तरेण विशिष्टप्रती-
तिजननयोग्यत्वम् । [त्पक्षतावच्छेदकत्वं
स्वरूपासिद्धः-पक्षावृत्तिर्हेतुः १ पक्षेऽभाववान्वा २ हेत्वभाववं-
स्वरूपोपकारकं-प्रधानसाधनद्रव्यादिसंस्कारद्वारा प्रधानोप-
कारकम्,यथा ज्ञानसाधनान्तःकरणसंस्कार(कं)द्वारा निष्का-
मकर्मानुष्ठानमिति वे० १कर्माङ्गद्रव्यदेवताद्युद्देशेन विधी-
स्वर्गी-देवता१मृतपुरुषः । [यमानं कर्मेति मी०
स्वर्गः-देवानां निवासस्थानम् १ भोगप्राचुर्यमयस्थानविशेषः।
स्वशाखात्वं-परम्परया(ध्ययनविषयत्वम् १)नुष्ठानविषयत्वम्।
स्वसंज्ञः-परैरसमितः शब्दः । स्वसंवेद्यं-स्वसङ्गम्यम् ।
स्वस्थः-समदोषः समाग्निश्च समधातुमलक्रियः, प्रसन्नात्मेन्द्रि-
स्वहस्तितत्वं-स्वीकृतत्वम् । [यमनाः स्वस्थ इत्यभिधीयते
स्वस्तिकं-चतुष्पथः१सुखमासीनः२ऊरुजङ्घान्तरापादौ पादाग्रे
जानुमध्यमे, योगिनो यदवस्थानं स्वस्तिकं तद्विदुर्बुधाः ।
स्वागतं-शोभनमागमनम् । स्वातन्त्र्यं-स्वतन्त्रवृत्तिः१अन्यानपे
स्वादः-अभिरुचिः। [क्षत्वम्२सर्वनियन्तृत्वे सति स्वायत्तत्वं
स्वाध्यायः-आवृत्तिपूर्वकवेदाध्ययनम्१स्वाधीनोच्चारणक्षमत्वे
सत्यध्ययनं२प्रशान्तमन्त्रस्येश्वरवाचिनोभ्यासः। [पाधिमान्
स्वामी-अधिपतिः१स्वत्व(ाधिकारी२)निरूपितः३परिव्राजको-

स्वरूपत्वं-संसर्गान्तरमन्तरा विशिष्टप्रत्ययजननयोग्यत्वम् ।

स्वान्न-शोभनान्नं।स्वापः-स्पर्शज्ञाता।स्वाभाविकः-स्वभावसिद्धः
स्वाम्यर्थः-स्वामित्वरूपः। [तात्पर्यविषयीभूतार्थनिष्ठा लक्षणा
स्वारसिकलक्षणा-रूढिप्रयोजनाभाववती लक्षणा १अधुनातन-
स्वार्थानुमानं-स्वव्यामोहनिवर्तनक्षमम् १न्यायप्रयोज्यानुमानम्
स्वार्थानुमितिः-स्वस्य व्याप्यप्रतीत्यनन्तरं व्यापकप्रत्ययः।
स्वाहा-स्वत्वकरणको द्रव्यत्यागः १ देवोद्देशेन हविस्त्यागः।
स्वीकारः-ममेदमिति ज्ञानात्मकः संप्रदानव्यापारः१अस्वस्य
स्वेच्छा-स्वाभिलाषः। [स्वस्य कारः करणं
स्वेदजशरीरं-स्वेदादुत्पन्नं शरीरम्,यथा यूकालिक्षादिशरीरम्।
ह-स्फुटम्। ☞ ह
हंसः-योगनिष्ठः१सारासारविवेकयुक्तः। हंसकः-पादाङ्गदम्।
हंसकीलकः-रतिवन्धः। हंसनादिनी-गजेन्द्रगमना तन्वी को-
किलालपसंयुता,नितम्बे गुर्विणी या स्यात्सा स्मृता [णी स्त्री
हंसगामिनी-हंसइव शनैःशनैर्गमनवती।हंसगद्गदा-मधुरभाषि-
हंससंन्यासी-अष्टग्रासभोजी१शिखावर्जितो यज्ञोपवीतजटाशि-
क्यैकदण्डकमंडलुधरः ग्रामैकरात्रः नित्यं कृच्छ्रचांद्रायणपरः
हट्टः-पण्यशाला १क्रयविक्रयस्थानम्। हठः-अत्याचारः १ वला-
हठनिग्रहः-इन्द्रियाणां विषयेभ्यो निग्रहणम्।हड्डं-अस्थि। [त्कारः
हत्या-प्राणवियोगानुकूलव्यापारः। हतः-हताशः१नाशितः।
हननं-प्राणवियोगानुकूलव्यापारः। हन्त-विषादः१व्यस्तता।
हनुः-अधरः१वक्त्रैकदेशः२कपोलप्रान्तदेशः।हन्ता-हननकर्ता।
हन्त्री-आघातिनी। हन्नः-कृतपुरीषोत्सर्गः। [प्रापणं
हयमुखः-हयग्रीवावतारः। हरणं-वलाद्ग्रहणपूर्वकस्थानान्तर-
हरिः-कपिलः१सर्वपापहरः२कर्मपाशहरः३भक्तजनचित्तहर्ता।
हरिहरः-मूर्तिविशेषः१शिवनारायणः२हरियुक्तोहर इत्यन्योन्यः

हरिणः-पाण्डुरः। [भिव्यञ्जिका मुखविकासादिहेतुर्धीवृत्तिः
हर्षः-मानसप्रीतिजन्यरोमाञ्चादिशरीरविकारः१चित्तगतसुखा-
हलं-व्यजनम्। हलाहलं-भयङ्करं विषम्। हली-गृहीतहलः।
हवः-दशकुम्भमितः। हवनं-देवाद्युद्देशेन मन्त्रपूर्वकं वह्नौ-
हविः-चरुप्रमुखम्। हविर्याजी-ऋत्विक्। [हविःप्रक्षेपः
हविर्धानं-हविषःस्थापनस्थानम्। हव्यं-देवानामन्नम्१देवोद्दे-
श्यकवस्तु २ हवनयोग्यं पुरोडाशादिकम्। [शत्यङ्गुलः
हसितं-किञ्चिल्लक्षितदन्ताग्रम्। हस्तः-पञ्चशाखा १ चतुर्वि-
हस्तकृतपापं-दुष्टप्रतिग्रहसत्पीडनादिकं।हस्ताभ्यासः-हस्तस्पर्शः
हस्तलाघवं-चमत्कारलम्भार्थमलक्षितेन हस्तसंचारेण तत्त-
हस्तिजिह्वानाडी-वामनेत्रस्था नाडी। [द्वस्तुप्रवर्तनं
हस्तियुद्धं-हस्तिभिर्हीनतुल्यसमैः सह वरण्डकाद्यामिषमन्तरतः
हानं-निवृत्तिप्रयोजकमनिष्टसाधनताज्ञानम्। [कृत्वा युद्धं
हारी-हरणशीलः। हार्दं-हृदयस्थम्। हावभावः-प्रेमद्योतकः।
हावः-प्रेमालापः१अक्षिभ्रूविकारकारी सशृङ्गारोऽल्पालापः।
हासः- } कण्ठोष्ठपुटविस्फूर्जनपुरःसरमहहह इत्यट्टः१विकृतवे-
हास्यं } षवाक्चेष्टादिदर्शनजन्यसुखविशेषो रदविकासादिहेतुः
हासितं-विकाशितम्।हाहाकारः-चीत्कारः१हा हा इत्यस्य कारः
हितः-इष्टसाधनम्१उत्तरकालफलवान्। हितेरतः-शुभकर्ता।
हिन्दुः-हिंसातो दूरं याति१हीनं दूषयतीति मेरुतन्त्रे२वेदप्रामा-
ण्याभ्युपगन्ता ३आसिन्धुसिंधुपर्यन्ता यस्य भारतभूमिका,
हिडं-गतिः। [पितृभूः पुण्यभूश्चैव सर्वे हिन्दुरिति स्मृतः
हिरण्यगर्भः-अपञ्चीकृतभूतकार्यसमष्टिसूक्ष्मशरीरः १ सम-
ष्टिसूक्ष्म (प्रपञ्चाभिमानी २) कारणशरीरोपहितं चैतन्यम्।
हिंसकः-हिंसाकारकः। हिंसालुः-उपद्रवी १ अनिष्टकारी।

हिंडनं-स्त्रीमैथुनम्। [प्राण्युपघातः३प्राणवियोगानुकूलव्यापारः
हिंसा-प्राणिवृत्तिच्छेदः१ अशास्त्रीयप्राणिवधः २ अविधिपूर्वकं
हिलः-भावकरणम्। ही-विस्मयः। हीनः-क्षीणः २ निकृष्टः।
हीनवादी-पूर्वपदं परित्यज्य योन्यमालम्बते पुनः, पादसंक्रम-
णाज्ज्ञेयो हीनवादी स वै नरः। [धानुसारकरणं
हीनवीर्यं-हीनबलम् १बलरहितम्। हीनानुसारणं-भग्नाश्वयो-
हीनार्थः-सहायरहितः१निषिद्धवक्ता२क्रियाकार्यनिष्पादनास-
हुङ्कारः-क्रोधवर्णः। हुडः-मूढः१मेषः।हुडुं-राशीकरणम्। [मर्थः
हुतं-इष्टम्। हुतहोमः-हवनकर्ता।हूणः-वैदेहकात्पुल्कसीजातः।
हूर्च्छनं-कौटिल्यम्। हृतचेतनः-वशीकृतचित्तः। [त्तापकर्षकः
हृदयं-वक्षोमध्यं१पद्मकोशप्रतीकाशं मांसम्। हृदयग्राही-चि-
हृषीकेशः-सर्वेन्द्रियप्रवर्तकः १ हृषीकाणामिन्द्रियाणामीशो
हृष्टः-प्रमुदितः१प्राप्तानन्दः। हे-शत्रुताद्योतकः। [नियन्ता
हेतुः-कर्तृत्वभिन्नकारणम् १ पक्षधर्मतादिसिद्धिरिति ग्रं० २सा-
ध्यविषयकज्ञानजनकवचनम् ३तृतीयान्तं पञ्चम्यन्तं वा, यथा
धूमेन धूमाद्वेति ४प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्त-
कज्ञानजनकविभक्तिमद्वाक्यम् ५ स द्विविध उत्पादको ज्ञा-
पकश्च। मृदो घटो जायत इत्यादौ उत्पादकत्वम् ६ पर्वतो
वह्निमान् धूमादित्यादौ ज्ञापकत्वम्। [वकभावः
हेत्ववधारणं-हेतोर्मिथ्याकल्पना। हेतुसङ्गतिः-उपजीव्योपजो-
हेत्वन्तरनिग्र०-परप्रयुक्तदूषणोद्धरणाय स्वहेतौ विशेषणदानं
हेत्वाभासः-दुष्टो हेतुः १ पञ्चरूपोपपन्नत्वाभावे सति तद्रूपेण
भासमानः२अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञान-
हेयः-त्याज्यः१हानक्रियाविषयः। हेलनं-अवज्ञा। [विषयः
हेला-शृङ्गाररसप्रवृद्धौ या रत्यभिनिवेशनिष्ठा सा१प्रौढेच्छा

याऽभिरूढानां नारीणां सुरतोत्सवे, शृङ्गारशास्त्रतत्त्वज्ञैर्हेला
हेतुकः-तार्किकः१हेतुप्रतिपादननिपुणः। [सा परिकीर्तिता
हैतुकः-केवलतर्कनिष्ठः।ह्यैयङ्गवं-नवनीतम्। [तां१यज्ञमंडपः
होता-ऋग्वे (दवेत्तृत्विक् १)दोक्तकर्मकर्ता। होत्रीयः-हवनक-
होमः-देवतोद्देशेन वह्नौ मन्त्रद्वारा द्रव्यत्यागः१अग्निसंयोगानु-
कूलक्रियानुकूलघृतादिवृत्तिनोदनादिव्यापार इति दिनकार्यां
ह्नवः-बोधविषयमितरादर्शनयोग्यदेशस्थापनं।ह्रदः-अगाधज-
ह्रस्वः-एकमात्राकालोच्चार्यलघुवर्णः। ह्रासः-अपचयः। [लाशयः
ह्रीः-व्रीडा१विष्णुपत्नी * २ लोकापवादभयम् ३ अकार्यकरणे
लज्जा४अकार्यप्रवृत्त्यारम्भे तत्प्रतिबन्धिका लोकलज्जेति ग्रं०
ह्रीजितः-लज्जाशीलः। ह्रीतः-त्रपातः।ह्रीणः-लज्जितः।।८९०१

सहजसरलां प्रेम्णा दीर्घां समस्तविशोधिनीं,
सकृदपि कृपादृष्टिं सन्तो दिशन्तु भवद्विधाः।
कथमपि सती पूता सद्यस्तया विषयीकृता,
मम कृतिरियं हित्वा दोषान्भवत्वतिसद्गुणा।। १ ।।
स्थितानि ग्रन्थेषु प्रकटमुपदिष्टानि गुरुभिः,
गुणो वा दोषो वा न मम परवाक्यानि वदतः।
परन्त्वस्मिन्नस्ति श्रमफलमिदं यन्निजधिया,
श्रुतीनां युक्तीनामकलि गुरुवाचां च विषयः ।। २ ।।
सिद्धान्तरीतिषु मया भ्रमदूषितेन स्यादन्यथापि लिखितं यदि किञ्चिदस्य
संशोधने सहृदयास्सदया भवन्तु सत्संप्रदायपरिशीलननिर्विशङ्काः ।।३।
यदत्र स्खलितं किञ्चित्प्रमादेन भ्रमेण वा ।
तत्सर्वं शोधयन्त्वार्याः कस्य न स्खलितं मनः।। ४ ।।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥ ५ ॥
बहुच्छिद्रं परित्यज्य गुणलेशजिघृक्षया ।
परिगृह्णन्त्वदो विज्ञा ऋजवो दम्भवर्जिताः ॥ ६ ॥

---

* अनपेक्षितापेक्षितग्रन्थः *

पृष्ठे	पक्तौ	अन०	अपे०	पृष्ठे	पक्तौ	अन०	अपे०
२	१५	न्त	न्तं	६४	१६	प्रौणः	प्राणैः
३	१०	कि?	किं?	६४	२१	रिह	रि ह
२०	२२	र्शी	र्शी	६७	४	म	सः
२७	९	ध्याघ	ध्या घ	७३	१८	तद्दु	तदु
३२	१२	ग्रं०	गं० २	७८	१४	थमं	थमं
३६	२५	त्वं-	त्वं	७९	२२	णम् द	णम्, द
३७	५	यांम्	याम्	८५	५	पृतृ	पृतृ
४२	२५	अधि	आधि	८७	१३	तृष्ण	तृष्ण
४३	१३	प्रच	प्रचु	९१	२३	तय	तया
४६	२१	ग्रंह	ग्रह	९१	२४	द्यर्थी	द्यर्थं
४७	११	द्वहु	द्वहु	९२	१७	दान	दन
४९	२१	त्ता वा	सावा	९५	२०	क्यत्व	क्तु
५०	२	द्वृत्य	द्वृत्य	९७	१९	कुभ्:	कुभ्
५४	१५	शकि	शंक	९९	३	दुव	दुर्व
५५	१७	मद	मर्द	१००	१४	स	सः
ऋतुः-रजोदर्शनम्				१०७	७	त)	ततः)

गहनः-रहस्यमयः १ दुरभिगम्यः । गह्वरं-अतलस्पर्शगर्तम् ।

पृष्ठे	पक्तौ	अन०	अपे०
११२	२३	रता	रत
निष्पन्नः-तत्परः१			
११६	४	वोतो	वतो
११८	१८	च्युतिः	च्युतः
१२९	१४	पैशू	पैशु
१३०	१९	करि	कर
१३१	२५	लाप	लापः
१३२	१७	तंपु	तं पु
१३३	१९	श्यं-	श्यं
१४०	२५	त्यक	त्य क
१४२	१९	श्चि त्तं	श्चित्तं
१४३	८	प्ररि	परि
१४४	४	फच	फचं
ब्रह्मजिज्ञासा-ब्रह्मणो ज्ञातुमिच्छा			
१५३	६	सञ्ज	सज्ज
१५७	१३	हत्त्व	हत्व
१५९	८	रारि	ररहि
१६२	४	श(व्प	श(वप
१६३	८	नमल	नगल
१६६	९	ष्टतो	ष्टपठितो
१६७	१३	पद	प्रद
१६७	१३	रिचि	रचि
१६८	३	जाने	जान
१६८	७	यक	यूक

पृष्ठे	पक्तौ	अन०	अपे०
१७६	१	इतः	इत
१७६	१८	तश्चं	तश्चं
१७७	९	प्रकी	परिकी
१७७	१०	म दा	मन्दा
१७८	१०	दानं-	दानं
१८४	१२	करी	करि
१९१	६	तिः	ति-
१९२	२	नाधी	ाधी
१९५	१८	ध्याति	ध्या
१९५	२०	व्य	व्यति
२०३	२४	देशष्टुं	देष्टुं
२०५	१२	शुःद्ध	शुद्धः
२०६	२२	त्याभि	त्यभि
२०८	१७	नशः	नाशः
२१०	३	रिरं	रिर
२१२	४	समु	समू
२१३	१२	तीयि	तीय
२१४	१९	तिवै	ति वै
२१५	२५	पाल	पालं
२१६	१	माचा	माच
२१८	२४	न्य वे	न्यत्वे
२२१	२५	सय	सत्य
२२३	९	धि	धि-
२२३	१०	ताः,	ताः
२३३	२१	न्युसि	न्वोः सि

* LAKSHANA-SANGRAHA *

The various esoteric meaning and determinations of Sanskrit Literature such as. **VEDAS, VEDANGAS, DARSHANAS, SMRITIS, PURANAS,** and **ALANKAR, SHASTRAS, Etc,** are found to have been exactly brought together in this booklet.

To speak the truth there never has been in this branch before this any book of such simple apprehension and usefulness containing a systematic treatment of **LAKSHANAS** i.e. Definitions or terns almost **8901**

The publications has already been received with joy by the scholars of **OXFORD, BANARAS, CALCUTTA, MADRAS, KASHMIR, MYSORE** and **NEPAL** and we are glad to find that many Professors, Sanskrit teacher3 **VIZ** Pandits from almost all parts of India have approved it as a text book to be used in their own schools and Colleges according to our own idea, The book is a marvel of lexicographic skill what is more, it by no means, makes dry reading and the alphabetical order adopted by the author will help the scholars and pupils of Indian thought to secure a complete knowledge from numerous books easily 6th Edition 236 Pages Cost 12 as. The book is to be obtained from:—

Manbhari Devi, VILLAGE-PUTHI,
POST-BAWANIKHERA,
HISSAR (INDIA)

आ

भरतनि